CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, [illegible] Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दु. [illegible] नं. १६०८५

अथकालमाधवः प्रारभ्यते

मूल्य रु. ५।-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जनकराजा १९५७

का॰मा॰ ॥श्रीगणेशाय नमः॥ वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे॥ यन्नत्वा कृतकृत्याः स्युस्तन्नमामि गजान
१ नं॥१॥ सोहं प्राप्यविवेकतीर्थपदवीमाम्नायतीर्थे परं मज्जन्सज्जनसंगतीर्थनिपुणः सद्वृत्ततीर्थं श्रयन्॥ लब्धा
माकलयन्प्रभावलहरीं श्रीभारतीतीर्थतो विद्यातीर्थमुपाश्रयन् हृदि भजे श्रीकंठमव्याहतं॥२॥ सत्यैकव्रतपा
लको द्विगुणधीस्त्र्यर्थीचतुर्वेदिता पंचस्कंधकृतीषडन्वयदृढः सप्तांगसर्वंसहः॥ अष्टव्यक्तिकलाधरो नवनि
धिः पुष्यद्दशप्रस्थयः स्मार्त्तोच्छ्रायधुरंधरो विजयते श्रीबुक्कणक्ष्मापतिः॥३॥ व्याख्याय माधवाचार्यो धर्मान्पा
राशरानथ॥ तदनुष्ठानकालस्य निर्णयं वक्तुमुद्यतः॥४॥ व्यामूढानामिह तनुभृतां जाह्नवीतीर्थमेकं विद्या
तीर्थं प्रकृतिविमलं सद्विवेकोदयानां॥ सर्वेषां तत्प्रथमसुखदं भारतीतीर्थमाहुस्तत्प्राबान्यो विपुलमनसो नि
र्णये शक्तिरस्ति॥५॥ अर्थोनुक्रम्यते श्लोकैरखिलो निर्णिनीषितः॥ तावतैवानुतिष्ठासुर्निःसंदेहं प्रवर्त्ततां
॥६॥ ततो मीमांसकश्चित्रस्य समाधानाय तत्पुनः॥ विवरिष्ये यथान्यायं श्रुतिस्मृतिवचोबलात्॥ पंचप्रकरणा राम
न्यत्र तेषूपोद्घातवत्सरौ॥ प्रतिपच्छिष्टतिथयो नक्षत्रादिरिति क्रमः॥८॥ उपोद्घाते कालसत्त्वं तस्य निर्णययोग्य १

ता॥ ईश्वरोनित्यकालात्माचिंतनीयःसकर्मसु॥ ९॥ जन्येकालेब्दमुख्यत्वमुक्तमेतच्चतुष्टयं॥ अब्दायनर्त्तुः
मासाश्चपक्षःप्रकरणांतरे॥ अब्दःपंचविधश्चांद्रोव्रतादौतिलकादिके॥ सुजन्मादिव्रतेसौरोगोसत्रादिषुसाव
नः॥ त्रयोप्याचार्यसेवादौविकल्पंतेनिजेच्छया॥ आयुर्दायेहिनाक्षत्रोबार्हस्पत्योधिवत्सरे॥ चांद्राणांप्रभवादी
नांपंचकेपंचकेयुगे॥ संपरीदान्विदित्त्वेतच्छब्दपूर्वास्तुवत्सराः॥ तिलोयवोवस्त्रधान्यरजतंदीयतेत्रतु॥ उग्र
कर्मणिशांतेचस्तोयनेदक्षिणोत्तरे॥ वसंताद्यृतवोद्वेधाचांद्राःसौराश्चचांद्रगाः॥ चैत्राद्यास्त्वथमीनाद्यामेषाद्या
वाविवस्वतः॥ तेष्वाधानादयस्तद्वत्स्नपनमूर्त्तिव्रतपूजनं॥ मासास्तुसावनःसौरःचांद्रोनाक्षत्रइत्यमी॥ दर्शांतः
पूर्णिमांतोवाचांद्रोसौविप्रवैश्ययोः॥ सौरोराज्ञःसावनस्तुयज्ञेज्योतिषिकेपरः॥ माघादिमासभेदेषुतिलदा
नादयःस्मृताः॥ चांद्रोधिमासोसंक्रांतःसोंतर्भवतिचोत्तरे॥ असंक्रांतावेकवर्षेद्वौचेत्संसर्पआदिमः॥ क्षयमासो
ह्यसंक्रांतःसचांहस्पतिसंज्ञकः॥ त्रयस्त्याज्याविवाहादौसंसर्पांहस्पतीउभौ॥ सुद्धौश्चौतेतथास्यान्नेमलमा
सोविविच्यते॥ काम्यारंभंनत्समाप्तिंमलमासेविवर्जयेत्॥ आरब्धंमलमासात्प्राक्कृच्छ्रसत्रादिकंतुयत्॥

का.मा. तत्समाप्यं स्नावनस्यमानस्यानतिलंघनात्॥ आरंभस्य समाप्तेश्च मध्ये स्याच्चेन्मलिम्लुचः॥ प्रवृत्तमखिलं का
२ म्यं तदानुष्ठेयमेव तु॥ कारीर्यादि तु यत्काम्यं तस्यारंभसमापने॥ कार्यकालविलंबस्य प्रतीक्षाया असंभवात्॥
अनन्यगतिकं नित्यं अग्निहोत्रादि न त्यजेत्॥ गत्यंतरयुतं नित्यं सोमयागादि वर्जयेत्॥ अगतिग्रहणत्वानं
जातेष्टिर्गतिसंयुता॥ इयं नैमित्तिकं यस्य व्यवस्था नित्यवन्मता॥ शुद्धमासमृतानां स्यान्मलिने प्रथमाब्दिकं॥
मलमासमृतानां तु मले स्यादाब्दिकांतरं॥ दैवे मुख्यः शुक्लपक्षः कृष्णः पित्र्ये विशिष्यते॥ तृतीये तु प्रकरणे
वर्णिता प्रतिपत्तिथिः॥ प्रतिपन्नाम विज्ञेया चंद्रस्य प्रथमा कला॥ शुक्लपक्षे विशेच्चंद्रं कृष्णपक्षे विनिःसरेत्॥
शुद्धा विद्धा तिथिः शुद्धा हीना तिथ्यान्यथाहनि॥ उदये पूर्वया तिथ्या विध्यते त्रिमुहूर्तकैः॥ सायं तूत्तरया तद्व
न्न्यूनया तु न विध्यते॥ वेध्यापि त्रिमुहूर्तैर्वा न न्यूना वेधमर्हति॥ शुद्धायां नास्ति संदेहो दैवे पित्र्ये च कर्मणि॥
उपवासश्चैकभक्तं नक्तं चायाचितं व्रतं॥ दानं च षड्विधं दैवं क्रमादत्र विविच्यते॥ एकोद्दिष्टं पार्वणं च पित्र्ये द्वि राम
विधमीर्यते॥ शुक्लपक्षे दर्शविद्धा कृष्णे विद्धा द्वितीयया॥ उपोष्या प्रतिपच्छुक्ले मुख्या स्यादापराण्हिकी॥ तदभा २

वेतु सायान्हे व्यापिनी परिगृह्यतां ॥ प्रातःसंगवमध्यान्हापराण्हाः सायमित्यसौ ॥ अत्रान्हः पंचधा भागो मु
ख्योहि त्र्यादिभागतः ॥ अभावेपि प्रतिपदः संकल्पः प्रातरिष्यते ॥ तिथिस्त्रियामतोर्वाक्चेत्तिथ्यंते पारणं भवेत्
॥ यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणं ॥ बल्युत्सवं च पूर्वेद्युरुपवासवदाचरेत् ॥ मुख्यातिथ्यंतराये तु तिथिशे
षोपि गृह्यतां ॥ शुक्लाधिका तु कृष्णापि पूर्वा संपूर्त्तिसंभवात् ॥ ग्रहीतव्या त्वेकभक्ते मध्यान्हव्यापिनी तिथिः ॥
परेद्युरेव तद्व्याप्तिः पूर्वेद्युर्वा दिनद्वये ॥ नोभयत्रोभयत्रांशे साम्यं वैषम्यमित्यमी ॥ षट्पक्षास्तेषु चैकैकव्याप्तौ
सैवात्र गृह्यतां ॥ दिनद्वयेपि तद्व्याप्त्यव्याप्तौ चैकदेशतः ॥ समव्याप्तौ च पूर्वैव वैषम्ये त्वधिकेष्यतां ॥ अन्यां गस्यै
कभक्तस्य कालस्त्वंग्यनुसारतः ॥ उपवासप्रतिनिधेस्स्थितिः स्यादुपवासवत् ॥ प्रदोषव्यापिनी नक्ते तिथिर्व्याप्ति
र्दिनद्वये ॥ अव्याप्तिर्वाथवांशे नव्याप्तिः स्यात्सर्वथोत्तरा ॥ सौरनक्ते तु सायान्हव्यापिनी न प्रदोषगा ॥ अयाचि
ते तु तिथयः स्वीकार्या उपवासवत् ॥ सोदयत्रिमुहूर्त्तायां कुर्यात्स्नानं व्रतानि च ॥ उभयत्र तथात्वे तु पूर्वेद्युस्तदनुष्ठि
तिः ॥ परत्रैव तथात्वं चेत्पूर्वयाद्यातिथिक्षये ॥ तिथेः साम्ये च वृद्धौ च गृह्यतां तिथिरुत्तरा ॥ अस्पर्शे चैकदेशस्य

CC-0. In Public Domain. Digitization by eGangotri

का·मा· व्याप्तौ पूर्वैव गृह्यतां॥ एकोद्दिष्टे तु मध्याह्नयुक्तास्यादेकभक्तवत्॥ एकदेशसमव्याप्तौ क्षये पूर्वान्यथोत्तरा॥ कुत
३ पाद्यपराण्हं तव्याप्तिरब्दिक उत्तमा॥ तदभावे पराण्हस्य व्यापिका गृह्यतां तिथिः॥ क्षये पूर्वोत्तरा वृद्धौ व्याप्ति
श्चेदपराण्हयोः॥ नग्राह्यतिथिजौ वृद्धिक्षयावूर्ध्वतिथेस्तु तौ॥ साम्यात्पूर्वतिथेर्योत्या परविद्धेव वृद्धिवत्॥ न स्यु
श्चेदपराण्हौ चेत्पूर्वास्यात्कुतुपोरथा॥ वैषम्येणैकदेशस्य व्याप्तौ ग्राह्या महत्त्वतः॥ साम्येन चेत्क्षये पूर्वापरास्या
द्वृद्धिसाम्ययोः॥ वृद्धिसाम्यक्षयाग्राह्यतिथिगा नोर्ध्वगा इह॥ द्वितीयाद्यास्तुपर्वान्ता सूर्यप्रकरणोदिताः॥ संचार
णीयः सामान्यान्तिथिषु प्रतिपन्नयः॥ क्वचित्कश्चिद्विशेषोस्ति सोयमत्राभिधीयते॥ पूर्वेद्युरसती प्रातः परेद्युस्त्रि
मुहूर्त्तगा॥ साद्वितीयापरोपोष्या पूर्वविद्धा ततोपरा॥ रंभातृतीया पूर्वास्यादुत्तरास्याद्व्रतांतरे॥ परेन्हि नास्ति चे
त्पूर्वविद्धाप्यस्तु व्रतांतरे॥ मुहूर्तमात्रसत्त्वेपि दिने गौरीव्रतं परे॥ शुद्धाधिकायामप्येवं गणयोगप्रशंसनात्॥
चतुर्थी तु परोपोष्या गणनाथव्रतस्य तु॥ मध्यान्हव्यापिनी पूज्या तदन्नागचतुर्थ्यपि॥ परेद्युरेवमध्यान्हव्याप्तौ राम
विघ्नस्य सोत्तरा॥ अन्यथा पूर्वविद्धैव मातृयोगप्रशस्तितः॥ पूर्वेद्युरेव तद्व्याप्तौ पूर्वं सर्पाप्रियातिथिः॥ नोचेत्सर्पस्य ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंचम्यायोगेत्स्यंतंप्रशस्यते॥गौर्य्याःशुद्धजयाप्यस्तुनागविद्धानिषिध्यते॥सर्वत्रपंचमीपूर्वाग्राह्यास्कंदव्रतेपरा
॥नागविद्धास्कंदषष्ठीसानिषिद्धाव्रतांतरे॥उत्तरस्याअलाभेतुनागविद्धैवगृह्यतां॥विनाद्वादशनाडीभिर्नागवे
धोनदोषकृत्॥सप्तमीपूर्वविद्धैवव्रतेषुनिखिलेष्वपि॥अलाभेपूर्वविद्धायाःपरविद्धैवगृह्यतां॥व्रतमात्रेष्टमी
कृष्णापूर्वाशुक्लाष्टमीपरा॥दूर्वाष्टमीतुशुक्लापिपूर्वविद्धाविधीयते॥पक्षद्वयेप्युक्तैवशिवशक्तिमहोत्सवे
॥ज्येष्ठर्क्षयोगेपूर्वापिग्राह्याज्येष्ठाव्रतेतिथिः॥मध्यान्हादूर्ध्वमृक्षंचेत्तत्परेद्युःसाप्रशस्यते॥ज्येष्ठर्क्षभानुवारा
भ्यांशुक्लाष्टम्यतिदुर्लभा॥जयंत्याख्यंव्रतंभिन्नंकृष्णजन्माष्टमीव्रतात्॥शुद्धाचसप्तमीविद्धेत्येवंजन्मा
ष्टमीद्विधा॥सप्तमीचेन्निशीथात्प्राक्विद्धाशुद्धान्यथाभवेत्॥शुद्धायांनास्तिसंदेहोविद्धाचत्रिविधेष्यते
॥निशीथयोगःपूर्वेद्युःपरेद्युर्वोभयोरुत॥पूर्ववत्प्रथमेपक्षेपरेवोत्तरपक्षयोः॥अष्टमीरोहिणीयुक्ताजयंतीसा
चतुर्विधा॥शुद्धाशुद्धाधिकेत्येवंविद्धाविद्धाधिकेतिच॥शुद्धायामपिविद्धायांनक्षत्रेभाव्योत्तरातिथिः॥शुद्धा
धिकायांयोगश्चेदेकस्मिन्वादिनद्वये॥नैकयोगेस्तिसंदेहोद्वियोगेप्रथमंदिनं॥सदानिशीथेपश्चाद्वेत्युत्त

का·मा मोमध्यमोधमः॥ योगस्त्रिधापि पूर्वैर्युःसंपूर्णत्वादुपोषणं॥ विद्धाधिकायामप्येकदिने योगेसगृह्यतां॥ द्वयोर्यो
४ गस्त्रिधाभिन्नोनिशीथेवृत्तिभेदतः॥ तद्वृत्तिर्दिनएकस्मिन्नुभयोर्नोभयोरिति॥ एकस्मिंश्चेत्तद्दिनंस्यात्तस्त
योरंत्ययोःपरा॥ बुधेसोमेजयंतीचेद्वारेसतिफलप्रदा॥ तिथ्यृक्षयोर्द्वयोरंतउन्नमेपारणंभवेत्॥ एकस्यांतेमध्य
मंस्यादुत्सवांतेधर्मस्मृतं॥ यस्मिन्वर्षेजयंत्याख्योयोगोजन्माष्टमीतदा॥ अंतर्भूताजयंत्यांस्यादृक्षयोगप्रशस्ति
तः॥ नवमीपूर्वविद्धैवपक्षयोरुभयोरपि॥ मध्यान्हेरामनवमीपुनर्वसुसमन्विता॥ ग्राह्यानेवाष्टमीयुक्तास
नक्षत्रापिवैष्णवैः॥ कृष्णापूर्वोत्तराशुक्लादशम्येवंव्यवस्थिता॥ जयंतीव्रतवन्नित्यंकाम्यंचैकादशीव्रतं॥ अ
रुणोदयवेधोत्रवेधःसूर्योदयेतथा॥ उक्तौद्वौदशमीवेधौवैष्णवस्मार्त्तयोःक्रमात्॥ कलाकाष्ठादिवेधोपिग्रा
ह्योत्रत्रिमुहूर्त्तवत्॥ वैखानसाद्यागमोक्तदीक्षांप्राप्तोहिवैष्णवः॥ विद्धात्याज्यावैष्णवेनमुख्याप्याधिक्यसंभ
वे॥ एकादशीद्वादशीवाधिकाचेत्त्यज्यतांदिनं॥ पूर्वंग्राह्यंतूत्तरंस्यादितिवैष्णवनिर्णयः॥ एकादशीद्वादशीचे राम
त्तुभयंवर्धतेयदा॥ तदापूर्वदिनंत्याज्यंस्मार्त्तैर्ग्राह्यंपरंदिनं॥ एकादशीमात्रवृद्धौगृहियत्योर्व्यवस्थितिः॥ उपो ४

CC-0. In Public Domain. Digitization by eGangotri

ष्या गृहिभिः पूर्वा यतिभिस्तूत्तरा तिथिः ॥ द्वादशी मात्र वृद्धौ तु शुद्धा विद्धे व्यवस्थिते ॥ शुद्धा पूर्वोत्तरा विद्धा स्मार्त्ते
निर्णय ईदृशः ॥ श्रवणेन युता चेत्स्याद् द्वादशी सा हि वैष्णवैः ॥ स्मार्त्तैश्चोपोषणीया स्यात्त्यजेदेकादशीं तदा ॥ उप
वास व्रताद न्य व्रते सार्द्ध मुहूर्त्तकैः ॥ सप्तमिर्दशमी विद्धामेतामेकादशीं त्यजेत् ॥ द्वादशी पूर्वविद्धैव व्रतेषु निखि
लेष्वपि ॥ शुक्ल त्रयोदशी पूर्वा परा कृष्णा त्रयोदशी ॥ अलाभे सापि पूर्वैव पूर्वानंग त्रयोदशी ॥ या शुक्ला गृह्यते पू
र्वा गृह्यतां सा पराण्हिकी ॥ चतुर्दश्युत्तरा शुक्ला पूर्वा कृष्ण चतुर्दशी ॥ उदये त्रिमुहूर्त्तापि ग्राह्यानंतव्रते तिथिः ॥
शुक्लापि रात्रियुक्ता स्याच्चैत्र श्रावण मासयोः ॥ शुक्ला सर्वापि पूर्वैव यदि स्यादापराण्हिकी ॥ प्रदोषे वा निशीथे वा
द्वयोर्वा यास्ति सा भवेत् ॥ शिवरात्रिव्रते तत्र द्वयोः सत्ता प्रशस्यते ॥ तदभावे निशीथे कन्या सापि परिगृह्यतां ॥
तस्याश्चासंभवे ग्राह्या प्रदोष व्यापिनी तिथिः ॥ तिथ्यंते पारणं याम त्रयादर्वाक्समापने ॥ अन्यथा पारणं प्रा
तरन्य तिथ्युपवासवत् ॥ पूर्वविद्धैव सावित्री व्रते पंचदशी तिथिः ॥ नाड्यो ष्टादश भूतस्य स्युश्चेत्तत्र परेह नि ॥
व्रतांतराणि सर्वाणि परेहन्येव सर्वदा ॥ श्राद्धं पराण्ह कालीनो दर्श आब्दिकवन्मतः ॥ दिनद्वयेप्येकदेशवृत्तौ

 ग्राह्यो महत्त्वतः॥ तुल्यत्वं चेदेकदेशे स्यात्पूर्वोन्यथोत्तरः॥ कृत्स्नव्याप्तौ द्वयोरन्हो रुत्तरस्तिथिरद्भुतः॥ साग्न्य
 नग्निव्यवस्थास्यान्नस्याच्चेद्दूपराण्हयोः॥ पूर्वेद्युः साग्निकः कुर्यादुत्तरेद्युरनग्निकः॥ पर्वप्रतिपदोः संधिर्मध्या
न्हे वा ततः पुरा॥ अन्वाधानं पूर्वदिने यागः संधिदिने भवेत्॥ ऊर्ध्वं मध्यान्हतः संधावन्वाधानं तु तद्दिने॥ इष्टिं
परदिने कुर्याद्न्यो वाजसनेयिनः॥ यस्तु वाजसनेयी स्यात्तस्य संधिदिनात्पुरा॥ न काप्यन्वाहितिः किंतु स
दा संधिदिने हि सा॥ संधिश्चेत्संगवादूर्ध्वं प्राक्पर्यावर्त्तनाद्रवेः॥ सा पौर्णमासी विज्ञेया सद्यः कालविधौ तिः
थिः॥ वृद्धिः प्रतिपदो यास्ति तदर्द्धं पर्वणि क्षिपेत्॥ क्षयस्यार्द्धं तथा हित्वा संधिर्निश्चीयतां सदा॥ बौधायनमते
दर्शश्राद्धं चेष्टिर्विशिष्यते॥ द्वितीया त्रिमुहूर्त्ता चेत्प्रतिपद्यापराण्हिकी॥ अन्वाधानं चतुर्दश्यां दर्शे स्वल्पेपि व
र्त्तयेत्॥ दर्शश्राद्धं तथा कार्यमिति बौधायनोऽब्रवीत्॥ इष्ट्यादि विकृतिः सर्वा पर्ववण्येवेति निर्णयः॥ पंचमे तु प्र
करणे पूर्वार्द्धभादिनिर्णयः॥ उत्तरार्द्धे कालभेदात्कर्मभेदोपदेशनं॥ यस्मिन्नस्तमियाज्ञानुस्तन्नक्षत्रमुपो
षणे॥ मुख्यं तस्यासंभवे तु ग्रहीतव्यं निशीथयुक्॥ उपवासे यदृक्षं स्यात्तद्दिनक्तैकभक्तयोः॥ उदये त्रिमुहूर्त्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्थं नक्षत्रं व्रतदानयोः॥ दिनद्वये तथात्वे तु पूर्वं स्याद्बलवत्ततः॥ श्रवणं तूत्तरं यात्स्यमुपाकरणकर्मणि॥ पित्र्ये तु
तिथिवत्सर्वो नक्षत्रस्य विनिर्णयः॥ पूर्वेःस्यादुपवासादावुत्तरो व्रतदानयोः॥ योगः श्राद्धे कर्मकालव्याप्तस्तु
परिगृह्यतां॥ करणं यद्दिने तत्तु ग्राह्यं रात्रौ यदा तदा॥ दिनद्वयैकभक्ता यां उपवासः प्रसिध्यति॥ वारेषु संश
याभावात् ग्रहीतव्यं यथास्थितम्॥ आसन्ननाड्यः संक्रांतेः पुण्याः स्नानादिकर्मसु॥ चरेषु कर्कटे पूर्वा मकरे
विंशतिः परा॥ वर्त्तमाने तुलामेषे नाड्यस्तूभयतो दश॥ वृषभादौ स्थिरे पुण्याः प्राक्पश्चादपि षोडश॥ मि
थुनादौ द्विस्वभावे उत्तराः षष्टिनाडिकाः॥ अहःसंक्रमणे रात्रावनुष्ठाननिषेधतः॥ उक्तौ कालौ व्यवस्थाप्यौ
तद्दशात्पूर्वपश्चिमौ॥ रात्रौ संक्रमणे भानोर्दिनार्द्धं स्नानदानयोः॥ अर्द्धरात्रादधस्तस्मिन्मध्यान्हस्योप
रि क्रिया॥ ऊर्ध्वं संक्रमणे चोर्ध्वं उदयात्प्रहरद्वयं॥ पूर्णे चेदर्द्धरात्रे तु यदा संक्रमते रविः॥ प्राहुर्दिनद्वयं पुण्यं मु
क्त्वा मकरकर्कटौ॥ कर्कटे मकरे रात्रावप्याचारादनुष्ठितः॥ पूर्णिमाप्रतिपत्संधौ राहुः संपूर्णमंडलं॥ ग्रसते चं
द्रकर्म च पर्वप्रतिपदंतरे॥ ग्रस्यमाने भवेत्स्नानं ग्रस्ते होमो विधीयते॥ मुच्यमाने भवेद्दानं मुक्ते स्नानं विधीय

का॰मा॰ ते॥ सूर्यग्रहे तु नाश्नीयात् पूर्वं यामचतुष्टयं॥ चंद्रग्रहे तु यामांस्त्रीन्बालवृद्धातुरैर्विना॥ अपराण्हे न मध्यान्हे
६ मध्यान्हे न तु संगवे॥ भुंजीत संगवे चेत्स्यान्न पूर्वं भुजिमाचरेत्॥ ग्रस्तोदये विधोः पूर्वं नाहः भोजनमाचरेत्॥ ग्र-
स्तावेवास्तमानं चरवींद्वाप्नुतो यदि॥ तयोः परेद्युरुदये स्नात्वाभ्यवहरेन्नरः॥ त्रयोदश्यादितो वर्ज्यं दिनानां न
वकं ध्रुवं॥ मंगलेषु समस्तेषु ग्रहणे चंद्रसूर्ययोः॥ द्वादशादि स्तृतीयांतो वेधइंदुग्रहे स्मृतः॥ एकादश्यादिकः सौ
रे चतुर्थ्यंतः प्रकीर्तितः॥ खंडग्रहे तयोः प्रोक्तमुभयत्र दिनद्वयं॥ नित्ये नैमित्तिके जप्ये होमयज्ञक्रियासु च॥
उपाकर्मणि चोत्सर्गे ग्रहदोषो न विद्यते॥ तमेव निर्णयं शास्त्रन्यायाभ्यां कर्तुमुद्यमः॥ ननु नायमुद्यमः सफलः
कालस्य गगनकुसुमायमानत्वात्॥ तदेतत्परमरहस्यमभिजानानः कपिलमहामुनिस्तत्वानि विवेक्तुका-
मः कालमुपेक्ष्यान्यान्येव पंचविंशति तत्वानि विविवेच॥ मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृति विकृतयः सप्त
॥ षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष इति॥ न चैतेष्वेव तत्वेषु कालस्यांतर्भावो मुनिनाविवक्षित इ- रा॰म॰
ति शंकनीयं॥ तदभिमतस्य कालस्य यथोक्तपंचविंशतितत्वानां च परस्परमत्यंतविलक्षणत्वात्॥ तथाहि॥ ६

CC-0. In Public Domain. Digitization by eGangotri

त्वदभिमतं काललक्षणं॥ तत्वानां त्वन्या दृशानि लक्षणा
चिरक्षिप्रादिव्यवहारस्यासाधारणो हेतुः काल इति॥ महदहंकारपंचतन्मात्राख्यानां सप्तानां प्रकृतिविकृती
नि॥ सत्वरजस्तमोगुणानां साम्यावस्था मूलप्रकृतिः॥ शब्दस्पर्शरूपरसगंधात्मकानि पंचतन्मात्रा
नां मध्ये ध्यवसायहेतुर्महत्तत्वं॥ अभिमानहेतुरहंकारः॥ ष्पोडशविकाराणां लक्षणानि प्रसिद्धानि अप्रकृतिरवि
णि पृथिव्यादिपंचमहाभूतानां एकादशेंद्रियाणां च षोडशविकाराणां लक्षणानि प्रसिद्धानि अप्रकृतिरवि
कृतिः पुरुषश्चिदात्मकः॥ नह्येवं लक्षणकेषु तत्वेषु कालस्यांतर्भावः संभाव्यते॥ नापि षड्विंशत्तत्वांतरं मु
निरनुमन्यते॥ कथं तर्हि मुनिप्रणीतानि तत्वानि आर्याभिः संगृण्हानः ईश्वरकृष्णो बहिःकरणांतःकरणे विविं
चन् कालं व्यवजहार॥ सांप्रतकालं बाह्यं त्रिकालमाभ्यंतरकरणमिति॥ परप्रसिद्ध्या परो बोधनीय इति न्याये
नायं व्यवहारो न तु स्वसिद्धांताभिप्रायेणेति वदामः॥ अत एवैतद्वचनं व्याचक्षाणा वाचस्पतिमिश्रास्त
कौमुद्यामेवमाहुः॥ कालस्तु वैशेषिकाभिमत एको तीतानागतादिभेदं प्रवर्तयितुमर्हति॥ तस्माद्यैर्यैरु
पाधिभेदैरतीतानागतादिभेदभावं प्रतिपद्यते॥ संतु त एवोपाधयो व्यवहारहेतवः कृतमंतर्गडुना कालेनेति

का·मा· सांख्याचार्याः॥तस्मान्नकालस्स्वतत्वांतराभ्युपगमइति॥अथोच्येतभूतकालोवर्त्तमानकालोभविष्यत्कालइति॥एवंत्रिष्व
७ पिभूतादिष्वनुगतःकालप्रत्ययएकमनुगतंकालतत्वमंतरेणानुपपन्नइति॥तन्न॥पदार्थप्रत्ययवदुपपत्तेः
॥यथाभवन्मतेद्रव्यपदार्थोगुणपदार्थइतिषट्सुभावेषुचतुर्ष्वभावेषुअपिअनुगतःपदार्थप्रत्ययएकमनु
गतंपदार्थशब्दवाच्यमंतरेणाप्युपपन्नः॥तथाकालप्रत्ययःकुतोनोपपद्यते॥तस्मान्निस्तत्वंकालंनिर्णेतुंम
हानयंउद्यमःप्रेक्षावच्छिरोमणेर्माधवाचार्यस्यनकथंचिदप्युपपन्नइत्येवंप्राप्तेब्रूमः॥आयुष्मतस्त्वेतस्यै
वंनिरूढकालतत्वेयःप्रद्वेषःसकस्यहेतोरितिवक्तव्यं॥किंकपिलमहामुनिनानिराकृतत्वात्किंवासांख्य
शास्त्रप्रणीतेषुतत्वेष्वसंगृहीतत्वात् उतलक्षणाभावात्॥आहोस्वित्प्रमाणाभावात्॥अथवाप्रयोजनाभा
वात्॥अथवानत्वगतपंचविंशतितत्वसंख्याभ्यासपाटवेनावसिताच्छुद्राजाड्यात्॥नप्रथमः॥कालनिरा
करणसूत्रस्यमुनिनाप्रणीतस्यानुपलंभात्॥नद्वितीयः॥अतिप्रसंगात्॥ऋग्वेदादिभक्तानांज्योतिष्टोमादी राम·
नांआयुर्वेदधनुर्वेदगांधर्वप्रोक्तानामौषधशास्त्रस्वरादीनांचासंगृहीतत्वेनतेष्वपिभवतःप्रद्वेषःकेनवार्यते ७

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ तेषांविशिष्यासंग्रहेपिसुखदुःखमोहात्मकत्वेनगुणत्रयांतर्भावात् अस्त्येवार्थात्संग्रह इत्युच्यते॥ त
र्हि कालस्याप्यसौनदंडवारित इतिबुद्धिंसमाधत्स्व॥ कालस्यगुणत्रयपरिणामत्वेसावयवत्वमनित्यत्वंघ
टादेरिवप्रसज्येतेतिचेत्॥ नित्यनिरवयवकालतत्वाभिनिवेशवतोवैशेषिकादेःपतत्वयंवज्रप्रहारःशिरसि
॥ वेदवादिनांतुनकापिक्षतिः॥ कालस्योत्पत्तिसावयवत्वयोः प्रत्यक्षश्रुतावुपलभ्यमानत्वात्॥ तैत्तिरीय
शाखायांनारायणीयेकालोत्पत्तिराम्नायते॥ सर्वेनिमेषाजज्ञिरेविद्युतःपुरुषादधि॥ कलामुहूर्ताःकाष्ठा
श्चाहोरात्राश्चसर्वशः॥ अर्धमासामासाऋतवःसंवत्सरश्चकल्पंतामिति॥ तस्यामेवशाखायामरुणके
तुकचयनब्राह्मणेसावयवत्वंश्रूयते॥ उक्तोवेषोवासांसि च कालावयवानामितः प्रतीच्यैष्विति॥ इतोस्मा
दनुवाकात्प्रतीच्येष्वधस्तनेषु अनुवाकेषुकालावयवानामृतूनांध्यातव्योवेषउक्तः॥ वस्त्राणि चोक्तानी-
त्यर्थः नित्यत्वनिरवयवत्वाभिधायिनोवैशेषिकादिशास्त्रस्यामृतादेवता इतिवदापेक्षिकनित्यतायामंत
र्ध्यानशक्त्युपेतयक्षराक्षसादिवत्संस्पर्शयोग्यावयवशून्यतायांचतात्पर्यंवर्णनीयं॥ एवंचसतिविरोधाधि

CC-0. In Public Domain. Digitization by eGangotri

का·मा· करणन्यायोत्रानुगृहीतो भवति॥ तस्य च न्यायस्य संग्राहकावेतौ श्लोकौ॥ औदुंबरीवेष्टितव्या सर्वेत्येषास्मृ
८ तिर्मितिः॥ अमितिर्वेति संदेहे मितिः स्यादष्टकादिवत्॥ औदुंबरीं स्पृशन्गायेदिति प्रत्यक्षवेदतः॥ विरोधा
न्मूलवेदस्यानुमानान्मानतेति॥ अयमर्थः॥ अध्वरे महावेद्यां सदो नामकस्य मंडपस्य मध्ये काचिदु
दुंबरशाखा स्तंभत्वेन निखाता भवति॥ तामुद्दिश्य वस्त्रवेष्टनं स्मर्यते॥ औदुंबरी सर्वा वेष्टयितव्येति॥ तत्र
संशयः॥ एषा स्मृतिः प्रमाणं न वेति॥ तत्र पूर्वाधिकरणे अष्टकाः कर्त्तव्याः इत्यस्याः स्मृतेर्मूलवेदानुमाप
कत्वेन प्रामाण्यमुक्तं॥ तेनैव न्यायेन सर्ववेष्टनस्मृतिः प्रमाणमिति पूर्वः पक्षः॥ औदुंबरीं स्पृष्ट्वोद्गायेदिति
प्रत्यक्षश्रुतौ स्पर्शो विधीयते॥ न चासौ सर्ववेष्टने सत्युपपद्यते॥ तथा च सर्ववेष्टनस्मृतिमूलभूतवेदानुमा
नस्य प्रत्यक्षश्रुतिविरुद्धस्य कालात्ययापदिष्टत्वेन निर्मूला वेष्टनस्मृतिरप्रमाणमिति सिद्धांत इति॥ अथ
मन्यसे॥ महता तपसा शिवमाराध्य तस्माद्लब्धसर्वज्ञत्वपदः कणादमहामुनिर्वेदतात्पर्यं सम्यग्वेत्तीति राम
वेदस्यैवमंदमतिप्रनीतादर्थाद्यांतरं नेतव्यमिति॥ एवमपि यस्य प्रसादादयं सर्वज्ञतामलभत स एव शि ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वो मुख्यः सर्वज्ञ इति तन्मतानुसारेण कणादमतस्यैवान्यथानयनमत्यंतमनुचितं ॥ शिवो हि सर्वैर्हि ह्यागमे
षु षट्त्रिंशत्तत्वानि निरूपयन् कालतत्वस्योत्पत्तिमंगीचकार ॥ निखिलशैवागमसारमार्याभिः संगृण्हानो
भोजराजः शुद्धानि पंच तत्वानि शिवशक्तिसदाशिवेश्वरविद्याख्यानि निर्दिश्येतराणि निर्दिशन्मायाकार्यो
क्तिपूर्वकमेव कालं निरदिक्षत् ॥ पुंसो जगतः कृतये मायातस्तत्वपंचकं भवति ॥ कालो नियतिश्च तथा कला
च विद्या च रागश्चेति ॥ तानि मायासहितान्येकादशतत्वानि सांख्यप्रसिद्धपंचविंशतितत्वानि चोद्दिश्य क्रमे
ण विवृण्वन्निदमाह ॥ नानाविधाशक्तिमयी साजनयति कालतत्वमेवादौ भाविभवद्भूतमयं कलयति जग
देषः कालो तइति ॥ तत्र टीकाकार इत्थं व्याचख्यौ ॥ नन्वेष कालो नैयायिकादिभिर्नित्योभ्युपगत अत आह
भाविभवद्भूतमयं इति भूतादिरूपेण त्रिविधत्वात् चेतनत्वे सत्यनेकत्वेनास्यानित्यत्वं सिद्धमिति भावः ॥
केन कार्येणास्य सिद्धिः अत आह ॥ कलयति जगदेष कालो त इति चिरक्षिप्रादिप्रत्ययद्वारोपाधिद्वारेण कल
यत्याक्षिपतीति अर्थ इति ॥ इत्थं प्रत्यक्षश्रुतिसहकृतैरागमैः कणादशास्त्रस्य बाधे सत्यप्युत्तरमीमांसागत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

 द्वितीयाध्यायप्रथमाधिकरणन्यायोनुगृह्यते॥ तस्यचन्यायसंग्राहकौश्लोकौ॥ सांख्यस्मृत्यास्तिसंकोचो
 नवावेदसमन्वये॥ धर्मेवेदःसावकाशःसंकोच्योनवकाशया॥ प्रत्यक्षश्रुतिमूलाभिर्मन्वादिस्मृतिभिःस्मृ
तिः॥ अमूलाकापिलीवाध्यानसंकोचोनयाततइति॥ अयमर्थः॥ ऋग्वेदादिभिरग्निहोत्रादिधर्मोब्रह्मणोजग
त्कर्तृत्वंचप्रतीयते॥ सांख्यस्मृत्यादिस्तुप्रधानस्यजगत्कारणत्वंप्रतिपादयतितत्रतयाचस्मृत्यावेदस्य
संकोचोस्तिनवेतिसंशयः॥ स्मृतेर्जगत्कारणत्वमंतरेणनिरवकाशत्वात्प्राबल्यं॥ वेदस्यतुधर्मेपिचरि
तार्थत्वाद्दौर्बल्यं॥ ततःस्मृत्यनुसारेणवेदःसंकुचितइतिपूर्वःपक्षः॥ प्रत्यक्षश्रुतिभिर्बह्वीभिरनुगृही
ताबह्व्योमन्वादिस्मृतयोब्रह्मणःकारणतामाचक्षते॥ सांख्यस्मृतिस्त्वेकामूलहीनाचेति दुर्बल
त्वात्सैवबाध्या॥ अतोनास्तिवेदस्यसंकोचइतिराद्धांतइति॥ अथतार्किकत्वाभिमानग्रहगृहीतःसन्
परवशएवंब्रूषे॥ भूतादीनामौपाधिकानांकालविशेषाणामेवोत्पत्तिर्नतुनिरुपाधिकस्यमुख्यकालस्येति
॥ तर्हिकपर्दकान्वेषणायप्रवृत्तश्चिंतामणिमलभतेत्यस्यवासिष्ठरामायणप्रोक्तस्याभाणकस्यत्वमेव

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयोभूः॥ यतः साधर्म्यवैधर्म्यज्ञानायद्रव्याण्यन्विछन् परब्रह्मतत्वमवागमः॥ व्यवहारहेतूनां भूतादि
कालविशेषाणां आधारः स्वयंव्यवहारातीतोनित्यो निरवयवो मुख्यः कालोयः सपरमात्मैव। तथा चश्वे-
ताश्वतरा आमनंति॥ कालकालोगुणीसर्वविद्यइति॥ आस्तां नित्यत्वानित्यत्वसावयवत्वनिरवयवत्वचिं-
ता॥ सर्वथाप्यस्ति सांख्यतत्वेप्वार्थिकः कालसंग्रहः॥ साक्षात्संग्रहाभावस्तुज्योतिष्टोमादिवत्संकृतिपु-
रुषविवेकानुपयोगादित्यवगंतव्यम्॥ तृतीयचतुर्थपक्षौतु भवतोवैशेषिकपरिचयगंधोपिनास्तीति प्रक-
टयतः वैशेषिकग्रंथेषु सर्वेष्वपि कालप्रकरणे तल्लक्षणस्य तत्साधकानुमानस्य च प्रपंचितत्वात्॥ प्रमाणां-
तराणि तु कालसाधकानि श्रुत्यैवोपन्यस्तानि॥ तथा च तैत्तिरीया अरुणकेतुके मंत्रमामनंति॥ स्मृतिः प्रत्य-
क्षमैतिह्यमनुमानश्चतुष्टयं॥ एतैरादित्यमंडलं सर्वैरेवविधास्यत इति॥ तत्र स्मृतिरत्र मेपश्रुतिमूलं मन्वा-
दिशास्त्रं॥ प्रत्यक्षं श्रोत्रग्राह्यो कृत्रिमो वेदाख्योक्षरराशिर्योगिप्रत्यक्षमोपनिषदाभिमतं साक्षिप्रत्यक्षं वा॥ ऐ-
तिह्यमितिहासपुराणादिकं॥ ज्योतिःशास्त्रस्याप्यत्रांतर्भावो द्रष्टव्यः॥ अनुमीयते स्वमूलभूतस्मृतिवा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

का·मा· क्यमनेनेत्यनुमानः शिष्टाचारः॥ तस्य च स्मृत्यनुमापकत्वमाचार्यैर्विस्पष्टमभिहितं॥ आचाराच्च स्मृतिं
१० ज्ञात्वा स्मृतेश्च श्रुतिकल्पनमिति॥ तदेवं स्मृत्यादीनां चतुष्टयं संपन्नं॥ एतैश्चतुर्भिः सर्वैरप्यादित्यमंडलं
प्रमीयत इति मंत्रस्यार्थः॥ ननु स्मृत्यादीनि मंडले साधकत्वेनात्रोपन्यस्तानि न तु कालसाधकत्वेनेति चेत्॥
मैवं॥ मंडलस्य सार्वजनीनप्रत्यक्षसिद्धत्वेन तत्र स्मृत्याद्यनुपयोगात्॥ कालविवक्षयैवात्र कालनिर्वाहके मं
डले तान्युपन्यस्तानि॥ तथा च मंडलद्वारा कालस्तैः प्रमीयते॥ कालविवक्षा चोत्तरमंत्रेष्वतिस्फुटा॥ तत्रानं
तरो मंत्र एवमाम्नायते॥ सूर्यो मरीचिमादत्ते सर्वस्माद्भुवनादधि॥ तस्याः पाकविशेषेण स्मृतं कालविशेष
णमिति॥ तस्यायमर्थः॥ भुवनगतं सर्वं भूतजालमधिकृत्य रसवीर्यविपाकादिभिस्तत्तदनुग्रहसमर्थं मरी
चिं सूर्यः स्वीकरोति॥ तत्कृतेन च भूतपाकविभेदेन निमेषादिपरार्द्धपर्यंतः कालविभेदोस्माभिरवगतो भव
तीति॥ कालप्रतिपादकानि च स्मृत्यादीन्युदाहरामः॥ तत्र मनुः॥ कालं कालविभक्तिंश्चेति सृष्टिप्रकरणे का राम
लं व्यवजहार॥ याज्ञवल्क्योपि॥ श्राद्धकालाः प्रकीर्त्तिता इति॥ एवमन्यास्वपि स्मृतिषूदाहार्यं श्रुतिष्वपि॥ १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतं यत्स्वघ्नीविचिनोति काले इति बह्वृचाः॥ अहमेव कालो नाहं कालस्येति तैत्तिरीयकाः॥ काच संध्याकश्च
संध्यायाः काल इति सामगाः॥ योगशास्त्रेपि संयमविशेषाद्धारणाध्यानसमाधित्रयरूपाद्योगिनोतीतादि
कालं प्रत्यक्षतः पश्यंतीत्यभिहितं॥ तथा च पातंजलसूत्रं॥ परिणामत्रयसंयमादतीतानागतादिज्ञानमिति॥
साक्षिप्रत्यक्षमपि॥ अहमस्मिन्काले निवसामीत्यनुभवस्तावत्सर्वजनीनः॥ न चासौ बाह्येंद्रियकृतः कालस्य
रूपादिहीनत्वात्॥ नापि मानसः॥ तार्किकैस्तदनंगीकारात्॥ नाप्यनुमानादिजन्यः॥ अपरोक्षप्रत्ययत्वा
त्॥ अतः सामग्र्यभावेपि अपरोक्षदर्शनात्साक्षिप्रत्यक्षमेतदित्यौपनिषदा मन्यंते॥ इतिहासेपि महाभारते
पठ्यते॥ प्रहरौ घटिकान्यूनौ प्रहरौ घटिकाधिकौ॥ स कालः कुतपो ज्ञेयः पितृणां दत्तमक्षयमिति॥ पुराणेपि
॥ अनादिरेष भगवान्कालोऽनंतोजरः पर इति॥ शिष्टाश्च पौर्णमासाख्ये काले अन्हि नैबुकसंज्ञकान्स्वस्वकु
लोचितान्देवताविशेषेभ्यः क्षीरदध्यादिसमर्पणादिकान् धर्मविशेषान् भानुवारादिकालविशेषे समाचरं
ति॥ तदेवमनेकप्रमाणप्रमिते काले प्रमाणाभावरूपश्चतुर्थपक्षः कथमाशंक्यते॥ नापि प्रयोजनाभावा

दिनिपंचमःपक्षोयुज्यते॥ तार्किकैस्तावत्सर्वोत्पत्तिमन्निमित्तकारणत्वमुद्घोषितं॥ लोकेचकृष्याद्युपयो
गः कालविशेषस्यकृषीवलादिभिर्व्यवह्रियते॥ ग्रहप्रवेशप्रयाणाद्युपयोगोपिज्योतिःशास्त्रप्रसिद्धः॥ श्रौ
तस्मार्त्तकर्मोपयोगस्तुप्रदर्शयिष्यते॥ तस्माच्छुद्धाजाड्यकृतस्तवप्रद्वेषइत्ययंषष्ठःपक्षःपरिशिष्यते॥ त
थाचपापात्मनस्तवबुध्यपराधंपुण्यात्मनिमाधवाचार्येसमारोपयन्कयावाशिक्षयानदंड्योसि॥ नदेवंकाल
स्यप्रत्याख्यातुमशक्यत्वात्तन्निर्णयोद्यमःसफलइतिसुस्थितं॥ ननुकतरःकालोत्रनिर्णीयते। किंकेवल
कालः॥ उतकालकालः॥ ननुकिमित्यप्रसिद्धयाभाषयाभीषयसिनभीषयाम्यहं॥ किंत्ववस्त्येवकल्पित
व्यभेदात्कालस्यद्वैविध्यं॥ येनप्राणिदेहादयोऽतीतवर्त्तमानादिरूपेणकल्पितव्याः सकेवलःकालः॥
सचतत्त्वप्रकाशवचनेनपूर्वमुदाहृतः कलयतिजगदेषकालोतइति॥ सचवासिष्ठरामायणेदर्शितः
कालोपिकल्प्यतेयेनेति॥ श्रुतिश्चभवति॥ सविश्वकृद्विश्वविदात्मयोनिर्ज्ञः कालकालोगुणीसर्वविधः
प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबंधहेतुरितिच॥ कूर्मपुराणेपि॥ अनादिरेषभगवान्का

CC-0. In Public Domain. Digitization by eGangotri

लोनंतोजरःपरः ॥ सर्वगत्वात्स्वतंत्रत्वात्सर्वात्मत्वान्महेश्वरः ॥ ब्रह्माणोबहवोरुद्रा अन्येनारायणादयः ॥ ए
कोहिभगवानीशः कालः कविरितिस्मृतः ॥ ब्रह्मनारायणेशानांत्रयाणांप्राकृतोलयः ॥ प्रोच्यतेकालयोगेनपु
नरेवचसंभवः ॥ परंब्रह्मचभूतानिवासुदेवोपिशंकरः ॥ कालेनैवचसृज्यंतेसएवग्रसतेपुनः ॥ तस्मात्काला
त्मकंविश्वंसएवपरमेश्वरइति ॥ विष्णुधर्मोत्तरेपि ॥ अनादिनिधनःकालोरुद्रःसंकर्षणःस्मृतः ॥ कलना
त्सर्वभूतानांसकालःपरिकीर्त्तितः ॥ कर्षणात्सर्वभूतानांसतुसंकर्षणःस्मृतः ॥ सर्वभूतशमित्वाच्चसरुद्रःपरिकी
र्तितः ॥ अनादिनिधनत्वेनसमहान्परमेश्वरइति ॥ ज्योतिःशास्त्रेपि ॥ भूतानामंतकृत्कालःकालोन्यकलनात्मकइ
ति ॥ तत्रैवंसतिद्वयोर्मध्येकालकालोत्रतावन्ननिर्णेतव्यः ॥ तस्यधर्मानुष्ठानेऽहेतुत्वात् ॥ अनुपादेयत्वाच्च ॥ यस्त्वितरो
मासपक्षतिथ्यादिरूपःसोपिज्योतिःशास्त्रएवसम्यक्निर्णीतइतिकृतमनयाकालनिर्णयप्रवृत्त्येतिप्राप्तेब्रूमः । उभय
मप्यत्रनिर्णेतव्यं ॥ कालकालस्यजगदीश्वरस्यसर्वेषुकर्मारंभेष्वनुस्मर्त्तव्यत्वात् ॥ अतएवशिष्टाःपुण्याहवाचनादौईश्व
रमनुस्मरंति । सर्वेषुकालेषुसमस्तदेशेष्वशेषकार्येषुतथेश्वरेश्वरः । सर्वैःस्वरूपैर्भगवाननादिमान्ममास्तुमांगल्यविवृद्धयेह

का·मा· रिः यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु॥ न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतमिति॥ मासादिरूप
१२ भेदस्य तु स्वरूपेण निर्णीतत्वेपि श्रौतस्मार्तकर्मविशेषेण सह कालस्यांगांगीभावो निर्णेतव्यः॥ यद्यप्यसौ
हेमाद्रिप्रभृतिषु ग्रंथेषु निर्णीतस्तथाप्यनेकत्र विप्रकीर्णस्यैकत्र संग्रहाय यत्नः क्रियते॥ तदेवं चिकीर्षितस्य का
लरूपो विषयः संग्रहरूपं प्रयोजनं चास्तीत्ययं ग्रंथ आरभ्यते॥ नित्यो जन्यश्च कालो द्वौ तयोराद्यः परेश्वरः॥
सो वाङ्मनसगम्योपि देही भक्तानुकंपयेति नित्यकालस्य परमेश्वरत्वेपि प्रमाणं पूर्वमेवोपन्यस्तं॥ परमे·
श्वरस्य चावाङ्मनसगोचरत्वे सर्वे वेदांतास्तदनुसारिस्मृतिपुराणानि तत्वविदनुभवश्च प्रमाणं॥ भक्तानु ५
ग्राहिमूर्तिस्वीकारश्च तलवकाराख्ये सामवेदशाखाविशेषे कस्यांचिदाख्यायिकायामाम्नायते॥ तस्यां त्वा
ख्यायिकायामेवमुक्तं॥ अग्निवाय्विंद्रादयो देवा ईश्वरानुगृहीताः सर्वत्र विजयमानाः स्वकीयमेवैतत्सामर्थ्य
मित्यभिमन्यंते॥ तान्बोधयितुमवाङ्मनसगम्यं परमेव ब्रह्म पूज्यां चक्षुर्गम्यां कांचिन्मूर्तिं धारयित्वा प्रादुर्बे राम
भूव॥ तया सह वादं कृत्वापि राजसचित्तावग्निवायू ब्रह्मतत्वं नैव बुबुधाते॥ इंद्रस्तु सात्विकचित्तो बुबुधे १२

CC-0. In Public Domain. Digitization by eGangotri

नि॥ वासिष्ठरामायणेपिशुक्रोपाख्याने॥ शुक्रंमृतमवलोक्यतत्पिताभृगुः क्रुद्धोमारयितारंकालंशप्तुमु
द्यतः॥ तदानींकालोनुग्रहीतुमीदृशेनरूपेणाविर्बभूवेतिपठ्यते॥ अथाकलितरूपोसौकालःकवलितप्र
जः॥ आदिभौतिकमास्थायवपुर्मुनिमुपाययौ॥ खड्गपाशधरःश्रीमान्कुंडलीकवचान्वितः॥ ऋतुषट्क
मयोदारवक्त्रषट्कसमाहितः॥ मासद्वादशकोद्दामभुजद्वादशकोद्भटः॥ स्वाकारसमयावद्ध्याहृतःकिंक
रसेनया॥ सउपेत्यप्रणम्यादौकुपितंतुमहामुनिं॥ कल्पक्षुब्धाब्धिगंभीरंसांत्वपूर्वमुवाचह॥ त्वमत्यं
ततपाविप्रवयंनियतिपालकाः॥ तेनसंपूज्यसेपूज्यसाधोनेतरयेच्छया॥ मातपःक्षपयानत्वंकल्पकालम
हानलैः॥ योनदग्धोस्मितेतस्यकिंत्वंशापेनधक्ष्यसि॥ संसारावलयोग्रस्तानिगीर्णारुद्रकोटयः॥ भुक्तानि
विष्णुवृंदानिकेनशक्तावयंमुने॥ भोक्तारोहिवयंब्रह्मन्भोजनंयुष्मदादयः॥ स्वयंनियतिरेषाहिनाव
योरेतदीहितमिति॥ नचभक्तानुजिघृक्षयास्वीकृतामूर्त्तिरीदृश्येवेतिकश्चिन्नियमोस्ति॥ सर्वात्मकस्य
परमेश्वरस्यभक्तचित्तप्रियायाः सर्वस्याअपिमूर्त्तेःस्वकीयत्वात्॥ अतएवभगवद्गीतायां॥ योयोयांयां

Nepal Sanskrit University, Dang... Kathmandu

का॰मा॰ तनुंभक्तः श्रद्धयार्चितुमिच्छति॥ तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहं॥ स तया श्रद्धया युक्तस्तस्या
१३ राधनमीहते॥ लभते च ततः कामान्मयैव विहितान्हितानिति॥ विष्णुरुद्रादिचेतनमूर्त्तिवदचेतनमूर्त्त
योपि तत्तत्फलविशेषार्थिभिरीश्वरत्वेनोपास्याः॥ तदेतदृग्वेदे समाम्नायते॥ एवंत्येव बह्वृचा महत्युक्
थे मीमांसंत एतमग्नावध्वर्यव एतं महाव्रते छंदोगा एतमस्यामेतं दिव्येतं वायावेतमाकाश एतमप्स्वेत
मोषधीष्वेतं वनस्पतीष्वेतं चंद्रमस्येतं नक्षत्रेष्वेतं सर्वेषु भूतेष्विति॥ वाजसनेयिनोपि मंडलब्राह्मणे त
मेतमग्निमित्यध्वर्यव उपासत इत्यारभ्य पठंति विषमिति सर्पाः॥ सर्प इति सर्पविदः ऊर्गिति देवा रयिरिति
मनुष्याः मायेत्यसुराः॥ स्वधेति पितरो देवयजन इति देवयजनविदो रूपमिति गंधर्वा गंध इत्यप्सरस॰
स्तं यथा यथोपासते तदेव भवतीति॥ तैत्तरीयाश्च पठंति क्षेम इति वाचि योगक्षेम इति प्राणापानयोरित्या॰
दि परब्रह्मारोपितं यद्यावज्जगद्रूपमस्ति तेन सर्वेणाप्युपासनाय परमेश्वरो रूपवान्भवतीति हिरण्मया राम॰
धिकरणमनोमयाधिकरणयोः प्रपंचितं॥ एवं च सति यो यदा यत्कर्मारभते स तदा तत्कर्मोपयुक्तां का ला॰ १३

CC-0. In Public Domain. Digitization by eGangotri

त्मकस्येश्वरस्यमूर्त्तिमिष्टदेवतारूपेणानुस्मरेत्॥ अतएवमंत्रशास्त्रेषुनानाविधानिध्यानान्युपदिष्टानि
लोकेप्याविद्वद्गोपालंसर्वेपिजनाएकैकांदेवतांस्वेच्छयापूजयंति॥ तदेतद्भगवानाह॥ यजंतेसात्वि-
कादेवान्यक्षरक्षांसिराजसाः। प्रेतान्भूतगणांश्चान्येयजंतेतामसाजनाः॥ तस्मादारभ्यमाणकर्मफलप्र
दोनिजेष्टदेवतारूपोनित्यकालः कर्मारंभेप्यनुस्मर्त्तव्य इतिसिद्धं॥ अथजन्यकालंनिरूपयामः॥ ननुका
लस्यजन्यत्वेसतिकथंप्रलयेकालव्यवहारः॥ प्रलयःकालःप्रलयोतीतः प्रलयोभावीति॥ कालनित्य
त्ववादिनस्तवापिसमोदोषःनित्यस्यकालस्यतपनपरिस्पंदाद्युपाधिभिःपरिच्छेदसत्येतावान्कालइ
तिकालेयत्तावर्णयितव्या॥ नचप्रलयेतदुपाधयःसंति॥ अतस्तवकथंप्रलयकालेइयत्तानिर्णयः॥ अ-
थसत्कार्यवादाभ्युपगमेनोपाधयोपिवासनारूपेणसंतितर्हिकालेपितत्समानं॥ नचैतावतानित्यत्वप्रा
प्तिः॥ उपाधिषुनदनंगीकारात्॥ अथमन्यसेइयत्तारहितेपिप्रलयकालेसृष्टिकालेयत्तावासनावशा-
दियत्ताव्यवह्रियते॥ तत्रोपाध्यायत्वादिदृष्टांतः॥ यथाकश्चिन्माणवकस्त्रिंशद्वर्षवयस्कादध्येतुमुप

का·मा
१४

कम्यसंवत्सरमधीत्यास्मदुपाध्यायएकत्रिंशद्वर्षवयस्कइत्यध्ययनरहितेष्वतीतेवयस्युपाध्यायत्वं
व्यवहरतितद्वदियत्ताव्यवहारः॥ एवंतर्ह्यनेनन्यायेनकालरहितेप्रलयेकालव्यवहारःकिंनस्यात्॥
कालरहितंचप्रलयादिकंवस्त्वस्तीतिमंडूक्यादिश्रुतयोभ्युपगच्छंति॥ तथाचश्रूयते॥ यच्चान्यत्त्रि-
कालातीतंतदप्योंकारएवेति॥ प्रभाकरास्त्वे॥ अपूर्वस्यकालत्रयासंस्पृष्टांकांचिदवस्थामाहुः॥ तस्मा
त्कालःसुखेनजन्यतां॥ सचसामान्यविशेषाभ्यांद्विविधः तस्यचोभयस्यैश्वराख्यान्नित्यात्कालादुत्प
त्तिंमनुराह॥ कालंकालविभक्तिंचनक्षत्राणिग्रहांस्तथा॥ सृष्टिंससर्जचैवेमांस्रष्टुमिच्छन्निमाःप्रजाइ
तितत्रयःसामान्यकालःसविशेषानुगतत्वात्तदपेक्षयानित्योग्रहगत्यादिभिरनुमेयोभूतोत्पत्तिनिमित्त
कारणमितितार्किकज्योतिषिकादयःप्रतिपेदिरे॥ तत्रज्यौतिषाआहुः॥ प्रभवविरतिमध्यज्ञानवंध्यानितांतं
विदितपरमतत्त्वायत्रतेयोगिनोपि॥ तमहमिहनिमित्तंविश्वजन्मात्ययानामनुमितमपिवंदेभग्रहैः राम
कालमीशं॥ युगवर्षमासदिवसाःसमंप्रवृत्तास्तुचैत्रशुक्लादेः॥ कालोयमनाद्यंतोग्रहभैरनुमीयतेक्षेत्रइति १४

CC-0. In Public Domain. Digitization by eGangotri

॥कालविशेषेषुचसंवत्सरःप्रधानभूतः॥अन्येतुसर्वेगुणभूताः॥तथाचारुणकेतुकेसमाम्नायते॥नदीच
प्रभवा काचिद्क्षयास्यंदतेयथा॥ तांनद्योभिसमायंतिसोरुः सतीननिवर्त्तते॥एवंनानासमुत्थानाःका ऽ
लाः संवत्सरंश्रिताः॥अणुशश्चमहशश्चसर्वेसमवयंतितं॥सतैःसर्वैःसमाविष्टउरुःसन्ननिवर्त्ततइति
॥अयमर्थः॥ भागीरथीगोदावर्यादिकानदीवायंकालः॥कुतश्चित्उत्पत्तिस्थानादुत्पद्यते॥तच्चोत्पत्ति ऽ
स्थानंसांख्योक्तप्रकृतिर्वाशैवागमोक्तमायावाश्रुतिस्मृत्युदितनित्यकालात्मकईश्वरोवा भविष्यति
॥यथातांगंगादिकांनदीमन्याअल्पनद्यो अभितःप्रविशंति ॥साचप्रविष्टैर्नद्यंतरैः सहविस्तीर्णप्रवहत्स
वाहासतीनकदाचिच्छुष्यति॥एवंनानाविधरूपैःसमुत्पन्नाः कालभेदाःसंवत्सराख्यंप्रधानंकालमा
श्रिताः॥ तत्रनिमेषाद्याअयनपर्यंताः कालभेदाःसंवत्सरादणवः॥युगाद्याःपरार्द्धपर्यंताःसंवत्सरान्म
हांतस्तेसर्वेतंसंवत्सरंसम्यक्प्रविशंति॥अणूनामवयवत्वेनप्रवेशः॥महतांतुसंवत्सरावृत्तिनिष्पा
द्यानामध्यस्तः संवत्सरइतितत्रप्रवेशोभिधीयते॥तथाचवेदांगेज्योतिषग्रंथेपठ्यते॥पंचसंवत्सरमयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सुगाध्यसंप्रजापतिं॥ दिनर्त्वयनमासांगंप्रणम्य शिरसाश्रुचिरिति॥ सचसंवत्सरस्तैरणुभिर्महद्भिश्च स
वैः समाविष्टो तिदीर्घः सन्नस्मिन्जगति नोछिद्यत इति॥ नन्वल्पत्वंनिमिषेपर्यवसितं महत्त्वंतुपरार्द्धे॥ त
थाचतयोरन्यतरस्यप्राधान्यमुचितं॥ तत्रकथंसंवत्सरस्य प्राधान्यमिति चेत्॥ ईश्वरेणप्रथमंसृष्टत्वा
दितिब्रूमः॥ तथाचवाजसनेयिनः समामनंति सोकामयत द्वितीयोमे आत्माजायेतेति समनसावाचामिथु
नंसमभवत् तद्यद्रेत आसीत्संवत्सरो भवदिति॥ तस्मात्संवत्सरंप्रधानं॥ अतएववयंसंवत्सरमारभ्यका
लविशेषंनिर्णयामः॥ तत्रसंवत्सरः॥ अयनमृतुर्मासः पक्षस्तिथिर्नक्षत्र– मित्येवंविधाः कर्मकालाः॥
यद्यपि पुराणेषुमत्स्यमार्कंडेयादीनांयुगादिआकल्पादिपरिमितंनपःस्मर्यते॥ तथापिशतसंवत्सरायु
षोमनुष्यानधिकृत्यधर्मशास्त्रप्रवृत्ते र्नयुगादिनिर्णयोत्रोपयुक्तः॥ मनुष्याधिकारत्वंचास्माभिःपराशर
स्मृतिव्याख्यानेमनुष्याणां स्मृतेधर्मेमित्यस्मिन् वचनेप्रपंचितं॥ येतुकलौपंचविवर्जयेदित्यादयोमनु
ष्यधर्मास्तेष्वपिनयुगादिकंनिर्णेतव्यं॥ संदेहाभावात्॥ ननुशतायुषामधिकारेकथंसहस्रसंवत्सरसत्र

CC-0. In Public Domain. Digitization by eGangotri

क्तिरितिशंकनीयं॥ तत्रसंवत्सरशब्दोदिवसपर इति षष्ठाध्यायसप्तमपादे निर्णीतत्वात्॥ येच संवत्सरावृ
त्तिसाध्या अनंतव्रतादयस्तेष्वपि नसंवत्सराधिकः कश्चित्कालोनिर्णेतव्योस्ति अतःसंवत्सरमारभ्या
र्वाचएवनिर्णेतव्याः कर्मांगकालाः॥ नचकालस्यकर्मांगत्वेविवदितव्यं॥ सायंजुहोतिप्रातर्जुहोतीति वाक्या
दंगत्वप्रतीतेः तत्रकर्मणस्तावदपूर्वविषयत्वात् प्राधान्यमभ्युपगंतव्यं॥ तथाचकालस्य गुणत्वेनान्वयःप
रिशिष्यते॥ अतएवगर्गः॥ तिथिनक्षत्रवारादिसाधनंपुण्यपापयोः॥ प्रधानगुणभावेनस्वातंत्र्येणनतेसम
मा इति॥ तस्मादंगभूतेषुनिर्णयेषुकालेष्ववयवित्वेनसंवत्सरस्याभ्यर्हितत्वात् अल्पवक्तव्यतयासूची
कटाहन्यायानुसाराच्चसएवादौ निर्णीयत इति स्थितम्॥ ॥ इतिमाधवीयेप्रकरणेउपोद्घातप्रकरणं
॥ ॥संवत्सरोनामायनाद्यवयवयुक्तोवयवीकालविशेषः॥ सम्यक् वसंत्यस्मिन्नयनर्तुमासादय इ
तिव्युत्पत्तेः॥ सच द्वादशमासात्मकः॥ द्वादशमासाः संवत्सर इतिश्रुतेः॥ मासानांतुचांद्रसावनसौरा
ख्येनदिवसभेदेन चांद्रादित्रैविध्यंवक्ष्यते॥ मासत्रैविध्येनसंवत्सरस्त्रिविधः॥ तदुक्तंब्रह्मसिद्धांते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

का॰मा॰ ॥ चांद्रसावनसौराणां मासानां तु प्रभेदतः ॥ चांद्रसावनसौराः स्युस्त्रयः संवत्सरा अमीति ॥ तत्र चांद्रः संव-
१६ त्सरः चैत्रशुक्लप्रतिपदादिः फाल्गुनदर्शांतः ॥ सौरस्तु मेषादिमीनांतः सावनः षष्ट्युत्तरशतत्रयाहोरात्रा-
त्मकः ॥ ते च त्रयः संवत्सराः केषुचित्कर्तव्येषु व्यवतिष्ठंते केषुचिच्च विकल्प्यंते ॥ तथा च भविष्योत्तरपु-
राणे संवत्सरसाध्यं तिलकव्रतं प्रपठ्यते ॥ वसंते किंशुकाशोकशोभिते प्रतिपत्तिथिः ॥ शुक्ला तस्यां प्रकुर्वीत
स्नानं नियममास्थितः ॥ ललाटपट्टे तिलकं कुर्याच्चंदनपंकजं ॥ ततः प्रभृत्यनुदिनं तिलकालंकृतं मुखं ॥ धा-
र्यं संवत्सरं यावच्छशिनेव नभस्तलमिति ॥ तत्र संवत्सरश्चांद्रो वगंतव्यः ॥ शुक्लपक्षप्रतिपत्तिथ्यास्तल्लिंग-
त्वात् ॥ नहि शुक्लकृष्णपक्षौ प्रतिपदादितिथयश्च सौरसावनोपजीवनेन प्रवृत्ताः ॥ यत्तु नववर्षाणि पंचचै॰
त्यादिसंवत्सरस्यानंतव्रताद्यंगत्वं स्मर्यते तत्रापि चांद्र एव संवत्सरः ॥ शुक्लपक्षे च चतुर्दश्यामित्यादि॰
लिंगात् ॥ न च चैत्रप्रतिपदि तदुपक्रमाभावादचांद्रत्वं शंकनीयं ॥ तदुपक्रमस्य संवत्सरस्य स्वरूपापेक्षत्वा- राम
त् ॥ अत एव ब्रह्मपुराणेभिहितं ॥ चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेहनि ॥ शुक्लपक्षे समग्रं तत्तदा सूर्योद- १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येसति॥प्रवर्त्तयामासनदाकालस्यगणनामपि॥ग्रहान्नागानृतून्मासान्वत्सरान्वत्सराधिपानिति॥
चांद्रसौरसावनशब्देषुतुप्रवृत्तिनिमित्तान्युच्यंते॥चंद्रकलावृद्धिक्षयप्रयुक्तप्रतिपदादितिथीनांषष्ट्य
धिकशतत्रयेणनिष्पन्नोयः सचांद्रः॥द्वादशराशिषुसूर्यसंक्रमणैर्निष्पन्नोयः ससौरः॥सावनशब्दोहो
रात्रोपलक्षकः॥सोमयागेसवनत्रयस्याहोरात्रसंपाद्यत्वात्॥तेश्चसावनैःषष्ट्यधिकशतत्रयसंख्याकै
र्निष्पन्नोयःससावनः॥एवंसतिवर्त्तमानभाद्रशुक्लचतुर्दशीमारभ्यआगामिभाद्रशुक्लचतुर्दश्याः प्रा
चीनेतिथिसमुदायेचांद्रसंवत्सरत्वमविरुद्धं॥यच्चनिरूढपशुबंधप्रकरणेश्रूयते॥तेनसंवत्सरेसंव
त्सरेयजेतेतिपशुनासंवत्सरोनातीयादितिचतत्रापिचांद्रएवद्रष्टव्यः॥सर्वान्लोकान्पशुबंधया
ज्यभिजयति॥तेनयक्ष्यमाणोमावास्यायांपौर्णमास्यांवेतिकल्पसूत्रकारैश्चांद्रतिथौतदनुष्ठानविधा
नात्॥सौरस्तुसंवत्सरःसुजन्मावाप्तिव्रतादावुपयुज्यते॥तच्चव्रतंविष्णुधर्मोत्तरेस्मर्यते॥भगवन्क
र्मणाकेनतिर्यग्योनौनजायते॥म्लेच्छदेशेचपुरुषस्तन्ममाचक्ष्वभोमुने॥मार्कंडेयउवाच॥मेषसंक्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मणे भानोः सोपवासो नरोत्तम॥ पूजयेद्भार्गवं देवं रामं शक्त्या यथाविधीत्यारभ्य मीनसंक्रमणे मत्स्यं वा
सुदेवं च पूजयेदित्यंतेन ग्रंथेन व्रतं विधायांते तदुपसंत्हृतं॥ कृत्वा व्रतं वत्सरमेतदिष्टं म्लेच्छेषु तिर्यक्षु न चा
पि जन्मेति॥ तथा स्कंदपुराणे॥ धान्यदानव्रतं पठ्यते॥ अथातः संप्रवक्ष्यामि धान्यव्रतमनुत्तमं॥ अयनेवि-
षुवे चैव स्नानं कृत्वा विचक्षण इत्यारभ्य व्रतं विधायैवमुपसंत्हृतं॥ एवं संवत्सरे पूर्णे कुर्यादुद्यापनक्रि-
यामिति॥ सावनस्य सत्रादावुपयोगः॥ तदप्युक्तं विष्णुधर्मोत्तरे॥ सत्राण्युपास्यान्यथ सावनेन लोकस्य च
यत्स्याद्व्यवहारकर्मेति॥ गोसत्रं वै संवत्सरो य एवं विद्वान्सः संवत्सरमुपयंति ऋध्नुवंत्येवेति श्रुतौ गवामय
नस्य सत्रस्य संवत्सरनाम्ना व्यवहारात्संवत्सरकालस्तदंगमिति प्रतीयते॥ तत्र सावनो ग्रहीतव्यः॥
चांद्रसौरयोर्मानयोस्तदनुष्ठानासंभवात्॥ तथाहि॥ अहोरात्रसाध्य एकः सोमयागो वेदेष्वहःशब्देनाभि
धीयते तादृशानामहर्विशेषाणां गणः षडहः सच्चद्विविधः अभिप्लवः पृष्ठ्यश्चेति॥ तत्र चत्वारोभिप्लवाः षड
हाः एकपृष्ठ्यः षडह इति षडहपंचकेन एको मासः संपद्यते॥ तादृशैर्द्वादशभिर्मासैः साध्यं संवत्सरसत्रं॥ तथा

CC-0. In Public Domain. Digitization by eGangotri

चसावनेनैवतत्सिद्धेः॥ चांद्रस्य षड्भिरहोरात्रैर्न्यूनत्वात्सौरस्य सपादैः पंचभिरहोरात्रैरधिकत्वात्॥ न
नु संवत्सराय दीक्षिष्यमाणा एकाष्टकायां दीक्षेरन्निति माघमासगतायामष्टम्यां चांद्रतिथौ सत्रायदी
क्षा श्रूयते॥ ततश्चांद्रेणैव संवत्सरेण भवितव्य॥ मैवं॥ उक्तस्य दीक्षाकालस्य पूर्वपक्षरूपत्वात्॥ तन्नि
राकरणं हि श्रूयते॥ आर्त्तं वा एते संवत्सरस्याभिदीक्षंते य एकाष्टकायां दीक्षंते व्यस्तं वा एते संवत्सरस्या
भिदीक्षंते य एकाष्टकायां दीक्षंत इति॥ ननु पक्षांतरमपि चांद्रतिथिमेवोपजीव्य श्रूयते॥ फल्गुनीपूर्ण
मासे दीक्षेरन्मुखं वा एतत्संवत्सरस्य यत्फल्गुनीपूर्णमास इति न॥ तस्यापि निराकृतत्वात्॥ तस्यैके
व निर्यैति हि निराकृतं॥ एकैव निर्या॥ एकस्य व दोष इत्यर्थः॥ ननु सिद्धांतेप्येवं श्रूयते॥ चित्रापूर्णमासे दीक्षे
रन् मुखं वा एतत्संवत्सरस्य यच्चित्रापूर्णमासो मुख्यत एव संवत्सरमारभ्य दीक्षते तस्य न काचन निर्या
भवति चतुरहे पुरस्तात्पौर्णमासे दीक्षेरन् तेषामेकाष्टकायां क्रयः संपद्यत इति॥ बाढं॥ अस्त्वेव मंगभूते
दीक्षोपक्रमे चांद्रतिथ्युपजीवनं तथापि प्रधानकर्मणि सावनग्रहे को बाधः॥ नन्वस्ति बाधः॥ तेषां पूर्वपक्षे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

 सुत्यासंपद्यतइतिसुत्याख्येप्रधानकर्मणिचांद्रस्यशुक्लपक्षस्योपजीवनात्॥ उपजीव्यतांनामशुक्लपक्षः
 ॥तथापियथोक्तप्रकारेणकृत्स्नस्यप्रधानकर्मणः सावनमंतरेणानिर्वाहात्सएवात्रगृह्यते॥ अयमेवः
न्यायउत्सर्गिणामयनेकुंडपायिनामयनेतुरायणादौचयोजनीयः॥ तेषांगोसत्रविकृतित्वात्॥ यत्रतु
चांद्रादिनियामकंनास्तितत्रैच्छिकोविकल्पः॥ तथाहि॥ पिप्पलादशाखायामथर्वणिकभारद्वाजादीनां
षण्मुनीनांविद्याधिकारसिद्ध्यैगुरुणापिप्पलादेनादिष्टंसंवत्सरंवासमामनंति॥ भूयएव——तपसाब्र
ह्मचर्येणश्रद्धयावा॥ संवत्सरंवत्स्यथयथाकामंप्रश्नान्पृच्छतेति॥ बह्वृचास्त्वेतमेवार्थंअतिरेकमुखे
नामनंति॥ ताएताःसंहितानानंतेवासिनेप्रब्रूयान्नासंवत्सरवासिनइति॥ तैत्तिरीयाश्चारुण केतुकम
ग्निंचेष्यमाणस्यादौत्रिषवणस्नानादिरूपंव्रतमामनंति॥ संवत्सरमेतद्व्रतंचरेदिति॥ एवंविधेषुप्रदेशे
षुनियामकाभावाच्चांद्रादीनामब्दानामन्यतमइच्छयागृहीतव्यः॥ ननुसंवत्सरस्यचांद्रसौरसावनभे
देनत्रैविध्यमेवांगीकृत्यतत्स्वरूपविनियोगावुक्तौ॥ तत्रैवंत्रैविध्यनियमोनयुक्तः॥ अन्ययोरपिनाक्षत्र

CC-0. In Public Domain. Digitization by eGangotri

बार्हस्पत्ययोर्द्विविधयोः संवत्सरयोर्विद्यमानत्वात्॥ तथात्यायुर्वेदविदः पठंति॥ सौरबृहस्पतिसावनचां
द्रिकनाक्षत्रिकाः क्रमेणस्युः॥ मातुलपातालातुलविमलवरांगाणिवत्सराः पंचेति॥ अस्यायमर्थः॥ गण
कप्रसिद्धयाक्षरसंख्ययामातुलशब्दः पंचषष्ट्यधिकशतत्रयमाचष्टे॥ तावद्दिवसपरिमितः सौरसंवत्स
रः पातालशब्द एकषष्ट्यधिकशतत्रयमाचष्टे॥ तावद्दिवसपरिमितो बार्हस्पत्यसंवत्सरः॥ अतुलशब्दः
षष्ट्यधिकशतत्रयमाचष्टे॥ तावद्दिवसपरिमितः सावनः संवत्सरः॥ विमलशब्दश्चतुःपंचाशदधिकश
तत्रयमाचष्टे॥ तावद्दिवसपरितश्चांद्रः संवत्सरः॥ वरांगशब्दश्चतुर्विंशत्यधिकशतत्रयमाह॥ तावद्दिवस
परिमितो नाक्षत्रकः संवत्सर इति॥ एवं तर्ह्यस्तु संवत्सरः पंचविधः॥ तत्र नाक्षत्रिकस्यज्योतिःशास्त्रप्र
सिद्धे आयुर्दायादावुपयोगो द्रष्टव्यः॥ बार्हस्पत्यस्तु सिंहस्थबृहस्पत्यादिविशेषमुपजीव्य गोदावर्यादि
स्नानादौ विनियुक्तः॥ अनेन बार्हस्पत्यमानेन कदाचिदधिसंवत्सरोपि निष्पद्यते॥ तदुक्तमुत्तरसौरे॥ गुरो
र्मध्यमसंक्रांतिहीनो यश्चांद्रवत्सरः॥ अधिसंवत्सरस्तस्मिन् कारयेन्न सवत्रयं॥ वर्ज्जनीयाःप्रयत्नेनप्रति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ष्ठासर्वेनाकिनां॥ स्फुटसंक्रांतिहीनश्चेत्केप्याहुरधिमासवदिति॥ मध्यमगणनायागुरोः संक्रांतिर्यस्मिं

श्चांद्रवत्सरे न विद्यते सोयमधिवत्सरः॥ तत्र बृहस्पतिसवादिकं न कार्यं॥ स्फुटगणनया बृहस्पति सं
क्रांतिरहितो यश्चांद्रो वत्सरस्तस्मिन्नधिमासवत्काम्यादिकं वर्ज्यमिति केचिन्महर्षयो मन्यंन्ते॥ अथ
चांद्रस्यावांतरभेदा उच्यंते॥ संवत्सरः परिवत्सरः इदावत्सरोनुवत्सरइद्वत्सरश्चेत्येते पंच भेदाः॥ तदेतत्सा
मान्याकारेण संवत्सरादिपंचविधत्वं सावित्रचयनगताग्निप्रशंसकमंत्रे पठ्यते॥ संवत्सरोसि परिवत्सरो
सि इदावत्सरोसि इद्वत्सरोसि इदुवत्सरोसि इति॥ इदुवत्सरोनुवत्सर इत्यर्थः॥ अत एव चातुर्मास्यब्रा
ह्मणे तदधिष्ठानदेवतारूपत्वेनैवं श्रूयते॥ अग्निर्वावसंवत्सरः॥ आदित्यः परिवत्सरः चंद्रमा इदावत्सरः
वायुरनुवत्सर महेश्वर इद्वत्सर इति॥ ब्रह्मवैवर्त्तेपि॥ संवत्सरस्तु प्रथमो द्वितीयः परिवत्सरः॥ इदा
वत्सरस्तृतीयश्च तुर्थश्चानुवत्सरः॥ इद्वत्सरः पंचमस्तु तत्संघो युगसंज्ञक इति॥ तेषां पंचानां विनियो
गो विष्णुधर्मोत्तरे पठ्यते॥ संवत्सरे तु दातॄणां तिलदानं महाफलं॥ परिपूर्वे तथा दानं यवानां द्विजसत्तम॥

CC-0. In Public Domain. Digitization by eGangotri

इडापूर्वे च वस्त्राणां धान्यानां चानुपूर्वके ॥ इत्पूर्वे रजतस्यापि दानं चोक्तं महाफलमिति ॥ तथा तदधिष्ठा
तृदेवतापूजारूपो व्रतविशेषः पठ्यते ॥ संवत्सरः स्मृतो वह्निस्तथार्कः परिवत्सरः ॥ इडापूर्वस्तथा सोमोऽ
नुपूर्वः प्रजापतिः ॥ इत्पूर्वश्च तथा प्रोक्तो देवदेवो महेश्वरः ॥ तेषां मंडलविन्यासः प्राग्वदेव विधीयते ॥ प्रा
ग्वत्स्यात्पूजनं कार्यं होमः कार्यो यथाविधीति ॥ प्रभवमारभ्य षष्ट्यां तेषु षष्टिवर्षेषु द्वादश पंचकानि ॥ तत्रैकै
कस्मिन्वर्षपंचके एकैकक्रमेण संवत्सरादयो भवंति ॥ तदेतत्सर्वं ज्योतिःशास्त्रादवगंतव्यं ॥ इति संवत्स
रनिर्णयः ॥ अथायनं ॥ अयते यात्यनेन ऋतुत्रयेण सूर्यो दक्षिणाशामुत्तराशां चेति ऋतुत्रयमयनं ॥ तथा
च वाजसनेयिनः ॥ पंचाग्निविद्यायां दक्षिणोत्तरमार्गयोः समामनंति ॥ यान्षण्मासान्दक्षिणादित्य एति ।
यान्षण्मासानुदङ्ङादित्य एतीति ॥ तथा छंदोगा अप्यधीयते ॥ यान्षड् दक्षिणेति मासांस्तान्यान्षड् उद
गेति मासांस्तानिति ॥ तैत्तिरीया ऋ तु ग्रह ब्राह्मणे पठंति ॥ तस्मादादित्यः षण्मासान्दक्षिणेनैति षडुत्तरे
णेति ॥ एवं चादित्यगतिमुपजीव्यायननिष्पत्तेः सौरमेवैतत् ॥ अत एव विष्णुधर्मोत्तरे सौरमानमधि

 कृत्योक्तं ॥ ऋतुत्रयं चायनं स्यादिति ॥ केचित्तु चांद्रमानेनायनद्वयमभ्युपगच्छंति ॥ मार्गमासादिकैस्त्रि
 भिर्ऋतुभिः कल्पितः कालः षण्मासात्मकमुत्तरायणं ॥ ज्येष्ठमासादिकैर्दक्षिणायनमिति ॥ तत्रप्रमाणं
ज्योतिः शास्त्रादौ मृग्यं ॥ श्रौतस्मार्त्तकर्मानुष्ठाने तु मकरकर्कटसंक्रांत्यादिकएवायनद्वयकाल इति
तथोक्तश्रुतिस्मृतिभ्यामवगंतव्यं ॥ उत्तरायणस्य यागकर्मांगत्वं काण्वा अधीयते ॥ उदगयने आपू
र्यमाणपक्षस्य पुण्याहे द्वादशाहमुपसद्व्रती भूत्वेत्यादि ॥ चौलादीनामुत्तरायणकर्त्तव्यता गृह्यस्मृतिषु
प्रसिद्धा ॥ सत्यव्रतश्च देवताप्रतिष्ठादीनामुत्तरायणदक्षिणायनयोर्विधिनिषेधावाह ॥ देवतारामवाप्या
दिप्रतिष्ठोदङ्मुखे रवौ ॥ दक्षिणाशामुखे कुर्वन्न तत्फलमवाप्नुयादिति ॥ उग्रदेवतानां प्रतिष्ठा दक्षिणायने
कर्त्तव्या ॥ तथा च वैखानससंहितायामभिहितं ॥ मातृभैरववाराहनारसिंहत्रिविक्रमाः ॥ महिषासुरहंत्री
च स्थाप्या वै दक्षिणायन इति ॥ एवं विष्णुधर्मोत्तराभिहितानि पदद्वयव्रतान्ययनकर्त्तव्यान्युदाहार्य्याणि ॥
इत्ययननिर्णयः ॥ ॥ अथर्त्तवः ॥ ऋतुशब्द ऋगतावित्यस्माद्धातोर्निष्पन्नः ॥ इयर्त्ति गच्छति अशोकपुष्पविका

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सादिअसाधारणलिंगमितिवसंतादिकालविशेषऋतुः॥सचषड्विधः॥षड्वाऋतवइतिश्रुतेः॥ यत्तुद्वादश
मासाःपंचर्त्तवइतिश्रु तंतत्रहेमंतशिशिरयोरेकीकरणंविवक्षितं॥याजमानेषुपंचप्रयाजानुमंत्रणमंत्रे
षुहेमंतशिशिरयोरेकस्मिन्नेकेनैवपदेनैकीकरणोक्तेः॥तथाहि॥वसंतमृतूनांप्रीणामि॥ग्रीष्ममृतूनां
प्रीणामि॥वर्षाऋतूनांप्रीणामि॥शरदमृतूनांप्रीणामिइतिचतुर्णांप्रयाजानांपृथक्पृथगनुमंत्रणमंत्रा
नाम्नायपंचमप्रयाजस्यानुमंत्रणमंत्रएवंश्रूयते॥हेमंतशिशिरावृतूनांप्रीणामीति॥एतदेवाभिप्रेत्यबह्व
चब्राह्मणेद्वादशमासाःपंचर्त्तवोहेमंतशिशिरयोःसमासेनेति॥ यत्त्वनयोर्मंत्रब्राह्मणयोर्द्विवचनंतत्स्वरू
पद्वैविध्याभिप्रायेण॥शिशिरस्यषष्ठस्यांतिमत्वात्॥तेनानुमंत्रणीयस्यषष्ठप्रयाजस्याभावाच्चतस्यैवपं
चमेहेमंतेंतर्भावोन्याय्यः॥अतएवप्रयाजब्राह्मणेवसंतमेवर्त्तूनामवरुंधेइत्यादिनाचतुरःप्रयाजान्प्र
शस्यपंचमेप्रयाजेकेवलेनहेमंतेनप्रशंसा॥स्वाहाकारंयजतिहेमंतमेवावरुंधेइति॥अस्तुनामयथात
थापंचसंख्यायथोक्तस्वरूपेणतुषोढाभिद्यते॥द्वादशमासात्मकेसंवत्सरएकैकस्यऋतोर्मासद्वयात्मक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

का·मा· त्वेसति एकादशद्वादशमासयोर्वर्जयितुमशक्यत्वात्॥ षष्ठत्तौं पृथगनुष्ठानविधानाच्च तच्चोपरिष्टादुदा
२१ हरिष्यामः॥ मासद्वयात्मकत्वं चाग्निचयने ऋतव्येष्टकोपधानब्राह्मणे श्रूयते॥ द्वंद्वमुपदधाति॥ तस्माद्वंद्वं
द्वमृतव इति॥ एकस्मिन्नृतौ कयोर्मासयोर्द्वंद्वं ग्रहीतव्यमिति चेत्॥ वसंताद्यनुक्रमेण चैत्रमासादिद्वंद्वमि-
ति ब्रूमः॥ तच्चेष्टकोपधानमंत्रेषु श्रूयते॥ मधुश्च माधवश्च वासंतिकावृतू॥ शुक्रश्च शुचिश्च ग्रैष्मावृतू॥ न
भश्च नभस्यश्च वार्षिकावृतू॥ इषश्चोर्जश्च शारदावृतू॥ सहश्च सहस्यश्च हैमंतिकावृतू॥ तपश्च तपस्य
श्च शैशिरावृतू॥ एषु च वाक्येषु ऋतू इति द्विवचनं ऋत्ववयवमासाभिप्रायं॥ अन्यथा षडृतव इति श्रूयमा-
णा षट्संख्या बाध्येत अवयविनऋतोर्वसंतादेरेकात्मकत्वं सौत्रामणीयहोत्रमंत्रेष्वेकवचनेन व्यवहाराद
वगंतव्यं॥ वसंतेनर्तुना देवाः ग्रीष्मेणर्तुना देवा इत्यादि हि तत्र पठ्यते॥ तथैवाधानब्राह्मणे श्रूयते॥ वसंतो वै
ब्राह्मणस्यर्तुर्ग्रीष्मो वै राजन्यस्यर्तुः शरद्वैश्यस्यर्तुरिति यद्यप्येते षडर्त्तवो घटीयंत्रघटवन्नैरंतर्येण वर्त्तंते राम
॥ तथापि संवत्सरोपक्रमरूपत्वेन वसंतस्य प्राथम्यं द्रष्टव्यं॥ एतदेवाभिप्रेत्य श्रूयते॥ मुखं वा एतदृतूनां य २१

CC-0. In Public Domain. Digitization by eGangotri

हूसंतइति॥पूर्वोदाहृतेषुमंत्रब्राह्मणेषुसर्वत्रवसंतोपक्रमपाठाच्चवसंतस्यप्राथम्यं॥तेचवसंताद्यृतवोद्वि॰
विधाः॥चांद्राःसौराश्च।चैत्राद्यश्चांद्राः तच्चोदाहृतंमधुश्चमाधवश्चेत्यादिना॥नचतत्रचैत्राद्यर्येनोक्ताइ
तिशंकनीयम्॥मध्वादिशब्दानांचैत्रादिपर्यायत्वात्॥अतएवाहुः॥चैत्रोमासोमधुःप्रोक्तोवैशाखोमाधवो
भवेत्॥ज्येष्ठमासस्तुशुक्रःस्यादाषाढःशुचिरुच्यते॥नभोमासःश्रावणःस्यान्नभस्योभाद्रउच्यते॥इषश्चा
श्वयुजोमासःकार्त्तिकश्चोर्जसंज्ञकः॥सहोमासोमार्गशिरःसहस्यःपुष्यनामकः॥माघमासस्तपाःप्रोक्त
स्तपस्यःफाल्गुनःस्मृतइति॥एतेषांचैत्राद्यात्मकानांवसंतादीनांचंद्रगतिपरिकल्पितत्वाच्चांद्रत्वं॥अत
एवहोतृमंत्रेष्वाम्नायते॥चंद्रमाःषड्ढोतासऋतून्कल्पयति॥तथासूक्तविशेषेसूर्याचंद्रमसौप्रकृत्याम्ना
यते॥पूर्वापरंचरतोमाययैतौशिशूक्रीडंतौपरियातोअध्वरं॥विश्वान्यन्योभुवनाभिचष्टऋतूंरन्योविदध
ज्जायतेपुनरिति॥अत्रपुनर्जायतइतिलिंगाहृतुविधाताचंद्रइत्यवगम्यते॥नन्वस्त्वेवंमध्वादीनांचांद्रमा
सानांवसंताद्यृतुत्वं॥संसर्पाख्यस्यतुत्रयोदशस्यचांद्रमासस्यकथमृतुषुनिर्वाहः॥तन्माससंज्ञावश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुर्ग्रहब्राह्मणेमंत्रानुवादस्तुरः सरमाम्नायते॥उपयामगृहीतोसिसंसर्पोहंस्येत्यायत्वेत्याहास्तित्रयोदशो
मासइत्याहुस्तमेवतत्प्रीणाति॥तथाप्रवर्ग्यब्राह्मणेपि॥अस्तित्रयोदशोमासइत्याहुः यत्त्रयोदशः परिधिर्भव
तितेनैवत्रयोदशंमाससमवरुंधइति॥तदुत्पत्तिप्रकारश्चास्माभिर्मलमासनिर्णयेवक्ष्यते॥विद्यतांएवंत्रयोद
शोमासः तस्यकानुपपत्तिर्वसंताद्यृतुष्विति चेत्॥उच्यते॥किमयंसप्तमऋतुःआहोस्विदुक्तेष्वेवषट्स्वंतर्भू
तः॥उतर्त्तुद्वयांतरालवर्तीकश्चिदनृतुरूपः नतावत्सप्तमः॥ऋतुर्ऋतुनानुद्यमानइतिऋतूनांनैरंतर्यश्र
वणात्॥नाप्यग्रिमः॥षड्वाऋतवइतिषट्संख्यानियमात्॥वसंतादिवन्मंत्रब्राह्मणयोर्नामांतराश्रवणा
च्च॥नापिमध्यमः॥मध्वादिष्वपाठात्॥उच्यते॥ययोर्मासयोर्मध्येमलमासोदृश्यतेतयोरुत्तरस्मिंस्तस्यां
तर्भावः॥तथाचासौषष्टिदिवसात्मकोमलिनशुद्धभागद्वयात्मकइतिमध्वादिशब्दवाच्यत्वेनोक्तेष्वंत(
र्भावान्नकाप्यनुपपत्तिः॥सौरेष्वृतुषुबोधायनेनमीनमेषयोर्मेषवृषयोर्वावसंतइत्यभिधानात्॥मीना
दित्वंमेषादित्वंचवैकल्पिकंवसंतस्यांगीकृतंतथातदनुसारेणउत्तरेग्रीष्मादयोपियथायथंविकल्प्यंते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विनियोगश्चैषामृतुविशेषाणांश्रुतिस्मृतिपुराणेष्ववगम्यते॥ तत्रश्रुतिः॥वसंतेब्राह्मणोग्नीनादधीतग्री- ष्मेराजन्यआदधीतशरदिवैश्यआदधीतेत्यादि॥स्मृतिरपिवसंतेब्राह्मणमुपनयीतग्रीष्मेराजन्यंशरदि वैश्यमिति॥विष्णुधर्मोत्तरेपि॥षण्मूर्त्तिव्रतेवसंताद्यृतुषुषट्सुपृथक्पूजाविशेषाःकथिताः॥तथातत्रैववसं तेस्नानानुपलेपनादिदानंग्रीष्मेपानकदानादिचोक्तं॥देवीपुराणे॥वर्षासुतिलदानमुक्तं॥तथाशरद्यन्नदा नं॥हेमंतेग्निदानंशिशिरेवस्त्रदानमित्येतानिविष्णुधर्मोत्तरएवोक्तानिएवमन्यदप्युदाहार्यं॥ इत्यृतुनि र्णयः॥ ॥अथमासनिर्णयः॥ ॥ तत्रसकारांतंमासितिप्रातिपदिकंचंद्रवाचितस्यायंकालइतिमासः॥तदी यत्वंचपंचदशानांकलानांवृद्धिक्षयद्वारेणावगंतव्यं॥ यदिदंमासत्वंसौरसावनयोरनुगतंतत्स्यैवमस्त्त॥ मसपरिमाणइत्यस्माद्धातोर्निष्पन्नोयंमासशब्दः॥मस्येतेपरिमीयेतेयावताकालेनचंद्रवृद्धिक्षयौसचांद्रो मासः॥यद्वाचंद्रवृद्धिक्षयाभ्यांस्वयंमस्यतइतिमासः॥तथाचसिद्धांतशिरोमणौपठ्यते॥मस्यंतेपरिमी यंतेस्वकलावृद्धिहानितः॥मासएतेस्मृतामासास्त्रिंशत्तिथिसमन्विताइति॥सूर्यस्यराशिगतिर्यत्रपरिमीय

तेससौरः॥अहोरात्राणांत्रिंशत्संख्यापरिमीयतेयत्रससावनः॥तदुक्तंब्रह्मसिद्धांते॥चांद्रशुक्लादिदर्शांतः
सावनस्त्रिंशतादिनैः॥एकराशौरविर्यावत्कालंमासःसभास्करइति॥ नाक्षत्रमपिमासंकेचिदिच्छंति॥सर्व
र्क्षपरिवर्त्तैस्तुनाक्षत्रोमासउच्यतेइतिविष्णुधर्मोत्तरेभिधानात्॥तत्रापिसप्तविंशतिसंख्यापरिमीयते
अनेनेतिमासशब्दोयोजनीयः॥तत्रसौरमासस्याद्यंतौमेषादिराशीनामाद्यंताभ्यांव्यवस्थितौसावनेपुरुषे
च्छादिर्नियामकः॥नाक्षत्रेनक्षत्रंनियामकंचांद्रस्तुदर्शांतःपूर्णिमांतोविकल्प्यते॥तथाचश्रूयते॥अमावास्ययामासान्सं
पाद्याहरुत्सृजंत्यमावास्ययाहिमासान्संपश्यंति॥पौर्णमास्यामासान्संपाद्याहरुत्सृजंतिपौर्णमास्याहिमासान्संपश्यंती
ति॥अस्यवाक्यस्यायमर्थः॥अस्तिकिंचिदुत्सर्गिणामयनंनामसत्रं॥तच्चगवामयनस्यविकृतिः॥अतोद्वादशमासे
ष्वनुष्ठेयं॥प्रकृतावेकैकस्मिन्मासेत्रिंशत्स्वहस्सुसोमयागविशेषाणांत्रिंशतामनुष्ठेयत्वान्नकिंचिदप्यहरुत्स्रष्टुंश
क्यते॥तद्विकृतावपिप्राप्तौप्रतिमासमेकैकस्मिंस्तस्मिन्सोमयागपरित्यागोविधीयते॥तत्रकतमदहस्त्यज्यतामि
तिवीक्षायामिदमुच्यते॥अमावास्यायामनुष्ठेयेनयागेनपूर्वमासंपरिसमाप्योत्तरस्यादिभूतमहस्त्यज्यतामि

तिविधायार्थवादेप्रसिद्धवाचिनाहिशब्देनमासस्यामावास्यांतत्वंप्रत्यक्षदृष्टवत्सर्वेषांसंमतमितिदृढय
ति॥एवंपौर्णमासीवाक्येपियोज्यमिति॥पूर्णमास्यंतत्वेश्रुतेःकदाक्षोभूयान्॥योवैपूर्णआसिंचतीत्यादि
नायज्ञेनयज्ञंप्रत्यवरोहंतीत्यंतेनार्थवादप्रपंचेनसदृष्टांतान्वयव्यतिरेकयुक्तेनप्रपंचितत्वात्॥ननुनो॰
दाहृतंवाक्यंमासान्तस्यनियामकंअतिप्रसंगात्॥तथाहि॥तस्यैवानुवाकस्यादौपक्षांतरमुपन्यस्तं॥षडहै
र्मासान्संपाद्याहरुत्सृजंतिषडहैर्मासान्संपश्यंतीतितत्रपूर्वन्यायेनषष्ठमहर्मासांतइतिप्रसज्येत॥अथम
न्यसेषडहैरितिबहुवचननिर्देशात्पंचभिःषडहैरितिव्याख्यायांनकोपिविरोधइति॥एवमप्यन्यत्रातिप्र
संगोदुर्वारः॥तथाचवाक्यांतरंश्रूयते॥अर्द्धमासैर्मासान्संपाद्याहरुत्सृजंतिअर्धमासैर्मासान्संपश्यंतीति॥
अत्रैकैकार्द्धमासस्वीकारेपक्षस्यमासत्वप्रसंगः॥बह्वर्धमासस्वीकारेपक्षत्रयादेर्मासत्वप्रसंगः॥किंच
पूर्वोक्तोप्यतिप्रसंगोदुःपरिहरएव॥षडहैरित्यत्रषडहपंचकस्वीकारासंभवात्॥एकैकस्यषडहस्यस्वी
कर्त्तव्यत्वात्॥उत्तरानुवाकेषडहैर्मासान्संपाद्ययत्सप्तममहस्तस्मिन्नुत्सृजेयुरितिसप्तमत्वविशेषणात्॥

CC-0. In Public Domain. Digitization by eGangotri

तस्माददतिप्रसंगद्वयग्रस्तत्वेन न पूर्वोक्तमासांतः ॥ अत्रोच्यते ॥ श्रुतिस्मृतिलोकप्रसिद्धिभ्यो मासशब्दस्त्रिंश-
द्दिनसमूहे रूढः ॥ श्रुतयः संवत्सरायनर्तुविषयाः पूर्वमुदाहृताः ॥ तत्र संवत्सरस्य द्वादशो भागो मासः ॥ अय-
नस्य षष्ठो भागः ॥ ऋतुषु द्वयोर्भागयोरन्यतरः ॥ स्मृतयस्तु ॥ माने मासस्तु नाक्षत्रे सप्तविंशतिभिर्दिनैः ॥ प-
रिशेषेषु मासेषु मासस्त्रिंशद्दिनैः स्मृतः ॥ चांद्रः शुक्लादिदर्शांत इत्यादयः ॥ लोकेप्याविद्वदंगनागोपालं मास-
स्य त्रिंशद्दिनात्मकत्वं प्रसिद्धं ॥ एवं सत्यर्द्धमासैर्मासानित्यत्र मासशब्दो मासैकदेशं लक्षयति ॥ षडहैरित्य-
त्र षडहः पंचकविवक्षायां न काचिदनुपपत्तिः ॥ एकैकषडहविवक्षायां पूर्ववदेकदेशलक्षणा ॥ अतोतिप्रसंगा-
भावादुक्तवाक्याभ्यां मासस्यामावास्यांतत्वपौर्णमास्यंतत्वं विकल्प्यते ॥ तत्र प्रथमपक्षे शुक्लादिर्दर्शांत इत्या-
दिस्मृतय उदाहार्याः शिष्टाचारबाहुल्यं च तत्र प्रसिद्धं ॥ द्वितीयपक्षस्योपोद्बलकं श्रुतिलिंगं स्मृतिलिंगं च ॥
अथर्वणिकाः सृष्टिप्रकरणे संवत्सरदक्षिणोत्तरायणसृष्टिमाम्नाय मासपक्षसृष्टिमेवमामनंति ॥ मासो
वै प्रजापतिः तस्य कृष्णपक्ष एव रयिः शुक्लः प्राण इति ॥ तत्र कृष्णपक्षस्य प्राथम्ये पाठो लिंगं ॥ स्मृतौ महा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लयप्रकरणेपठ्यते॥अश्वयुक्कृष्णपक्षेतुश्राद्धंकार्यंदिनेदिनेइति॥तत्रयदिदर्शांतोमासोविवक्षितस्तर्हितत
दाभाद्रपदकृष्णपक्षइत्युच्येत॥नत्वेवमुक्तं॥आश्विनमासांतर्गतत्वंत्विहोच्यते॥तच्चकृष्णपक्षादिपूर्णि॰
मांतत्वेसंभवति॥तथाचजयंतीप्रकरणेस्मर्यते॥मासिभाद्रपदेष्टम्यांकृष्णपक्षेर्धरात्रके॥भवेत्प्रजापतेर्ऋ
क्षंजयंतीनामसास्मृतेतिच॥अत्रापिजयंत्याभाद्रपदांतर्गतत्वंमासस्यपूर्णिमांतत्वंगमयति।शिष्टाचार॰
विशेषादपिपूर्णिमांतत्वंद्रष्टव्यं॥यतिधर्मप्रकरणेस्मर्यते॥ऋतुसं धिषुवापयेदिति॥तत्रयदिदर्शांतविव॰
क्षास्यात्तदादर्शस्यैवसंधित्वात्तत्रवपनंकुर्युः॥कुर्वंतितुपूर्णिमायां॥तस्माद्दर्शांतत्वपूर्णिमांतत्वयोःसमो-
विकल्पः॥अनुष्ठानेतुतत्तद्वचनविशेषाच्छिष्टाचाराच्चव्यवस्थाद्रष्टव्या॥वचनविशेषस्तुब्रह्मसिद्धांतेप
ठ्यते॥अमावास्यापरिच्छिन्नोमासःस्याद्ब्राह्मणस्यतु।संक्रांतिपौर्णमासीभ्यांतथैवनृपवैश्ययोरिति॥द
र्शांतानांपूर्णिमांतानांवामासविशेषाणांचैत्रादिसंज्ञानक्षत्रप्रयुक्ता॥यस्मिन्मासेपूर्णिमाचित्रानक्षत्रेण
युज्यतेसचैत्रः॥एवंवैशाखादिषून्नेयं॥चित्राविशाखादियोगस्योपलक्षणत्वात्॥केचिच्चित्रादिप्रत्यास

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

न्सत्वात्त्यनुराधादियोगेपि चैत्रवैशाखादिसंज्ञा न विरुध्यते चैत्रादिश्रवणांतानां चित्रादिनक्षत्रद्वंद्वंप्रयोजकं॥ भाद्रपदाश्वयुजोस्तु शततभिषग्रेवत्यादिकं त्रिकं॥ कार्त्तिकादिमाघांतानां कृत्तिकादि द्वंद्वम्॥ फाल्गुनस्यतु पूर्वाफाल्गुन्यादित्रयमिति विवेकः॥ तथाच संकर्षणकांडे॥ द्वे द्वे चित्रादिताराणां परिपूर्णेन्दुसंगमे॥ मासाश्चैत्रादयो ज्ञेयाः त्रिकैः षष्ठांत्यसप्तमा इति॥ अन्यत्राप्युक्तं तोपांतौ त्रिभौ ज्ञेयौ फाल्गुनश्च त्रिभो मतः॥ शेषामासा द्विभा ज्ञेयाः कृत्तिकादिव्यवस्थयेति॥ तत्र माससामान्यकर्त्तव्यानि तैत्तिरीया आमनंति॥ मासिमासि पितृभ्यः क्रियते मासिमासि पृष्ठान्युपयंति मासिमास्यतिग्राह्या गृह्यंत इति॥ पृष्ठानि स्तोत्रविशेषाः अतिग्राह्या ग्रहविशेषाः॥ शाखान्तरेपि कुंडपायिनामयने मासमग्निहोत्रं जुहोतीति॥ मासविशेषानुपजीव्य कर्त्तव्यविशेषं कल्पसूत्रकाराः पठंति॥ अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीति॥ फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा वैश्वदेवेन यजते॥ ततश्चतुर्षु मासेषु आषाढ्यां श्रावण्यां वोदवसाय वरुणप्रघासैर्यजेत इत्यादि स्मार्त्ताश्च पद्मपुराणोक्त गौरीव्रतादयश्चैत्रमासादिषु क्रमेण कर्त्तव्याः॥ ते च हेमाद्रौ व्रतखंडे द्रष्टव्याः॥ त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थाविष्णुधर्मोत्तरे ॥ तिलदानादीनि माघमासादिषु कर्त्तव्यानि तानि चरदानखंडे द्रष्टव्यानि ॥ चांद्रसौरसावनमासानां मध्ये कस्य चित्क्वचित्प्रशस्तत्वं द्रष्टव्यं ॥ तदुक्तं ज्योतिर्गणे ॥ सौरो मासो विवाहादौ यज्ञादौ सावनः स्मृतः ॥ आब्दिके पितृकार्ये च चांद्रो मासः प्रशस्यत इति ॥ ॥ इति शुद्धमासनिर्णयः ॥ ॥ अथ मलमासनिर्णयः ॥ तस्य स्वरूपं ब्रह्मसिद्धांतेभिहितं ॥ चांद्रो मासो ह्यसंक्रांतो मलमासः प्रकीर्त्तित इति ॥ मलत्वं च कालाधिक्यात् ॥ तथा च गृह्यपरिशिष्टे ॥ मलं वदंति कालस्य मासं कालविदोधिकमिति ॥ कालाधिक्यं च विष्णुधर्मोत्तरे दर्शितं ॥ सौरेणाब्दस्तु मानेन यदा भवति भार्गव ॥ सावने तु तदा माने दिनषट्कं न पूर्यते ॥ दिनरात्राश्च ते राम प्रोक्ताः संवत्सरेण षट् ॥ सौरसंवत्सरस्यांते मानेन शशिजेन तु ॥ एकादशातिरिच्यंते दिनानि भृगुनंदन ॥ समाद्वये साष्टमासे तस्मान्मासोतिरिच्यते ॥ स चाधिमासकः प्रोक्तः काम्यकर्मसु गर्हित इति ॥ अयमर्थः ॥ सौरसंवत्सरः षड्भिर्दिनैः सावनादतिरिच्यते ॥ एकादशभिर्दिनैश्चांद्रादतिरिच्यते ॥ तथा च चांद्रसंवत्सरद्वयात् सौरसंवत्सरद्वयं द्वाविंशत्यादिनैरधिकं भवति ॥ तत ऊर्ध्वं सौरं मासाष्टकं चांद्रान्मासाष्टकात्सार्द्धैः सप्तभि

CC-0. In Public Domain. Digitization by eGangotri

का-मा दिनैरतिरिच्यते॥ तथाचमिलित्वा दिनार्द्धन्यूनो मासो भवति॥ सोयमधिको मास इति॥ अवशिष्टदिनार्द्धपू
२६ रणं च यथोक्तकालादूर्ध्वं षोडशभिर्दिनैः संपद्यते॥ अत एव सिद्धांतेऽभिहितं॥ द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडश
भिस्तथा॥ घटिकानां चतुष्केण पतत्यधिमासक इति॥ न च कालाधिक्यमात्रेण मलत्वे तिथ्यादिवृद्धेरपि म
लत्वं प्रसज्येतेति शंकनीयं॥ कालाधिक्ये सति नपुंसकत्वेन मलत्वांगीकारात्॥ नपुंसकत्वं च ज्योतिःशास्त्रेऽभि
हितं॥ असंक्रांतो हि यो मासः कदाचित्तिथिवृद्धितः॥ कालांतरात्समायाति स नपुंसक इष्यत इति। पुरुषस्य सू
र्यस्य तत्राभावान्नपुंसकत्वं॥ तदपि तत्रैवोक्तम्॥ अरुणः सूर्यो भानुस्तपनश्चंद्रो रविर्गभस्तिश्च। अर्यमा हिर
ण्यरेता दिवाकरो मित्रविष्णू च॥ एते द्वादश सूर्या माघाद्येषूदयंति मासेषु॥ निःसूर्योऽधिकमासो मलिमुचाख्यस्त
तः पापः॥ मासेषु द्वादशादित्यास्तपंते हि यथाक्रमं॥ नपुंसकेऽधिके मासि मंडलं तपते रवेरिति॥ मलिमुचत्वं च
तस्य राक्षसैस्तस्करै राक्रांतत्वात्॥ तदाह शातातपः॥ वत्सरांतर्गतः पापो यज्ञानां फलनाशकृत्॥ नैर्ऋतैर्या राम
तुधानाद्यैः समाक्रांतो विनाशकैः॥ मलिमुचैः समाक्रांतं सूर्यसंक्रांतिवर्जितं॥ मलिमुचं विजानीयात्सर्वक २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्मसुगर्हितं इति ॥ ननु द्वात्रिंशद्भिर्गतैर्मासैरित्यनेन वचनेन येयं कालेयत्ता दर्शिता सा वचनांतरेण विरुध्यते ॥ त
थाच काठकगृह्ये ॥ यस्मिन्मासे न संक्रांतिः संक्रांतिद्वयमेव वा ॥ मलमासः स विज्ञेयो मासे त्रिंशत्तमे भवेदिति ॥
नायं दोषः ॥ द्वयोर्वचनयोर्भिन्नविषयत्वात् ॥ ज्योतिःशास्त्रप्रसिद्धं मध्यममानमाश्रित्य द्वात्रिंशद्भिरिति व
चनं प्रवृत्तम् ॥ यस्मिन्मास इति तु स्फुटमानमाश्रित्य प्रवृत्तं ॥ ननु मध्यममानप्रवृत्तोधिकमासो ज्योतिःशास्त्र
व्यवहार एवोपयुज्यते ॥ ननु श्रौतस्मार्त्तयोस्तस्य शुक्लप्रतिपदादि दर्शांतत्वनियमासंभवात् ॥ षोडशभिर्दिनै
र्घटिकाचतुष्टयेन चोपेतेषु द्वात्रिंशन्मासेषु गतेषु सोधिमासो विधीयते ॥ तत्र यदि दर्शांता मासा विवक्षितास्तदा
कृष्णद्वितीयायां घटिकाचतुष्टये गते अधिमासस्योपक्रमः प्रसज्येत ॥ अथानियतोपक्रमावसाना द्वात्रिंश
न्मासा विवक्षेरन् तदापि शुक्लप्रतिपदादि दर्शांतो मास इत्येष नियमो न लभ्यते ॥ श्रौतस्मार्त्तव्यवहारोपयो
गिनि त्वधिकमासे स्ति नियमः ॥ तथा च लघुहारीतः ॥ इंद्राग्नी यत्र हूयेते मासादिः परिकीर्त्तितः ॥ अग्नीषोमौ
स्मृतौ मध्ये समाप्तौ पितृसोमकौ ॥ तमतिक्रम्य तु यदा रविर्गच्छेत्कदाचन ॥ आद्यो मलिम्लुचो ज्ञेयो द्वितीयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

घाकृतः स्मृतः॥ अयमर्थः। दर्शपूर्णमासयाजिना शुक्लप्रतिपदि दर्शेष्टिदेवाविंद्राग्नी हूयेते कृष्णप्रतिपदि तु पू
र्णमासेष्टिदेवावग्नीषोमौ॥ अमावास्यायां पिंडपितृयज्ञदेवौ पितृसोमकौ॥ तत्रैवं सति शुक्लप्रतिपदादिर्द
र्शांतो मासः॥ संक्रांतिरहितोधिमास इत्यर्थाल्लभ्यते इति॥ तस्मान्मध्यममानगणना श्रौतस्मार्त्तयोर्नोप
युक्ता॥ बाढं॥ तथापि कालाधिक्यान्मलमास इत्यस्मिन्नंशे तदुदाहरणमित्यदोषः॥ यत्तु मासे त्रिंश
त्तमे भवेदित्युदाहृतं तत् श्रौतस्मार्त्तयोरुपयुज्यते॥ स्फुटमानसिद्धत्वात्तादृशं चाधिमासमुदाहरामः।
अष्टपंचाशत्युक्तशतद्वयाधिकेशकवर्षाणां सहस्रेगते सति समनंतरभावी योयमीश्वरस्तस्मिन् श्राव
णमासोधिकः॥ ततः पूर्वभावी यो भावसंवत्सरस्तस्मिन्फाल्गुनमासोधिकः॥ तयोः संवत्सरयोर्मध्यव
र्त्तिनौ योयुवधात्संवत्सरौ तदाद्याश्चतुर्विंशतिमासा ईश्वरसंवत्सरे च चत्वारश्चैत्राद्याः॥ तथा सति यथो
क्तफाल्गुनमारभ्यगणनायां यथोक्तः श्रावणमासस्त्रिंशत्तमो भवति॥ अनेन न्यायेन षष्टिमासात्मकेषु
पंचसु वत्सरेषु द्वावधिकमासौ संपद्येते॥ तदुक्तं महाभारते॥ पंचमे पंचमे वर्षे द्वौ मासावधिमासकौ॥ तेषां

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालातिरेकेण ग्रहाणामतिचार त इति ॥ नन्वधिकमासस्य पक्षे त्रिंशत्तमत्वं व्यभिचरति न्यूनाधिकसंख्याया अपि दर्शनात् ॥ तथाहि ॥ यथोक्तेश्वरसंवत्सरोत्तरभाविनि चित्रभानुसंवत्सरे वैशाखमासोधिकः । तत उत्तरभाविनि तारणसंवत्सरे व्यवहिते पार्थिवसंवत्सरे भाद्रपदमासोधिकः । तथा च तस्यैकोनत्रिंशत्त्वं संपद्यते । तथा खरसंवत्सरे वैशाखमासोधिकः । नंदनसंवत्सरव्यवहिते विजयसंवत्सरे भाद्रपदमासोधिक इति । तत्राप्येकोनत्रिंशत्त्वं ॥ तथा दुर्मुखसंवत्सरे श्रावणमासोधिकः । हेमलंबि विलंबि संवत्सरद्वयव्यवहिते विकारिसंवत्सरे ज्येष्ठोधिकः ॥ तथा च तत्र पंचत्रिंशत्त्वं संपद्यते ॥ तस्मान्मासे त्रिंशत्तमे भवेदित्येतदयुक्तं भवति ॥ नायं दोषः ॥ त्रिंशत्तमस्योपलक्षणत्वेनांगीकारात् ॥ उदाहरणप्रदर्शनार्थमेतदुक्तमित्यविरोधः । इदमत्र विचार्यते । किमयं मलमासः स्वतंत्र उत पूर्वस्य शुद्धमासस्य शेषः आहोस्विदुत्तरस्य शुद्धमासस्य शेष इति ॥ न च काकदंतपरीक्षेयमनुष्ठानानुपयोगादिति शंकनीयं ॥ प्रत्याब्दिकाद्यनुष्ठाने तद्विचारस्योपयुक्तत्वात् ॥ तथाहि ॥ शुद्धाषाढशुद्धश्रावणयोर्मध्ये यदा मलमासस्तदा तस्य स्वातंत्र्ये तस्मिन्प्रत्याब्दिकमेव न प्राप्नोति ॥ पूर्वस्योत्तरस्य वा शेष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का॰मा॰ त्वेशेषिणि मासे यत्सत्याब्दिकादि तस्य मलमासेप्यनुष्ठानं भवति॥ पितृकार्याणि चोभयोरिति वचनात्॥ तस्मा
२८ त्सार्थको विचारः॥ नत्र स्वातंत्र्यं तावद्धेतुनिर्णये निरस्तं॥ पारतंत्र्येपि पूर्वशेषत्वं युक्तमिति केचिदाहुः॥ तत्रोपप
त्तिं केचिदित्थं तिचोपन्यस्यंति च मेषादिसंक्रांतयश्चैत्रादिसंज्ञानां प्रयोजिकाः॥ तथा च ज्योतिःशास्त्रेभिहितं
॥ मेषादिस्थे सवितरि यो यो मासः प्रपूर्यते चांद्रः॥ चैत्राद्यः स विज्ञेयः पूर्तिद्वित्वे धिमासोंत्य इति॥ यदा सवितर्ये
कराशिस्थे सति दर्शद्वयं पूर्यते तदानीमंत्य उत्तरदर्शावसानको मासो धिमासः॥ न तत्पूर्वदर्शावसानक इत्य
र्थः॥ यदा शुद्धाषाढस्य बहुलचतुर्दश्यां दर्शे वा कर्कटसंक्रांतिर्भवति॥ शुद्धश्रावणमासस्य शुक्लपक्षे प्रतिपदि
द्वितीयायां वा सिंहसंक्रांतिस्तदा कर्कटसंक्रांतियुक्तस्य शुद्धमासस्याषाढत्वं युक्तं॥ तदीयदर्शस्य कर्कट
कस्थे रवाववसितत्वात्॥ सिंहसंक्रांतियुक्तस्यापि श्रावणत्वमुचितं॥ तदीयदर्शस्य सिंहस्थे रवाववसि
तत्वात्तेनैव न्यायेन तयोर्मध्यवर्तिनः संक्रांतिरहितमासस्य दर्शः कर्कटस्थ एव रवौ पूर्यत इति पूर्वाषाढ राम
वदेतस्याप्याषाढत्वमुचितं॥ अत्रोच्यते॥ मेषादीनां शुद्धमाससंज्ञां प्रत्येव प्रयोजकत्वं॥ मलमासस्योत्तरमा २८

CC-0. In Public Domain. Digitization by eGangotri

सशेषत्वस्मरणात्॥ तथाचज्योतिःपितामहः। षष्ठ्यातुदिवसैर्मासःकथितोबादरायणैः। पूर्वार्द्धंतुपरित्यज्य कर्त्तव्याउत्तरेक्रियाइत्यन्यत्रापिषष्टिदिनात्मकंमासंप्रकृत्योक्तं॥आद्योमलिम्लुचोज्ञेयोद्वितीयः प्राकृतःस्मृतइति॥ एवंषष्टिदिनोमासस्तदर्द्धंतुमलिम्लुचइतिच॥ज्योतिःशास्त्रांतरेपि॥षष्ठ्याहिदिवसैर्मासःकथितो बादरायणैः॥ पूर्वमर्द्धंपरित्यज्यउत्तरार्द्धंप्रशस्यतइति॥ अस्त्वेवंसंक्रांतिरहितस्यमलमासस्योत्तरशेषत्वं द्विसंक्रांतियुक्तस्यतुकथमितिचेत्॥ उच्यते॥ प्रथमंतावत्स्वरूपंनिरूप्यते॥ तच्चज्योतिःसिद्धांतेभिहितं॥ असंक्रांतिमासोधिमासःस्फुटःस्यात् द्विसंक्रांतिमासः क्षयाख्यःकदाचित्॥ क्षयःकार्त्तिकादित्रयेनान्यतः स्यात् तदावर्षमध्येधिमासद्वयंचेति॥अयमर्थः॥स्फुटमानेन योयमसंक्रांतःसस्फुटोधिमासः तेनैवमानेनयोयंद्विसंक्रांतियुक्तःक्षयमासः सचकार्त्तिकमार्गशीर्षपौषेष्वेवत्रिष्वन्यतमोभवति॥नान्येषुमाघादिषु नवसु॥ एवंविधक्षयमासयुक्तेवर्षेक्षयमासात्पूर्वेषुत्रिषुमासेषुमध्येकश्चिदधिकमासोभवति॥ क्षयमासादूर्ध्वमपिमासत्रयमध्येपरोधिमासः॥ तदेवंविधमेकवर्षस्यमलमासत्रयंचिरेणकालेनयदाकदाचिदापा

Sanskrit University, Banaras, Varanasi. Kathmandu

का·मा· तिनत्वेकाधिमासवत्सुनः पुनः सहसा समायाति॥ तन्निर्णयागमनकालश्च सिद्धांतशिरोमणौ दर्शितः॥ गते
२९ ब्ध्यद्रिनंदैर्मितेशाककाले तिथीशैर्भविष्यत्यथांगाक्षसूर्यैः। गजाद्र्यग्निभूमिस्तथा प्रायशोयं कुवेदेंदुवर्षैः क्व
चिद्गोकुभिश्च॥ अस्यायमर्थः। चतुःसप्तत्यधिकनवशतसंख्याकैर्वर्षैः परिमितेशककाले कश्चिदुक्तमास
त्रयोपेतो वत्सरो गतः। यथोक्तसंख्या चाब्ध्यद्रिनंदैरित्यनेन पदेन विवक्षिता॥ अब्धयश्चत्वारः अद्रयः सप्त
नंदा नव॥ एतत्संख्यात्रयगमकाअंकागणकप्रसिद्ध्या प्रातिलोम्येन लिखिता यथोक्तसंख्यायां पर्यवस्यंति
तिथीशैरत्रापि तिथयः पंचदश ईशा एकादश तत्रगणकैरंकेषु प्रक्षिप्तेषु पंचदशाधिकशतयुक्तसहस्रसं॰
ख्या संपद्यते॥ तावद्भिः शकवर्षैर्मिते काले कश्चिदुक्तमासत्रयोपेतः संवत्सरः॥ अंगाक्षसूर्यैरित्यत्र अंगानि
षट् अक्षाणींद्रियाणि पंच सूर्या द्वादश॥ तत्रांकप्रक्षेपे सति षट्पंचाशदधिकशतद्वयोपेतसहस्रसंख्योपपद्य
ते॥ तावद्भिर्वत्सरैर्मिते शककाले यथोक्तमासत्रयोपेतः कश्चित्संवत्सरः। अस्य चोदाहरणं॥ पूर्वोदाहृत राम
ईश्वरसंवत्सरप्राचीनो भावसंवत्सरः। तत्र हि भाद्रपदबहुलामावास्यां कन्यासंक्रांतिस्ततऊर्ध्वमसंक्रांत २९

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेकंमासमतीत्यउत्तरयोर्मासयोः क्रमेण तुलावृश्चिकसंक्रांती॥ ततऊर्ध्वमेकस्मिन्नेवमासे शुक्लप्रतिपदि ध
नुःसंक्रांतिर्दर्शेमकरसंक्रांतिः॥ ततऊर्ध्वंकुंभसंक्रांतिः अनंतरेमासेदर्शे ततऊर्ध्वमेकमसंक्रांतमासमती
त्यउत्तरस्यांशुक्लप्रतिपदि मीनसंक्रांतिः॥ एवंसत्येकस्मिन्नेव वत्सरे द्वावसंक्रांतौ मासौ एको द्विसंक्रांतिमा
स इति यथोक्तमासत्रयंसंपद्यते॥ गजाद्र्यग्निभूमिरित्यत्रापि गजा अष्टाद्रयः सप्ताग्नयस्त्रयः। भूरेकात त्रांक
प्रक्षेपेसत्यष्टसप्तत्यधिकशतत्रयोपेतसहस्रसंख्यासंपद्यते॥ तावद्भिर्वत्सरैर्मितेशाककालेकश्चिद्दुक्त
विधःसंपद्यतेवत्सरः। कुवेदेंदुवर्षैरित्यत्रकुरेकावेदाश्चत्वार इंदुरेकः तत्रांकप्रक्षेपेणैकचत्वारिंशत्यधि
कशतसंख्या भवति॥ एतावद्भिर्वर्षैः क्वचित्पूर्वोत्तरक्षयमासयोर्व्यवधानं भवति॥ गोकुभिश्चेत्यत्र नपुंसकव
र्जितेषुस्वराक्षरेषुगण्यमानेष्वोकारोनवमः संपद्यते॥ कुरेकात त्रांकप्रक्षेपेसति एकोनविंशतिर्भवति॥
तावद्भिर्वत्सरैः क्वचित्पूर्वोत्तरयोः क्षयमासयोर्व्यवधानं भवति। अत्र द्विसंक्रांतियुक्तस्यक्षयसंज्ञाया मुप
पत्तिरुच्यते॥ यदाधनुःस्थेरवौ दर्शपूर्त्तिस्तदा तस्य मेषादिस्थवचनेन मार्गशीर्षत्वंप्राप्तं॥ तथासति पूर्वो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दात्त्वते हि संक्रांतेमासे धनुस्थे रवौ दर्शो न समाप्तः किंतु मकरस्थे अतः पौषमासत्वं तस्य संपन्नं ॥ तथा च
मार्गशीर्षस्य तत्र लुप्तत्वात्तस्य क्षयसंज्ञा युक्ता ॥ अत एवैकमासव्याप्तित्वादंहसः पापस्य पतिरिति व्युत्प-
त्त्या स एवांहस्पति संज्ञयापि व्यवह्रियते। स च व्यवहारो बार्हस्पत्यो ज्योतिर्ग्रंथे दृश्यते ॥ यस्मिन्मासे न
संक्रांतिः संक्रांतिद्वयमेव वा ॥ संसर्पांहस्पती मासावधिमासश्च निंदित इति ॥ तत्र क्षयमासात्प्राचीनो योऽ
संक्रांतः संसर्पः। असंक्रांतत्वेनेतराधिकमास ------ वत्कर्मानर्हतायां प्राप्तायां तदपवादेन कर्मार्हः सन्
सम्यक्सर्पतीति संसर्पः ॥ तस्य कर्मार्हत्वप्राप्तिरेवं स्मर्यते ॥ सिनीवालीमतिक्रम्य यदा संक्रमते रविः ॥
रविणालंघितो मासोऽत्यर्हः सर्वकर्मसु इति ॥ तदपवादश्चैवं स्मर्यते ॥ मासद्वयेऽब्दमध्ये तु संक्रांतिर्न यदा भ-
वेत् ॥ प्राकृतस्तत्र पूर्वः स्यादधिमासस्तथोत्तर इति ॥ संक्रांतिरहितयोर्द्वयोर्मासयोर्यः पूर्वोऽसंक्रांतः स प्राकृ-
तः शुद्धः कर्मार्ह इत्यर्थः। अस्मिन्नेवार्थे जाबालिः। एकस्मिन्नेव वर्षे तु द्वौ मासावधिमासकौ। प्राकृतस्तत्र पूर्वः
स्यादुत्तरस्तु मलिम्लुच इति ॥ अतः संसर्पत्वं तस्योपपन्नं। असंक्रांतमासद्वयमध्यवर्त्तिनः क्षयमासस्यांहस्पति-

CC-0. In Public Domain. Digitization by eGangotri

त्वनिरुक्तिः पूर्वमेवदर्शिता॥तदुत्तरभाविनोः संक्रांतस्यकालाधिक्याद्धिमासत्वं।त एते त्रयोपिज्योतिःशास्त्र
प्रसिद्धे विवाहादौ निंदिताः॥यथोक्तप्रकारेणांहस्पतिनाम्नःक्षयमासस्यद्वितीयसंक्रांतिप्रयुक्तनामसंभवे
सतिशुद्धमासवत्त्वात्तस्यान्नपूर्वोत्तरमासशेषत्वशंकावकाशः।नन्वेकाधिकमासोपेतसंवत्सरस्यत्रयो
दशमासात्मकत्वंयथातथाधिमासद्वयोपेतसंवत्सरस्यचतुर्दशात्मकत्वंप्राप्तम्॥नचतद्युक्तं।त्रयोदशंतुस्मृ
तिराह मासं।चतुर्दशःक्वापिनचैवदृष्टइतिवचनात्।नैषदोषः।असंक्रांतत्वेनाधिकत्वप्रसक्तियुक्तयोर्द्वयोर्म
ध्येपूर्वस्याधिमासत्वनिषेधात्॥उक्तंहि ज्योतिःसिद्धान्ते॥घटकन्यागतेसूर्येवृश्चिकेवाथधन्विनि।मकरेवाथ
कुंभेवानाधिमासोविधीयतइति॥अयमर्थः।वृश्चिकादिषुचतुर्षुमासेषुयदामलमासःप्राप्नोति तदासूर्येतुल
कन्ययोर्वर्त्तमानेसत्यसंक्रांतोपिनाधिमासइति घटकन्यागत इत्युपलक्षणं।पूर्वंष्वेपिप्रसक्तोसंक्रांतोनाधिमासः
॥तदुक्तंब्रह्मसिद्धांते।चैत्रादर्वाङ्नाधिमासःपरतस्त्वधिकोभवेदिति॥चैत्रादारभ्योपरितनेषुमासेषुयदायोकोचि
न्मासावसंक्रांतौतदातयोरर्वाचीनः पूर्वोनाधिमासःउत्तरस्तुभवत्यधिमासः।ननुमाभूच्चतुर्दशमासत्वप्राप्तिः।त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 याप्येकादशमासत्वंसंप्रसज्येतेत्यस्त्वेवदोषः॥ तथाहि॥ द्वादशमासाः संवत्सरइत्येषानित्यवच्छ्रुतिःससंक्रां
 तान्मासानुद्दिश्यप्रवृत्ता। अस्तित्रयोदशोमासइत्याहुरसंक्रांतस्यकादाचित्कस्यपृथक्श्रवणात्॥ तथाचसति
प्रकृतेक्षयमासोपेतेत्रयोदशमासात्मकेसंवत्सरेद्वयोरसंक्रांतयोः परित्यागेसतिअवशिष्टाःससंक्रांताएकादशैव
॥ ततोनित्यवच्छ्रुतिविरोधःनायंदोषः॥ संक्रांतिद्वययुक्तस्यक्षयस्यमासद्वयत्वेनपरिगणनात्॥ तथाचस्मर्य
ते। तिथ्यर्द्धे प्रथमेपूर्वोद्वितीयेर्द्धेतथोत्तरः। मासाविति बुधैश्चिंत्यौक्षयमासस्यमध्यगाविति। ज्योतिःशास्त्रेहि
संक्रांतियुक्तक्षयमासादाद्यसंक्रांतेः क्वचित्पूर्वत्रचालनसंस्कारोस्तीत्युक्तं॥ तथाचयदाचालनमस्तितदापू
र्वस्यासंक्रांतस्यससंक्रांतत्वसंपादनादयंक्षयमासएकत्वेनैवपरिगणनीयः॥ यदातुचालनंनास्तितदायथो
क्तप्रकारेणमासद्वयात्मकत्वंद्रष्टव्यं॥ यथोक्तंवटेश्वरसिद्धांते। यदि नचलति वै मासयुग्मंविचिंत्यमिति॥
इत्थंमलमासस्वरूपंनिरूपितं॥ ॥अथतत्रवर्ज्यावर्ज्यविवेकः क्रियते॥ तत्रैवपैठीनसिः। श्रौतस्मार्त्तक्रि
याःसर्वाद्वादशेमासिकीर्त्तिताः॥ त्रयोदशेतुसर्वास्तानिष्फलाः परिकीर्त्तिताः। तस्मात्त्रयोदशेमासेकुर्यात्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नकथंचन। कुर्वन्ननर्थमेवाप्नुकुर्यादात्मविनाशनमिति। अत्रनिष्फलाइत्यभिधानात् फलकामनयाप्रवृत्तंक
र्मनिषिध्यतइतिगम्यते॥ तथाचस्मृत्यंतरे॥ इष्ट्यादिसर्वकाम्यंतुमलमासेविवर्जयेदिति॥ नचसर्वास्ताइत्य
भिधानात् नित्यनैमित्तिकयोरपिनिषेधः शंकनीयः॥ नित्यनैमित्तिकेकुर्यात्प्रयतःसन्मलिम्लुचइतिबृहस्प
तिवचनात्। जाबालिनापितथैवोक्तं॥ नित्यनैमित्तिकेकुर्याच्छ्राद्धंकुर्यान्मलिम्लुचे। तिथिनक्षत्रवारोत्थं का
म्यंनैवकदाचनेति॥ योयंमलमासेकाम्यनिषेधः। असावारंभसमाप्तिविषयः। असूर्यानामयेमासानतेषु
ममसंमतः। व्रतानांचैवयज्ञानामारंभश्चसमाप्तयइति आरंभसमाप्त्योरेवाधिमासेप्रतिषेधात् ॥ आरंभस
माप्त्योर्मध्यपातिन्यधिमासेत्वारब्धंकाम्यमनुष्ठेयं॥ अधिमासेनिपतितेनत्वेषएवविधिक्रमइतिस्मरणात्
॥ यत्तुकाठकगृह्येसमाप्तिप्रतिप्रसववचनं॥ प्रवृत्तंमलमासात्प्राक्काम्यकर्मासमापितं। आगतेमलमा
सेपितत्समाप्तिर्नसंशयइति। तत्सावनमानप्रवृत्तकृच्छ्रचांद्रायणाहीनसत्रादिविषयं॥ आवश्यकंतुयत्का
म्यंकर्मतन्मलमासेप्यनुष्ठेयं। तद्यथा। प्रक्रांतेमलमासेतत् द्वित्रेषुदिनेषुगतेषुयदिकश्चिद्द्वालोब्रह्मराक्ष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सादिना गृहीतेन तदा राक्षोघ्नीष्टिः सद्य एव कर्त्तव्या। मलमाससमाप्तिप्रतीक्षायां बालादिमरणप्रसंगात्॥ सा चे
ष्टिः काम्यकांडे श्रूयते॥ अग्नये रक्षोघ्ने पुरोडाशमष्टाकपालं निर्वपेत्॥ यं रक्षांसि संचरेयुरग्निमेव रक्षोहणं
स्वेन भागधेयेनोपधावति स एवास्माद्रक्षांस्यपहंतीति। संचरेरन्नमवेयुर्गृण्हीयुरिति यावत्॥ उपधावति॥ दे
वतां प्रियेण हविर्भागेन तोषयति। अस्माद्रक्षोगृहीतादिष्टिकर्त्ता रक्षांस्यपनयतीति। तथैवाभिचरतः प्रतिचर
तश्च काचिदिष्टिः श्रूयते। आग्नावैष्णवमेकादशकपालं निर्वपेदभिचरन्निति प्रति वै पुरस्तादभिचरंतमभि
चरंति द्वे द्वे पुरोनुवाक्ये कुर्यादिति च। तत्र द्वयोरप्येकैवेष्टिः अभिचरत एकैका पुरोनुवाक्या प्रतिचरतस्तु द्वे
द्वे इति विशेषः। कालविलंबप्रतीक्षात्रापि न भवति। बाधके शत्रौ प्रत्यासन्ने सति तदैवाभिचारस्य कर्त्तव्यत्वा
त्। प्रतिचारस्यापि स एव कालः। एतयैव यजेताभिचर्यमाण इति वर्त्तमानवाचिना शानच्प्रत्ययांतेन शब्दे
न प्रतिचारकर्त्तुरभिचारसमकालत्वविशेषणात्। एवं प्रबलज्वरराजरोगराजद्रोहादिना यदापमृत्युः प्रसक्तः
तदापि सद्य एवेष्टिः कर्त्तव्या॥ इष्टिस्तु श्रूयते यो मृत्योर्बिभीयात्तस्मा एतां प्राजापत्यां शतकृष्णलां निर्वपेत्॥ प्र

CC-0. In Public Domain. Digitization by eGangotri

जापतिमेव स्वेन भागधेयेनोपधावति स एवास्मिन्नायुर्दधाति सर्वमायुरेति इति। कृष्णलाः सुवर्णशकला निय
वत्रयपरिमितानि तानि च शतसंख्याकानि यस्यां निर्वपणीयानि सेष्टिः शतकृष्णला। यदा वृद्धस्य भावात्सस्यानि
शुष्यंति मलमासश्चागतस्तदा कारीर्यो वृष्टिकामो यजेतेति च विहितेष्टिर्नकालविलंबं सहते। एवं स्मार्तान्य
प्यावश्यकानि उदाहरणानि नित्यनैमित्तिकयोरपि यद्यनन्यगतिकं। तदेव मलमासे कार्यं। अनन्यगतिकं नि
त्यं कुर्यान्नैमित्तिकं तथेति स्मरणात्॥ काठकगृह्येपि॥ मलेनन्यगतिं कुर्यान्नित्यां नैमित्तिकीं क्रियामिति। अ
नन्यगतिकानि च नित्यानि गृह्यपरिशिष्टे उदाहृतानि। अवषट्कारहोमाश्च पर्व चाग्रयणं तथा॥ मलमासे तु क
र्तव्यं काम्या इष्टिर्विवर्जयेइति। अवषट्कारहोमा अग्निहोत्रौपासनवैश्वदेवादयः। पर्व दर्शपूर्णमासौ पा
र्वणस्थालीपाकश्च। दर्शादीनां नित्यत्वमकरणे प्रत्यवायाद्वगंतव्यं। तथा चाथर्वणिकाश्चामनंति। यस्या
ग्निहोत्रमदर्शमपूर्णमासमनाग्रयणमतिथिवर्जितमहुतमवैश्वदेवमविधिना हुतं आसप्तमांस्तस्य लोका
न्हिनस्तीति॥ गत्यंतरयुक्तानि तु नित्यानि तत्र वर्ज्यानि। तदुक्तं काठकगृह्यपरिशिष्टे। सोमयागादिकर्माणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नित्यान्यपिमलिम्लुचे॥ षष्ठीष्ट्याग्रयणाधानचातुर्मास्यादिकान्यपि॥ महालयाष्टकाश्राद्धोपाकर्मादिचपिक
र्मयत्॥ स्पष्टमासविशेषाख्यविहितंवर्जयेन्मलइति। सोमयागोवसंतेविहितस्तस्यमलमासविवर्जनेपि
शुद्धमासेनुष्ठानसंभवात्सगतिकत्वं। षष्ठीष्टिःकाठकशाखादौप्रसिद्धा। नचाग्रयणस्यसगतिकागतिकयो
रुदाहरणविरुद्धमितिशंकनीयम्। तस्यमलमासेविकल्पितत्वात्॥ तदाहपैठीनसिः॥ संक्रांतिरहितेमासि
कुर्यादाग्रयणंनवेति। अनन्यगतिकानिनैमित्तिकानिग्रहणस्नानादीनितेषांमलमासेपिकर्त्तव्यतामाहय
मः। चंद्रसूर्यग्रहेस्नानंश्राद्धदानजपादिकं। कार्याणिमलमासेपिनित्यंनैमित्तिकं तथेति। सगतिकानितुनै
मित्तिकानिजातेष्ट्यादीनि। वैश्वानरंद्वादशकपालंनिर्वपेत् पुत्रेजातइतिविहितायाइष्टेराशौचेवसितेय
थानुष्ठानंतद्वन्मलमासेप्यवसितेनुष्ठातुंशक्यत्वात्सगतिकत्वंयथोक्तरीत्याकाम्यमावश्यकमनन्यगति
केनित्यनैमित्तिकेअपिमलमासेकार्याणिनेतराणीतिसामान्यतोवर्ज्यावर्ज्यविवेकः संपन्नस्तानिचकार्या
कार्याणिकालादर्शकारःसंगृह्योस्यमुदाजहार। द्वादशाहसपिंडांतंकर्मग्रहणजन्मनोः। सीमंतपुंसवेश्रा

CC-0. In Public Domain. Digitization by eGangotri

द्वंद्वावेतौजातकर्मच॥ रोगेशांतिरलब्धेचयोगेश्राद्धंव्रतानिच॥ प्रायश्चित्तंनिमित्तस्यवशात्पूर्वेपरत्रवा॥
अब्दोदकुंभमन्वादिमहालययुगादिषु। श्राद्धंदर्शोघहरहः श्राद्धमूनादिमासिकं। मलिम्लुचान्यमासेषुमृ
तानांश्राद्धमाब्दिकं। श्राद्धंतुपूर्वदृष्टेषु तीर्थेष्वेवयुगादिषु। मन्वादिषुचयद्दानंदानंदैनंदिनंचयत्॥ तिलगो
भूहिरण्यानांसंध्योपासनयोःक्रिया॥ पर्वहोमश्चाग्रयणंसाग्नेरिष्टिश्चपर्वणोः॥ नित्याग्निहोत्रहोमश्च
देवतातिथिपूजनं। स्नानंचस्नानविधिनाअभक्ष्यापेयवर्जनं॥ तर्पणंचनिमित्तस्यनित्यत्वादुभयत्रच।
अनित्यमनिमित्तंचदानंचमहदादिकं॥ अग्न्याधानाध्वरापूर्वतीर्थयात्रामरेक्षणं। देवारामतडागादि
प्रतिष्ठामौंजिबंधनं। आश्रमस्वीकृतिःकाम्यवृषोत्सर्गश्चनिष्क्रमः॥ राजाभिषेकः प्रथमश्चूडाकर्म
व्रतानिच। अन्नप्राशनमारंभोगृहाणांचप्रवेशनं॥ स्नानंविवाहोनामानितथाः पत्नं— महोत्सवं। व्रता
रंभंसमाप्तिंचकाम्यंकर्मचपाप्मनः॥ प्रायश्चित्तंतुसर्वस्यमलमासेविवर्जयेत्॥ उपाकर्मोत्सर्जनंचपवि
त्रदमनार्पणं॥ अवरोहश्चहैमंतः सर्पाणांबलिरष्टकाः॥ ईशानस्यबलिर्विष्णोःशयनंपरिवर्तनम्॥ दु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गेंद्रस्थापनोत्थाने ध्वजोत्थानं चवज्रिणः॥ पूर्वत्रप्रतिषिद्धानि परत्रान्यच्च दैविकमिति॥ अत्रद्वादशाहेत्यारभ्य।
नित्यत्वादुभयत्रचेत्यनेनग्रंथेनकर्त्तव्यसंग्रहः। अनित्यमनिमित्तंचेत्यारभ्यवर्जयेदित्यंतेनवर्ज्यसंग्रहः॥
उपाकर्मेत्यारभ्यपरत्रान्यच्च दैविकमित्यंतेनमलवर्जितानांसतांशुद्धमासेअवश्यककर्त्तव्यत्वेनसंग्रहः॥
अत्रचसर्वत्रसाक्षिवचनान्युदाहरामः॥यमः॥ गर्भेवार्द्धुषिके भृत्यश्राद्धकर्मणि मासिके। सपिंडीकरणे।
नित्येनाधिमासंविवर्जयेत्॥ तीर्थस्नानंजपो होमो यवव्रीहितिलादिभिः। जातकर्मांत्यकर्माणि नवश्राद्धंतथै
वच॥ मघात्रयोदशीश्राद्धं श्राद्धान्यपिचषोडश॥ चंद्रसूर्यग्रहे स्नानंश्राद्धदानजपादिकं॥ कार्याणि मलमासे।
पि नित्यंनैमित्तिकंतथेति॥ मासिकेश्राद्धकर्मणि॥ अमावास्याश्राद्धकर्मणीत्यर्थः। नित्येनित्यदानेहोमोत्रौ
पासनहोमः। अंत्यकर्माणि दहनोदकपिंडदानास्थिसंचयनादीनि। स्मृत्यंतरे। श्राद्धजातकनामानि येचसं
स्कारसव्रताः। मलिम्लुचेपिकर्त्तव्याइष्टीः काम्याश्चवर्जयेदिति॥ संस्काराअन्नप्राशननिष्क्रमणादयः। राम
सव्रताश्चातुर्मास्यव्रतादयः। गभस्तिः। एकोद्दिष्टंतुयच्छ्राद्धंतन्नैमित्तिकमुच्यते॥ तत्कार्यंपूर्वमासेचकालाधि ३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्येचधर्मतइति। गौतमः।जातकर्मणि यच्छ्राद्धं नवश्राद्धं तथैवच।ग्रहणे पुंसवादौ च तत्सूर्वत्र परत्र चेति नि
मित्तवशादितिवाक्यशेषः॥स्मृतिसंग्रहेपि॥जातकर्मच पुंसूतिः सीमंतोन्नयनं व्रतं॥मलिम्लुचेपिकर्त्तव्यं नि
मित्तं यदि जायतइति। मरीचिः॥रोगेचालभ्ययोगे च सीमंते पुंसवेपि च। यद् दातिसमुद्दिश्य पूर्वत्रापि न दुष्य
तीति॥निमित्तवशात्प्रायश्चित्तानि अच्छिद्रकांडे बहूनि श्रूयंते।आहिताग्निर्यदा अग्नीनन्वाधायेष्टिमकृत्वा ग्रा॰
मांतरे प्रयाणं कुर्यात्॥तदा तुभ्यं ता इति मंत्रेण जुहुयात्॥ तथा च श्रुतिः॥सर्वान्वा एषोग्नौ कामान्प्रवेशयति
योग्नीनन्वाधाय व्रतमुपैति स यदानिष्ट्वा प्रयायात् अकामप्रीता एनं कामा नानुप्रयायुः। अतेजा अवीर्यः स्या
त् स जुहुयात्तुभ्यं ता अंगिरस्तम विश्वाः सुक्षितयः पृथक्।अग्ने कामाय येमिर इति॥ काममेवास्मिन्दधाति॥
कामप्रीता एनं कामा अनुप्रयांति तेजस्वी वीर्यवान् भवति॥यस्योभयं हविरार्त्तिमार्छेत्॥ऐंद्रं पंचशरावमो
दनं निर्वपेदिति॥कौथुमिः। अब्दमंबुघटं दद्यादन्नं चापि सुसंचितं। संवत्सरे विरुद्धेपि प्रतिमासं च मासिकं
मिति। मरीचिः।प्रतिमासं मृताहे यत् श्राद्धं च प्रतिवत्सरं॥मन्वादौ च युगादौ च मासयोरुभयोरपीति॥ म॰

CC-0. In Public Domain. Digitization by eGangotri

त्स्यपुराणे॥ वर्षेचाहरहः श्राद्धंदानंचप्रतिवासरं॥ गोभूतिलहिरण्यानांमासेपिस्यान्मलिम्लुचइति॥ एवम
भ स्यापेयवर्जनसंध्यावंदनादिष्वपिविशेषतः साक्षिवचनान्युदाहरणीयानि॥ सामान्यतस्तुनित्यनैमि
त्तिकेकुर्यात्त्वयतः सन्मलिम्लुचइतिबृहस्पतिवचनंपूर्वमेवोदाहृतं॥ ननुउदाहृतेषुसंग्रहवचनेषुभाद्रप
दापरपक्षश्राद्धस्याप्युभयत्रकर्तव्यताप्रतीयते॥ महालययुगादिष्वितितत्रपठितत्वात्॥ साचोभयत्रकर्त्तव्य
तास्मृतिविरुद्धा॥ महालयाष्टकाश्राद्धेतिकाठकगृह्येवर्ज्यत्वस्मरणं पूर्वमुदाहृतं॥ भृगुरपि॥ वृद्धिश्राद्धंत
थासोममग्न्याधेयंमहालयं॥ राजाभिषेकंकाम्यंचनकुर्याद्भानुलंघिते इति॥ नागरखंडेपि॥ नभोवाथनभ॰
स्योवामलमासोयदाभवेत्॥ सप्तमः पितृपक्षस्यादन्यत्रैवतुपंचमइति॥ आषाढीमवधिंकृत्वासप्तमपंच॰
मोद्रष्टव्यौ॥ आषाढ्याः पंचमेपक्षेइतिवचनादाषाढमासस्यांत्यभागेकर्कटसंक्रांतौनभसोधिकमासत्वं॥
श्रावणमास — स्यांत्यभागेसिंहसंक्रांतौनभस्यस्याधिकमासत्वं॥ तयोरुभयोरपिपक्षयोः कन्यायांवर्त्त॰ राम
मानेसवितरियः कृष्णपक्षः ससप्तमोभवति॥ असतितुद्विविधेधिकमासे पंचमः॥ तथासतिसप्तमेविहित ३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यापरपक्षश्राद्धस्यमलिननभस्यकृष्णपक्षेनुष्ठानमयुक्तं॥ नायंदोषः॥ संग्रहवाक्यगतमहालयशब्देनती
र्थविशेषस्यवामघात्रयोदश्यावाविवक्षणीयत्वात्॥ ननुमलिम्लुचान्यमासेषुमृतानांश्राद्धमाब्दिकमिति
प्रतिसंवत्सरंप्राप्यमाणस्यमृतश्राद्धस्यमासद्वयकर्त्तव्यतासंग्रहेदर्शिना॥ सानयुक्ता॥ मलमासेतन्नि
षेधात्॥ तथाचसत्यव्रतः॥ वर्षेवर्षेतुयच्छ्राद्धंमातापित्रोर्मृतेहनि॥ मलमासेनकर्त्तव्यंव्याघ्रस्यवचनंय
थेति। सत्यतपाः॥ वर्षेवर्षेतुयच्छ्राद्धंमृताहनिमलिम्लुचे। कुर्यात्तत्रप्रमीतानांअन्येषामुत्तरत्रत्विति॥ पैठीन
सिः॥ मलमासमृतानांतुश्राद्धंयत्प्रतिवत्सरं॥ मलमासेतुकर्त्तव्यंनान्येषांतुकदाचनेति॥ अतःशुद्धमासमृता
नांमलमासेमृताहश्राद्धकर्त्तव्यताविधानमयुक्तं॥ नैषदोषः॥ तस्याभिधानस्यप्रथमाब्दिकविषयत्वात्॥
आब्दिकंप्रथमंयत्स्यात्तत्कुर्वीतमलिम्लुचइतिस्मरणात्॥ तथाहारीतोपि॥ असंक्रांतेपिकर्त्तव्यमाब्दिकं
प्रथमंद्विजैः॥ तथैवमासिकंश्राद्धंसपिंडीकरणंतथेति॥ लघुहारीतोपि॥ प्रत्यब्दंद्वादशेमासिकार्यापिंडक्रि
यासुतैः॥ क्वचित्त्रयोदशेपिस्यादाद्यंमुक्त्वानुवत्सरमिति॥ अत्रद्वादशेमासेपूर्णेसतिअनंतरदिनेकार्यंत्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्याख्येयं॥ मासपक्षतिथिस्पृष्टे यो यस्मिन्म्रियते ह्नि॥ प्रत्यब्दं तु तथाभूतं क्षयाहं तस्य तं विदुरिति व्यासेना ब्दिकदिनस्य विशेषितत्वात्॥ केचित्तु॥ आद्यंमुक्त्वा तु वत्सरमित्येनदं तराधिमासेपि योजयित्वा कार्त्तिकप्रमी तस्य प्रथमाब्दिकमाश्वयुजे कुर्वंति॥ तदयुक्तं॥ मासपक्षेति वचनविरोधात्॥ अंतिमाधिमासविषये तु यथोक्त री त्योपपद्यते॥ तस्माच्छुद्धमासप्रमीतानां प्रथमाब्दिकं मलमासे कर्त्तव्यं द्वितीयाद्याब्दिकं शुद्धमास इत्येत याविवक्षयोभयत्र कर्त्तव्यतोक्ता। मलमासमृतानां यदि कदाचित्स एव मलमास आगतः। तदा तत्प्रत्याब्दि कं मलमासे एव कर्त्तव्यं न तूपरितनेशुद्धमासे। तथा च भृगुः। मलमासमृतानां तु यच्छ्राद्धं प्रतिवत्सरं॥ मलमा से तु तत्कार्यं नान्येषां तु कदाचनेति॥ अतो मलमासमृतानां तु कादाचित्कं प्रत्याब्दिकं मलमासे कार्यं॥ शुद्धमा समृतानां च प्रथमाब्दिकं तत्र कार्यं॥ द्वितीयाद्याब्दिकं तु शुद्धमास इति एतं निर्णयमभिप्रेत्य पितृकार्याणि चो भयोरित्यादीनि वचनानि प्रवृत्तानि॥ अनित्यमनिमित्तं चेत्यादिना यानि वर्ज्यानि संगृहीतानि तेषु स्मृत यउ॰ दाह्रियंते॥ तत्र वृद्धमनुः॥ अग्न्याधेयं प्रतिष्ठां च यज्ञदानव्रतानि च॥ वेदव्रतवृषोत्सर्गचूडाकरणमेखलाः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मांगल्यमभिषेकंच मलमासे विवर्जयेत्॥ बाले वा यदि वा वृद्धे शुक्रे वास्तमुपागते॥ मलमास इवैता॰
निवर्जयेद्देवदर्शनमिति॥ पैठीनसिज्योतिःपराशरयोरप्येवमेवपाठः॥ कौशुमिः॥ अधिमासे न कर्त्तव्ये श्रा
द्धे संवत्सराब्दिके॥ वर्षवृध्यभिषेकादि कर्त्तव्यमधिके न तु॥ अधिमासे न कर्त्तव्यं श्राद्धमाभ्युदयं तथा॥
तथैव काम्यं यत्कर्म वत्सरास्तथमाहृते॥ सपिंडीकरणादूर्ध्वं यत्किंचिच्छ्राद्धिकं द्विजैः। इष्टं वाप्यथवा पूर्त्तं त
न्न कुर्यान्मलिम्लुचइति॥ असंक्रांतप्रकृत्यज्योतिः शास्त्रे। तत्र दत्तमदत्तं वा हुतं न हुतमेव वा॥ सुजन्तम॰
प्युज्जन्तंस्यान्नोपवासः कृतं भवेत्॥ न यात्रां न विवाहं तु न च वास्तु निवेशनं॥ न प्रतिष्ठां च देवानां प्रासादस्यामर॰
भूरुहां॥ न हिरण्यं न वासांसि कारयेदिति निश्चयइति॥ स्मृत्यंतरेपि॥ वापीकूपतडागादिप्रतिष्ठायज्ञकर्म च
॥ न कुर्यान्मलमासे च महादानफलानि चेति॥ महादानानि तुलापुरुषादीनि षोडशापि मत्स्यपुराणोक्ता
नि कनकादीनि दश कूर्मपुराणोक्तानि एवमन्यान्यपि प्रतिषेधवचनान्युदाहरणीयानि॥ उपाकर्मोत्सर्जनं
चेत्यादिनाशुद्धमास एव कर्त्तव्यान्युक्तानि॥ तत्र ज्योतिः पराशरः॥ रविणा लंघितो मासश्चांद्रः ख्यातो मलि॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तुवः॥तत्र यद्विहितं कर्म उत्तरे मासि कारयेदिति। प्रजापतिः॥उपाकर्म च हव्यं च कव्यं पर्वोत्सवं तथा॥उत्तरे नि
यतं कुर्यात्पूर्वं तन्निष्फलं भवेदिति॥ हारीतोपि॥उपाकर्म तथोत्सर्गकाम्यमुत्सवमष्टकाः॥मासवृद्धौ पराः का
र्या वर्जयित्वा तु पैतृकमिति॥ज्योतिःपितामहोपि। मासः कन्यागते भानावसंक्रांतो भवेद्यदि॥दैवं पित्र्यं तदा कर्म
तुलास्थे कर्त्तुरक्षयमिति॥ अत्र कन्यागते सवितरि पोऽसंक्रांतः असौ मलिन आश्वयुजः॥भाद्रपदांते कन्याप्र
वेशात्॥एवं च सति कन्यामुपजीव्य विहितं यद्दैवं पित्र्यं च तन्मलिन आश्वयुजे न कर्त्तव्यं किं तर्हि॥तुलासंक्रां
त्युपेते शुद्ध आश्वयुजे॥ नन्वेवं सति महालयापरपक्षश्राद्धस्यापि तुलामासे कर्त्तव्यता प्रसज्यते॥तस्यापि
कन्यामुपजीव्य विहितत्वात्॥ तथा च पुराणं॥कन्यागते सवितरि यान्यहानि तु षोडश॥क्रतुभिस्तानि तुल्या
नि पितॄणां दत्तमक्षयमिति॥मैवं॥ भाद्रपदकृष्णपक्षस्य कन्यासंक्रांतिस्पर्शित्वेन कन्योपजीवित्वोप्यपरपक्ष-
स्य तुलामासेनुष्ठातुमशक्यत्वात्॥ तथा च कार्ष्णाजिनिः॥अंते वा यदि वा मध्ये यत्र कन्यां रविर्व्रजेत्॥स प
क्षः पंचमः पूज्यः श्राद्धषोडशकं प्रतीति। बृहन्मनुरपि। मध्ये वा यदि वाप्यंते यत्र कन्यां रविर्व्रजेत्॥स पक्षः स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कलः पूज्यः श्राद्धं तत्र विधीयत इति ॥ किंच ॥ नेदमपरपक्षश्राद्धं कन्यासु पजीवतितस्यामनादरस्मरणा
त् ॥ तथाच जातूकर्ण्यः ॥ आषाढीमवधिंकृत्वा यः स्यात्पक्षस्तु पंचमः ॥ श्राद्धकालः स विज्ञेयः कन्यांगच्छ
तु वा न वेति ॥ अतः कन्यागते सवितरीति वचनं कृष्णपक्षस्य कन्यायोगं प्रशंसति ॥ अत एव क्रतुभिस्तानि
तुल्यानीति तत्रैवोक्तं ॥ एवं सति तुलास्थे कर्त्तुरक्षयमिति वचनं महालयव्यतिरिक्तविषयं ॥ अथवा महाल
यस्यापि गौणकालनिषेधात् ॥ तदर्थं तदुक्तं ॥ तथाहि कन्यासंक्रांतियुक्तो भाद्रपदकृष्णपक्षस्तस्य मुख्यः
कालः केनापि निमित्तेन मुख्यकालासंभवे यावद्वृश्चिकदर्शनं तस्य गौणकालः स्मृतिसिद्धः । तत्र किं कन्यायु
क्ते मलिनाश्वयुजे तच्छ्राद्धं कर्त्तव्यं उत कन्यारहिते तु लोपे ते शुद्धाश्वयुज इति वीक्षायां तुलास्थे कर्त्तुरक्षय
मिति विधीयते ॥ एवमन्यान्यपि उत्तरमासैककर्त्तव्यविषयाणि वचनान्युदाहार्याणि ॥ तदेवं कार्याकार्यवि
वेकः पंचधा संपन्नः ॥ तत्र किंचिन्मलमास एव कर्त्तव्यं ॥ तद्यथा ॥ मलमासमृतानां यदाकदाचित्सत्याब्दिकं ॥
अन्यमासमृतानां प्रथमाब्दिकंच ॥ किंचित् शुद्धमास एव कर्त्तव्यम् ॥ तद्यथोपाकर्मादि ॥ किंचिदुभयत्रापि

कर्तव्यं। तद्यथाब्दोदकादि॥ किंचिदुभयोरन्यतरस्मिन्निमित्तवशात्कर्तव्यं॥ तद्यथाद्वादशाहसपिंडानादि
॥ किंचिन्मलमासेवर्ज्यं तद्यथाअनित्यमनिमित्तंचेत्यादि॥ अथमलमासस्यैवद्विराषाढसंज्ञकोविशेषउ-
च्यते॥ तत्रवृद्धमिहिरः॥ माधवाद्येषुषट्स्वेकमासिदर्शद्वयंयदाद्विराषाढःसविज्ञेयः शेतेकर्कटकेच्युतइ-
ति॥ इयंचद्व्याषाढसंज्ञाउत्तरभाविनिसंवत्सरेहरिस्वापविवेकायोपयुज्यते॥ अतएववृद्धमिहिरः॥ मेषा-
दिमिथुनांतेषुयदादर्शद्वयंभवेत्॥ अब्दांतरेतदावश्यंमिथुनार्केहरिःस्वपेत्॥ कर्कटादित्रिकेवापियदादर्श-
द्वयंभवेत्॥ अब्दांतरेतदावश्यंकर्कटार्केहरिःस्वपेदिति॥ ॥ इतिमलमासनिर्णयः॥ ॥ अथपक्षः॥ ॥
पक्षशब्दः पक्षपरिग्रहइत्यस्माद्धातोर्निष्पन्नः॥ देवकार्यार्थंवापितृकार्यार्थंवापक्ष्यतेपरिगृह्यतेयः काल-
विशेषः सपक्षः॥ अथवाचंद्रस्यपंचदशानांकलानामापूरणंक्षयोवायस्मिन्गृह्यतेसपक्षः॥ तथाचवा-
जसनेयिनश्चंद्ररूपस्यसंवत्सरनिर्वाहकस्यप्रजापतेः कलापूरणापक्षयावामनंति॥ सएषसंवत्सरःप्रजाप- राम
तिः षोडशकलः तस्यरात्रयएवपंचदशकलाः ध्रुवैवास्यषोडशीकलासरात्रिभिरेवापूर्यतेपक्षीयतइ- ३८

ति तथा त एव पंचाग्निविद्यायां दक्षिणोत्तरमार्गयोः कृष्णशुक्लपक्षावपक्षयपूरणात्मकौ इष्टापूर्त्तादिका
रिभिरुपासकैश्च प्राप्येते इति पठंति॥ अथ ये यज्ञेन दानेन तपसा लोकं जयंति ते धूममभिसंभवंति धूमाद्रा
त्रिं रात्रेरपक्षीयमाणपक्षमिति ते य एवमेतद्विदुः॥ ये चामी अरण्ये श्रद्धामुपासते तेनेर्चिरभिसंभवंत्यर्चि
षोहरन्हः आपूर्यमाणपक्ष इति च॥ तैत्तिरीयाश्च सावित्रचयने पूर्वोत्तरपक्षौ प्रत्येकं पंचदशाहोरात्रका
वामनंति संज्ञानं विज्ञानं दर्शा दृष्टेति एतावनुवाकौ पूर्वपक्षस्याहोरात्राणां नामधेयानि प्रस्तुतं विष्टुतं सुतासु
न्वतीत्येतावनुवाकावुत्तरस्याहोरात्राणां नामधेयानीति॥ अयमर्थः॥ ॥संज्ञानं विज्ञानमित्येकोनुवा
को मंत्रकांडे पठितः। तस्मिन्ननुवाके शुक्लपक्षस्याह्नां नामधेयानि पंचदश नपुंसकानि पठ्यंते॥ दर्शा दृ
ष्टेत्यपरोनुवाक — स्तत्र शुक्लपक्षस्य रात्रीणां नामधेयानि पंचदश स्त्रीलिंगानि पठितानि॥ तथा प्रस्तुतं वि
ष्टुतमित्येकोनुवाकः सुतासुन्वतीत्यपरोनुवाकस्तावुभौ कृष्णपक्षविषयौ पूर्ववद्योजनीयाविति॥ ते चानुवा
का एवं श्रूयंते॥ संज्ञानं विज्ञानं प्रज्ञानं जानदभिजानत्संकल्पमानं प्रकल्पमानमुपकल्पमानमुपक्लृप्तं क्लृप्तं

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

 श्रेयो वसीय ॥ आयत्सं भूतं भूतं ॥ दर्शा दृष्टा दर्शना विश्वरूपा सुदर्शना ॥ आप्यायमाना प्यायमाना प्याया
 सूनृतेरा आपूर्यमाणा पूर्यमाणा पूरयंती पूर्णा पौर्णमासी ॥ प्रस्तुतं विष्टुतं संस्तुतं कल्याणं विश्वरूपं सु
क्रममृतं तेजस्वि तेजः समिद्धं अरुणं भानुमन्मरीचिमदभितपत्तपस्वत् ॥ सुता सुन्वती प्रसूता सूयमाना
भिषूयमाणा पीती प्रपा संपा तृप्तिस्तर्पयंती कांता काम्या कामजाता युष्मती कामदुघेति ॥ रूढो वायं पक्षश
ब्दः ॥ स च द्वेधा विभक्तस्य मासस्यैकैकमर्धं ब्रूते ॥ पंचदशस्तोमनामकेन साम समूहेन मध्ये छिन्नस्य
त्रिवृत्स्तोमकनामकस्य साम समूहस्य पूर्वोत्तर भागाभ्यां मुसन्नत्वात्तयोः पूर्वापरपक्षत्वं। तौ च द्वौ पक्षा
वनु देवानामसुराणां च क्रमेण सृष्टत्वात्तयोः पक्षयोः प्रशस्तत्वाप्रशस्तत्वे तदेतत्सर्वं होतृब्राह्मणे तैत्तिरी
याः पठंति ॥ प्रजापतिरकामयत । प्रजायेयेति स तपोतप्यत स त्रिवृतं स्तोममसृजत तं पंचदशस्तोमो मध्यत
उदतृणत् तौ पूर्वपक्षश्चापरपक्षश्चाभवतां पूर्वपक्षं देवा अन्वासृज्यंत अपरपक्षमन्वासुराः ॥ ततो देवा अ
भवन्पराऽसुराः यं कामयेत वसीयान् स्यादिति तं पूर्वपक्षे याजयेत् ॥ वसीयानेव भवती यं कामयेत पापीया

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्स्यादितितमपरपक्षेयाजयेत्॥ पापीयानेवभवतितस्मात्पूर्वपक्षोपरपक्षात्करुण्यतरइति। वसीयान्वसुमत्त
रः॥ पापीयान्द्रव्यहीनः॥ कर्तॄणांशुभफलप्रापकत्वेनकरुणामतिशयेनार्हतीतिकरुण्यतरः। तदेवमस्मिन्प्रकर
णेसंवत्सरायणर्त्तुमासपक्षानिर्णीताः॥ ॥ इतिश्रीमाधवीयेकालनिर्णयेसंवत्सराख्यंद्वितीयंप्रकरणम्॥ ॥
॥ अथतिथयोनिर्णीयंते॥ ॥ तत्रतिथिशब्दस्तनोतेर्धातोर्निष्पन्नः॥ तनोतिविस्तारयतिवर्द्धमानांक्षीयमाणां
वाचंद्रकलामेकांयः कालविशेषः सातिथिः॥ यद्वायथोक्तकलयातन्यतइतितिथिः॥ तदुक्तंसिद्धान्तशिरोमणौ
॥ ॥ तन्यतेकलयायस्मात्तस्मात्तास्तिथयः स्मृता इति॥ एतदेवाभिप्रेत्यस्कांदे पठ्यते॥ अमाषोडशभागेनदे
विप्रोक्तामहाकला॥ संस्थितापरमामायादेहिनांदेहधारिणी॥ अमादिपौर्णिमास्यंतायाएवशशिनः कलाः
तिथयस्ताः समाख्याताःषोडशैववरानन इति॥ अयमर्थः॥ यामहामायाआधाररूपादेहिनांदेहधारिणी॥
संस्थितासाचंद्रमंडलस्यषोडशभागेनपरिमिताचंद्रदेहधारिण्यमानाम्नीमहाकलेतिप्रोक्ताक्षयोदयरहि
तानित्यातिथिसंज्ञकैव॥ इतराअपिपंचदशकलादिवसव्यवहारोपयोगिन्यः क्षयोदयवत्यः पंचदशातिथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का॰मा॰ यो भवंतीति तिथयः षोडशैवेत्यविरुद्धं वचनमिति ॥ कृतिस्त्वस्मिन्नेवार्थे पक्षनिर्णय एवोदाहृता ॥ तस्यरात्र
४० यः पंचदशकला ध्रुवैषास्य षोडशी कलेति ॥ एवं सत्यत्र सामान्यविशेषरूपेण तिथिद्वैविध्यमुक्तं भवति ॥ तत्र
येयममैत्युक्ता क्षयोदयवर्जिता ध्रुवा षोडशी कला तद्युक्तः कालस्तिथिमात्रान्वं । यास्त्ववशिष्टा वृद्धिक्षयोपे
ताः पंचदशकलास्ताभिर्विशिष्टाः कालविभागास्तिथिविशेषास्तासां पंचदशानामेकैकां कलां वन्ह्यादयः प्र
जापत्यंताः पंचदश देवताः क्रमेण पिबंति ॥ तत्र वन्हिपेया कला प्रथमं पीयत इति प्रथमेत्युच्यते । तयायुक्तः
कालविशेषः प्राथम्यवाचिना प्रतिपच्छब्देनाभिधीयते ॥ एवं द्वितीयादीनां पंचदश्यंतानां तिथीनां नामा
न्यवगंतव्यानि ॥ ता एताः कृष्णपक्षतिथयो भवंति ॥ पुनश्चताः पीताः कला अनेनैव क्रमेण तत्तस्मात्
वन्ह्यादिदेवताभ्यो निर्गत्य चंद्रमंडलं पूरयंति ॥ ताभिर्युक्ताः कालविशेषाः शुक्लपक्षगताः प्रतिपदाद्या
स्तिथयो भवंति ॥ वन्ह्यादिदेवतानां कलापाने सोमो तत्त्तोपन्यते ॥ तथाहि ॥ प्रथमां पिबते वन्हिर्द्वितीयां ऱाम
पिबते रविः ॥ विश्वेदेवास्तृतीयां तु चतुर्थी सलिलाधिपः ॥ पंचमीं तु वषट्कारः षष्ठीं पिबति वासवः ॥ सप्तमी ४०

CC-0. In Public Domain. Digitization by eGangotri

मृषयो द्वितीयामष्टमीमजएकपात्॥ नवमीं कृष्णपक्षस्य यमः प्राश्नाति वै कलां॥ दशमीं पिबते वायुः पिबत्ये
कादशीं मुमा॥ द्वादशीं पितरः सर्वे समं प्राश्नंति भागशः॥ त्रयोदशीं धनाध्यक्षः कुबेरः पिबते कलां॥ चतुर्दशीं
पशुपतिः पंचदशीं प्रजापतिः॥ निष्पीतः कलावशेषश्चंद्रमा न प्रकाशते॥ कला षोडशिका या तु अपः प्रविशते
सदा॥ अमायां तु सदा सोम औषधीः प्रतिपद्यते॥ तमोषधिगतं गावः पिबंत्यंबुगतं च यत्॥ तत्क्षीरममृतं भू
त्वा मंत्रपूतं द्विजातिभिः॥ हुतमग्निषु यज्ञेषु पुनराप्यायते शशी॥ दिने दिने कलावृद्धिः पौर्णमास्यां तु पूर्यते इति
॥ ज्योतिःशास्त्रे तु सिद्धान्तशिरोमणिकारेण तिथिरेवं प्रदर्शिता॥ अर्काद्विनिसृतः प्राचीं यद्यात्यहरहः शशी॥
तच्चांद्रमानमंशैस्तु ज्ञेया द्वादशभिस्तिथिरिति॥ अयमर्थः॥ सूर्यमंडलस्य अधःप्रदेशवर्ती शीघ्रगामी चंद्र
ऊर्ध्वप्रदेशवर्ती मंदगामी सूर्यस्तथा सति तयोर्गतिविशेषवशात्॥ दर्शे चंद्रमंडलमन्यूनमनतिरिक्तं सूर्यमं
डलस्याधोभागे व्यवस्थितं भवति तदा सूर्यरश्मिभिः साकल्येनाभिभूतत्वाच्चंद्रमंडलमीषदपि न दृश्यते।
उपरितने शीघ्रगत्या सूर्याद्विनिःसृतः शशी प्राचीं याति॥ त्रिंशदंशोपेत राशौ द्वादशभिरंशैः सूर्यमुल्लंघ्य ग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

च्छति॥ तथा चंद्रस्य पंचदशसु भागेषु प्रथमभागो दर्शनयोग्यो भवति॥ सोयं भागः प्रथमकलेत्यभिधीय
ते॥ तत्कलानिष्पत्तिपरिमितः कालः प्रतिपत्तिथिर्भवति॥ एवं द्वितीयादितिथिष्ववगंतव्यमिति॥ तदेतद्विष्णु
धर्मोत्तरे विस्पष्टमभिहितं॥ चंद्रार्कगत्या कालस्य परिच्छेदो यदा भवेत्॥ तदा तयोः प्रवक्ष्यामि गतिमाश्रित्य नि
र्णयं॥ भगणेन समग्रेण ज्ञेया द्वादशराशयः॥ त्रिंशांशश्च तथा राशेर्भाग इत्यभिधीयते॥ आदित्याद्विप्रकृष्ट
स्तु भागद्वादशकं यदा॥ चंद्रमाः स्यात्तदा राम तिथिरित्यभिधीयते इति॥ सेयं द्वादशभिर्भागैः सूर्यमुल्लंघित
वती प्रथमा चंद्रकला शृंगद्वयोपेतसूक्ष्मरेखाकारा शौक्ल्यमीषदुपयाति॥ उत्तरोत्तरदिनेषु सूर्यमंडलविप्र
कर्षतारतम्यानुसारेण शौक्ल्यमुपचीयते॥ अनयैव रीत्या सन्निकर्षतारतम्येन मेचकत्वमुपचीयते॥ तदेतदु
क्तं सिद्धांतशिरोमणौ॥ उपचयमुपयाति शौक्ल्यमिंदोस्त्यजत इनं व्रजतश्च मेचकत्वं॥ जलमयजलजस्य
गोलकत्वात् प्रभवति तीक्ष्णविषाणरूपतास्येति॥ सूर्यचंद्रमसोर्यौ निकर्षविप्रकर्षौ तयोरवसानं दर्शपूर्णि
मयोः संपद्यते॥ तदाह गोभिलः॥ यः परो विप्रकर्षः सूर्याचंद्रमसोः सा पौर्णमासी। यः परः सन्निकर्षः सा मा॰

CC-0. In Public Domain. Digitization by eGangotri

वास्येति॥ नन्वत्र चंद्रकलानां सूर्यप्रवेशनिर्गमौ प्रतीयेते सोमोत्पत्तौ तु वन्ह्यादिदेवतासु नायं दोषः॥ अस्मदा
दिदर्शनापेक्षया ज्योतिःशास्त्रस्य प्रवृत्तत्वात्॥ सोमोत्पत्तौ तु वन्ह्यादिदेवतानां तत्तत्कलाप्रयुक्ता तृप्तिर्विवर
क्षिता॥ यदि सूर्ये प्रवेशनिर्गमौ यदि वा वन्ह्यादिदेवतासु सर्वथापि कलाप्रयुक्ता एव प्रतिपदादितिथयः॥ ननु
सावनदिनेषु सौरदिवसेषु च निर्णयमुपेक्ष्य चांद्र तिथिष्वेव कुतो निर्णयोद्यम इति चेत्॥ संदेहसद्भावादिति
ब्रूमः॥ न खलु सौरसावनदिवसयोः संदेहसद्भावोस्ति नियतपरिमाणत्वात्॥ तच्च ब्रह्मसिद्धांते भिहितं॥ सा
वनं स्यादहोरात्रमुदयादोदयाद्रवेः॥ रवेस्त्रिंशस्तु राश्यंशस्तिथिसंभोगएवं दिवमिति॥ एकस्मिन् राशौ यावं
तं कालं रविर्वर्त्तते तावतः कालस्य त्रिंशो योयमंशः स सौरो दिवसः तिथिरेका कलातत्संभोगइंद्रो यावता का
लेन निष्पद्यते तदैंदवं दिनं॥ न चात्र सौरसावनयोरिव चांद्रेपि दिने संदेहाभावः शंकनीयः ह्रासवृद्धिवशेन
संदेहसद्भावात्॥ ह्रासवृद्धी च गर्गेण दर्शिते॥ खर्वो दर्पस्तथा हिंस्त्रस्त्रिविधं तिथिलक्षणं॥ धर्माधर्मवशादे
वं तिथिस्त्रेधा विवक्षितेति॥ खर्वा समतिथिः॥ दर्पा वृद्धियुक्ता हिंस्त्रा क्षययुक्ता॥ नस्यैतस्य त्रैविध्यस्य विप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रिवर्तेन विशेषेण तिथिः संपूर्णा खंडा चेति द्वैविध्यमापद्यते॥ तत्र संपूर्णा स्कंदपुराणे दर्शिता॥ प्रतिपत्प्रभृतयः सर्वा उदयादोदयाद्रवेः॥ संपूर्णा इति विख्याता हरिवासरवर्जिता इति॥ हरिवासर एकादशी॥ यात्तूक्तलक्षणा सा खंडतिथिः॥ तत्र संपूर्णायां विधिनिषेधयोर्नास्ति संदेहः॥ खंडतिथौ तु विधिनिषेधव्यवस्थामाह गार्ग्यः॥ निमित्तं कालमादाय वृत्तिर्विधिनिषेधयोः॥ विधिः पूज्यतिथौ तत्र निषेधः कालमात्रके॥ तिथीनां पूज्यता नाम कर्मानुष्ठानयोग्यता॥ निषेधस्तु निवृत्यात्मा कालमात्रमपेक्षते इति॥ एवं च सति खंडतिथौ पूज्यत्वं निर्णेतव्यं भवति॥ तत्र प्रतिपदमारभ्य पंचदश्यंतास्तिथयः क्रमेण निर्णीयंते॥ तत्र प्रतिपच्छब्द उपक्रमे वर्त्तते॥ चांद्रः पक्षो मासो वा प्रतिपद्यते आरभ्यते यस्यां तिथौ सा तिथिः प्रतिपत्॥ आरंभवाचित्वं च प्रतिपच्छब्दस्य बह्वृचब्राह्मणारण्यकसूत्रेषु प्रयोगादवगम्यते॥ तथा च श्रुतिः॥ आत्वा रथं यथोतय इदं वसो सुतमंध इति मरुत्वतीयस्य प्रतिपदनुचराविति॥ अयमर्थः॥ मरुत्वतीयं नाम किंचिच्छस्त्रं॥ तस्यात्वा रथमित्ययं मंत्रः प्रतिपत्प्रथमं पाठ्यः॥ इदं वसो सुतमंध इत्ययं मंत्रोनुचरः पश्चात्पाठ्य इति॥ तथा तैत्तिरीयाश्वमेधब्राह्म

CC-0. In Public Domain. Digitization by eGangotri

णआमनंति॥ पवस्ववाजसातय इत्यनुष्टुप्प्रतिपद्वतीति॥ तथात एव दर्शपूर्णमासब्राह्मणे पठंति सामि
धेनीरनुवक्ष्यंतेताव्याहृतीः पुरस्ताद्दध्यात् ब्रह्मैव प्रतिपदं कुरुत इति॥ साच प्रतिपत्तिथिर्यदा सूर्योदयमारभ्य
पुनरुदयपर्यंता भवति तदा शुद्धत्वात्प्रतिपदि विहितं सर्वं निःशंकैस्तत्रानुष्ठेयं शुद्धत्वं च नारदीयपुराणे द
र्शितम्॥ आदित्योदयवेलाया आरभ्य षष्टिनाडिका तिथिस्तु सा हि शुद्धा स्यात्सर्वतिथिष्वयं विधिरिति॥ सूर्यसि
द्धांतेपि॥ सर्वा ह्येतास्तिथयउदयादोदयं स्थिताः॥ शुद्धा इति विनिर्दिष्टाः षष्टिर्नाड्यो हि वै तिथिरिति॥ यदा
तु सा प्रतिपत्खंडतिथिः सती पूर्वोत्तरयोरन्होर्दर्शद्वितीयाभ्यां युज्यते तदा दर्शयुक्ताया ग्राह्यत्वात्तत्रानुष्ठेयम्॥
तद्ग्राह्यत्वं च पैठिनसिराह॥ पंचमी सप्तमी चैव दशमी च त्रयोदशी॥ प्रतिपन्नवमी चैव कर्तव्या संमुखी तिथि
रिति॥ संमुखत्वं च स्कंदपुराणे विवेचितम्॥ ॥संमुखी नाम सायान्हव्यापिनी दृश्यते यदा॥ प्रतिपत्संमु
खी कार्या या भवेदापराण्हिकी॥ व्यासोपि॥ प्रतिपत्सैव विज्ञेया या भवेदपराण्हिकी॥ दैवं कर्म तथा ज्ञेयं पै
त्र्यं च मनुरब्रवीत्॥ सायान्हापराण्हादयः कालविशेषाः सावनदिवसगतस्यान्हो भागभेदा अवगंतव्याः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सचदिवसोविष्णुधर्मोत्तरेविवेचितः॥लघ्वक्षरसमामात्रानिमेषः परिकीर्त्तितः॥अतः सूक्ष्मतरः कालो
नोपलभ्योभृगूत्तम॥ नोपलभ्यंयथाद्रव्यंसुसूक्ष्मंपरमाणुतः॥ द्वौनिमेषौत्रुटिर्ज्ञेयाप्राणोदशत्रुटिः स्मृतः॥
विनाडिकातुषट्प्राणास्तेषष्टिर्नाडिकास्मृता॥अहोरात्रंतुतत्षष्ट्यानित्यमेतत्प्रकीर्त्तितम्॥त्रिंशन्मुहूर्त्ताश्च
तथाअहोरात्रेणकीर्त्तिताः॥तत्रपंचदशप्रोक्तारामरात्रिर्दिवातथा॥उत्तरांतुयदाकाष्ठांक्रमादाक्रमतेरविः॥
तदातदाभवेद्वृद्धिर्दिवसस्यमहाभुज॥दिवसश्चयदारामवृद्धिंसमधिगच्छति॥ तदाश्रितमुहूर्त्तानांतदावृ
द्धिः प्रजायते॥दिनवृद्धौरात्रिहानिस्तद्धानिश्चयथायथा॥ तदाश्रितमुहूर्त्तानांहानिर्ज्ञेयातथातथा॥ दक्षिणां
चयदाकाष्ठांक्रमादाक्रमतेरविः॥दिवसस्यतदाहानिर्ज्ञातव्यानावदेवतु॥ क्षीयंतेतस्यहानौचतन्मुहूर्त्ता
स्तथैवच॥रात्र्याश्रिताश्चवर्द्धंतेरात्रिवृद्धिस्तथैवच॥ यदामेषंसहस्रांशुस्तुलांचैवप्रपद्यते॥समरात्रंदिवः
कालोदिनशब्दस्यवाचकइति॥वाचकोवाच्यार्थइतियावत्॥ अत्रयेमुहूर्त्ताअभिहितास्तेषांनामानिश्रुति॰

ज्योतिःशास्त्रस्मृतिषुविविधानिदर्शितानि॥तत्रश्रुतिंतावत्तैत्तिरीयाःपठंति॥चित्रःकेतुर्दाताप्रदातासविता

CC-0. In Public Domain. Digitization by eGangotri

प्रसविता अभिशास्तानुमन्तेति एतेनुवाका मुहूर्त्तानां नामधेयानीति ॥ अत्र द्वाभ्यां द्वाभ्यां पदाभ्यां एकैकस्यानु
वाकस्य प्रतीकमुक्तम् ॥ तथासति चत्वारोनुवाकाः संपद्यंते ॥ तत्र प्रथमे शुक्लपक्षगतस्यान्हो मुहूर्त्ताः द्वितीये
तद्रात्रेः तृतीये कृष्णपक्षगतस्यान्हः ॥ चतुर्थे तद्रात्रेरिति विवेकः तेचानुवाका एवं श्रूयंते ॥ चित्रः केतुः प्रभा
नाभान् संभान् ज्योतिष्मान्स्तेजस्वानातपंस्तपन्नभितपन्नोचनो रोचमानः शोभनः शोभमानः कल्याणः ॥
दाता प्रदाता नंदो मोदः प्रमोदः अवेशयन्निवेशयन्संवेशनः संशांतः शांतः आभवन् प्रभवन् संभवन्संभू
तो भूतः ॥ सविता प्रसविता दीप्तो दीपयन् दीप्यमानः ॥ ज्वलन्ज्वलिता तपन्वितपन्त्संतपन्रोचनो रोचमानः
शुंभूः शुंभमानो वामः । अभिशास्तानुमंता नंदो मोदः प्रमोद् आसादयन् निषादयन्संसादनः संसन्नः सन्नः
आभूर्विभूः प्रभूः शंभूर्भुव इति ॥ एतेषु मुहूर्तेष्वेकैकमुहूर्तस्य पंचदश भागाः सूक्ष्ममुहूर्त्ताः ॥ तथाच देव
ब्राह्मण इदानीं तदानीमिति एते वै मुहूर्त्ता इति ॥ इदानिमित्यादिकोनुवाको मंत्रकांड एवं पठ्यते ॥ इदा
नीं तदानीमेतर्हि क्षिप्रं अजिरं आशु निमेषः फणो द्रवन् अतिद्रवन्त्वरंस्त्वरमाण आशुराशीयान्जव इ
नामुहूर्त्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नि॥ज्योतिःशास्त्रे तु अहोरात्रयोस्त्रिंशन्मुहूर्त्तानां नामानि कश्यपेनोक्तानि॥गौरीवल्लभसर्पमित्रपितरोव
स्वंबुविश्वाह्वयाब्रह्मांभोरुहसंभवेंदुहुतभुक्देवेशनक्तंचराः॥तोयेशौर्यमयोनयोदशनथापंक्षणावासरे॥
रुद्राजाहिर्बुध्न्यपूषाश्विनास्तुःकीनाशोग्निर्धातृचंद्रादितीज्याविष्णुर्भानुस्त्वाष्ट्रधातामुहूर्त्ताःरात्रौक्रूरा॥१
स्त्वंतकाजाग्निरुद्राइति॥स्मार्त्तानि तु नामानि पुराणेदर्शितानि॥रौद्रःश्वेतश्चमैत्रश्चतथासारभटःस्मृतः
॥सावित्रो वैश्वदेवश्चगांधर्वः कुतपस्तथा॥रौहिणस्तिलकश्चैवविभवोनिरृतस्तथा॥शाबरोविजयश्चैव
भेदाःपंचदशस्मृताः इतिएते पंचदशसूर्योदयादारभ्यक्रमाद्दिवामुहूर्त्ताः॥शंकरश्चाजपादश्चतथाहि
र्बुध्न्यमैत्रकौ॥आश्विनोयाम्यवान्हेयौवैधात्रश्चांद्रएवच॥आदितेयोथजैवश्चवैष्णवःसौरएवच॥ब्राह्मो
नाभस्वतश्चैवमुहूर्त्ताःक्रमशोनिशीति॥यथोक्तनानाविधनामकत्रिंशन्मुहूर्त्तोपेतस्यसावनाहोरात्रस्य१
यदह्नःपंचदशमुहूर्त्तात्मकंतस्यान्होभागाअपराण्हसायाह्नप्रातरादयः॥तेचान्होभागामतभेदेनपंचधा
विकल्प्यंते॥द्विधात्रेधाचतुर्द्धापंचधापंचदशधाचाहर्विभज्यतइतिपंचमतभेदाः॥अत्रद्विधाविभागः१

CC-0. In Public Domain. Digitization by eGangotri

स्कंदपुराणेदर्शितः॥आवर्त्तनात्तुपूर्वाण्हो ह्यपराण्हस्ततःपर इति॥एतदेवाभिप्रेत्यमनुराह॥यथाचैवा
परःपक्षःपूर्वपक्षाद्विशिष्यते॥तथाश्राद्धस्यपूर्वाण्हादपराण्होविशिष्यतइति॥त्रेधाविभागोपिस्कंदपुराणे
दर्शितः॥ऊर्ध्वंसूर्योदयात्प्रोक्तंमुहूर्त्तानांतुपंचकं॥पूर्वाण्हःप्रथमःप्रोक्तोमध्यान्हस्तुततःपरः॥अपराण्ह
स्ततःप्रोक्तोमुहूर्त्तानांचपंचकइति॥शातातपोपि॥तस्मादन्हस्तुपूर्वाण्हेदेवाअशनमभ्यवहरंति॥मध्यंदि
नेमनुष्याअपराण्हेपितरइति॥एतमेवविभागमभिप्रेत्यसहस्रसंवत्सरसत्रब्राह्मणेआम्नायते॥ऋग्भिः
पूर्वाण्हेदिविदेवईयतेयजुर्वेदेतिष्ठतिमध्यअन्हः सामवेदेनास्तमितेमहीयतेवेदैरशून्यस्त्रिभिरेतिसूर्यइति
॥श्रुत्यंतरेपि॥पूर्वाण्होवैदेवानांमध्यंदिनोमनुष्याणामपराण्हः पितॄणामिति॥चतुर्द्धाविभागमाहगोभि
लः॥पूर्वाण्हःप्रहरंसार्द्धंमध्यान्हःप्रहरंतथा॥आतृतीयादपराण्हःसायान्हश्चततःपरइति॥पंचधाविभा
गंव्यासआह॥मुहूर्त्तत्रितयंप्रातस्तावानेवतुसंगवः॥मध्यान्हस्त्रिमुहूर्त्तःस्यादपराण्होपितादृशः॥सायाा
न्हस्त्रिमुहूर्त्तस्तुसर्वधर्मबहिःकृतइति॥वृद्धपराशरोपि॥लेखादित्यात्प्रभृतयोमुहूर्त्तास्त्रयएवतु॥प्रात

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्तु स स्मृतः कालो भागश्चान्हः स पंचमः। संगवस्त्रिमुहूर्त्तोथ मध्यान्हस्तत्समः स्मृतः। ततस्त्रयो मुहूर्त्ताश्च
यापराण्हो विधीयते॥ पंचमो यद्दिनांशो यः स सायान्ह इतिस्मृत इति॥ एतमेव विभागमभिप्रेत्य कश्चिन्मंत्रः
संगवकालमवलंब्य व्यवजहार मंत्रं च बव्हृचा आश्विनसूक्ते आमनंति॥ उतायातं संगवे प्रातरन्हो मध्यंदि
न उदिता सूर्यस्य। दिवा नक्तमवसा शंतमेन नेदानीं पीतिरश्विना ततानेति॥ अस्मिन्मंत्रे प्रातः संगवमध्यंदिना
नां संज्ञाभिर्व्याल्हतत्वात्॥ अवशिष्टयोर्भागयोरप्येतन्त्रितयमुपलक्षणं द्रष्टव्यं॥ तैत्तिरीयब्राह्मणे यथोक्तानां पं
चानां प्रातरादीनां भागानां मध्यवर्त्तिषु चतुर्षु संधिष्वग्निष्टोमोक्थ्य षोडश्यतिरात्राख्यानां चतसृणां सोमसं
स्थानां निर्माणं वक्तुं यथोक्तपंचभागाः साधिष्ठातृदेवाः समाम्नाताः॥ देवस्य सवितुः प्रातर्मित्रस्य संगवः बृह
स्पतेर्मध्यंदिनं भगस्यापराण्हः वरुणस्य सायमिति॥ छंदोगाश्च सप्तभक्त्युपेतसाम्न आदित्यात्मनोपास
नं वक्तुमादित्यस्य संबंधिनः कालभेदान्विभज्य तेषां हिंकारादिसप्तभक्तिरूपतां विवक्षव आमनंति॥ तस्य य
त्पुरोदयात्स हिंकारः॥ अथ यत्प्रथमोदिते स प्रस्तावः। अथ यत्संगववेलायां स आदिः। अथ यत्संप्रतिम॰

ध्यंदिनेस्स उद्गीथः ॥ अथयदूर्ध्वंमध्यंदिनात्प्रागपराण्हात्स प्रतिहारः ॥ अथयदूर्ध्वमपराण्हात्प्रागस्तमयात्
स उपद्रवः ॥ अथयत्स्वयमास्तमितेतन्निधनमिति ॥ वाजसनेयिनोप्येवमामनंति ॥ आदित्योवैसर्वऋतवः
यदैवोदेत्यथवसंतोयदासंगवोथग्रीष्मोयदामध्यंदिनोथवर्षायदापराण्होथशरद्यदैवास्तमेत्यथहेमंतइति
॥ पंचदशधाविभागःशंखेनदर्शितः रौद्रश्चैवश्च मैत्रश्च तथाशालकटः स्मृतः ॥ सावित्रश्चजयंतश्च गांध
र्वःकुतपस्तथा ॥ रौहिणश्चविरंचश्च विजयोनैर्ऋतस्तथा ॥ महेंद्रोवरुणश्चैव भेदाःपंचदशस्मृता इति ॥ त
त्रपंचधाविभागपक्षस्यबहुश्रुतिस्मृतिषुदृष्टत्वात् ॥ प्रायेणैतमेवपक्षमाश्रित्यविधिनिषेधशास्त्राणिप्रवर्त्तंते
॥ सूर्योज्योतिर्ज्योतिःसूर्यःस्वाहेतिप्रातरितिश्रुतौ प्रातःकालमुपजीव्यतत्कालीनस्यहोमस्यमंत्रविशेषोभि
हितः ॥ स्मृतावपि ॥ संध्यामुपास्यविधिवत्प्रातर्होमंसमाचरेदितिहोमांगत्वेनप्रातःकालआश्रितः । संगवस्तु
कात्यायनेनव्यवहृतः ॥ संधिश्चेत्संगवादूर्ध्वंप्राक्चेदावर्त्तनाद्रवेःसापौर्णमासीविज्ञेयासद्यस्कालविधौ
तिथिरिति ॥ बौधायनेनमध्यान्होव्यवहृतः ॥ मध्यान्हव्यापिनीग्राह्याएकभक्तव्रतेतिथिरिति ॥ अमावास्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यामपरान्हे पिंडपितृयज्ञेनचरंतिइतिश्रुत्याअपराण्हो व्यवस्थृतः॥सायान्हव्यवहारस्तुपूर्वमेवसंमुखीना
मेतिवचनेनोदाहृतः॥त्रेधाविभागस्तुसवनत्रयउपयुज्यते॥ यथोक्तेषुपंचसुकालेषुयांनिविहितानिकर्माणि
तानिदैवपित्र्यरूपेणराशिद्वयंकृत्वातयोः गौणकालाभ्यनुज्ञानायद्वेधाविभागोदर्शितः॥चतुर्द्धाविभागस्तु
प्रकरणबलात् गोभिलस्मृत्युक्तकर्मविशेषेद्रष्टव्यः।पंचदशधाविभागोमुहूर्त्तविशेषोपजीवनेनविधिनिषे
धौज्योतिः शास्त्रेद्रष्टव्यौ॥एवंचसतिप्रकृतेपंचस्वन्होभागेषुपंचमंसायान्हभागंव्याप्यततः पूर्वंचतुर्थमप
राण्हभागंयाप्रतिपत्संस्पृशति॥ तादृशीपूर्वविद्धोपवासेग्राह्या॥अत्रतिथीनांवेधःपैठीनसिनादर्शितः॥पक्ष
द्वयेपितिथयस्तिथिंपूर्वांतथोत्तरां॥त्रिभिर्मुहूर्तैर्विध्यंतिसामान्योयंविधिः स्मृतइति॥पूर्वेद्युरुदयानंतरम
मावास्यात्रिमुहूर्त्ताचेत्साप्रतिपदंविध्यति॥ परेद्युरस्तमयात्प्राक्द्वितीयात्रिमुहूर्त्ताचेत्सापिपूर्वांप्रतिप
दंविध्यति॥एवमुभयतोविद्धयोर्दिनद्वयवर्त्तिन्योः प्रतिपदोर्मध्येकिंपूर्वाग्राह्याउत्तरेतिविचार्यते॥तत्रपू
र्वायाग्राह्यत्वंपैठीनसिस्कंदव्यासाआहुः॥तद्वचनानिपूर्वमुदाहृतानि॥निगमेप्येवमेवोक्तं॥युग्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्नियुगभूतानांषण्मुन्योर्वसुरंध्रयोः ॥ रुद्रेण द्वादशी युक्ता चतुर्दश्याच पूर्णिमा ॥ प्रतिपद्यप्यमावास्यातिथ्योर्युग्मं महाफलं ॥ एतद्व्यस्तं महादोषं हंतिपुण्यं पुराकृतमिति ॥ युग्मं द्वितीया ॥ अग्निस्तृतीया ॥ युगं चतुर्थी ॥ भूतं पंचमी ॥ षट् षष्ठी ॥ मुनिः सप्तमी ॥ वसुरष्टमी ॥ रंध्रं नवमी ॥ रुद्र एकादशी ॥ अत्र युग्मा ग्न्यादिसप्तयुग्मेषु पूर्वतिथिरुत्तरविद्धा याद्याउत्तरा तु पूर्वविद्धेत्युक्तं भवति ॥ स्मृत्यंतरेपि ॥ एकादशी तथा षष्ठी अमावास्या चतुर्थिका ॥ उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुता इति ॥ अन्यत्रापि ॥ षष्ठ्यष्टमी अमावास्या कृष्णपक्षे त्रयोदशी ॥ एताःपरयुताः पूज्याः पराः पूर्वेण संयुता इति ॥ शिवशंकरगीतायां ॥ एकादश्यष्टमी षष्ठी द्वितीया- च चतुर्थिका ॥ चतुर्दश्यप्यमावास्याउपोष्याःस्युःपरान्विता इति ॥ एतेषु सर्वेषु वचनेषु प्रतिपदः पूर्वविद्धायाः पूज्यत्वं प्रतीयते ॥ एतस्यैव पक्षस्यानुग्राहक उत्तरविधाया निषेधो वृद्धवसिष्ठेन स्मर्यते ॥ द्वितीया पंचमी वेधाद्दशमी च त्रयोदशी ॥ चतुर्दशी चोपवासे हन्युः पूर्वोत्तरे तिथी इति ॥ द्वितीयादयः स्ववेधे पूर्वामुत्तरां च तिथिं हन्युरित्यभिधानादुत्तराप्रतिपदुपवासे निषिद्धा भवति ॥ आपस्तंबस्तूत्तरविद्धायाः प्रति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 पद्मः पूज्यत्वमाह ॥ प्रतिपत्सद्वितीयास्या द्वितीयाप्रतिपद्युतेति ॥ भविष्योत्तरेप्ययमेवपाठः ॥ अत्रेदं चिंत्यते।
 किमुत्तरविद्धापूज्यत्ववचनेनप्रतिपन्मात्रंविषयीक्रियते किंवाप्रतिपद्विशेषः ॥ यदाप्रतिपद्विशेषः तदापि
किमशुक्लपक्षगतत्वं ॥ किंवानुपोष्यत्वं ॥ पूर्वदिनेअनापराण्हिकत्वंवा ॥ तत्रैवासायान्हिकत्वंवा ॥ तत्रैवाप
रान्हसायान्होभयाव्याप्तित्वंवा ॥ बलिदिनेतरत्वंवा ॥ शुक्लपक्षादिनिखिलप्रतियोगिराहित्यंवा ॥ ननुसर्वत्र
संशयः कोटिद्वयमवलंबते ॥ कोटिद्वयावलंबी विमर्शः संशयइतिहितार्किकडिंडिमः ॥ अतोबहुपक्षोप
न्यासोनयुक्तः ॥ मैवं ॥ प्राणाधिकारणवदुपपत्तेः ॥ अस्त्युत्तरमीमांसायांप्रथमाध्यायप्रथमपादावसाने ॥
प्राणशब्दं विषयीकृत्यप्रवृत्तमधिकरणं ॥ तस्यचसंग्रहकावेतौश्लोकौभवतः ॥ प्राणोस्मीत्यत्रवायुर्विंद्रजी
वब्रह्मस्वसंशयः ॥ चतुर्णांलिंगसद्भावात्पूर्वपक्षस्त्विहैछिकः ॥ ब्रह्मणोनेकलिंगानितानिसिद्धान्यनन्यथा
॥ अन्येषामन्यथासिद्धेर्व्युत्साद्यंब्रह्मनेतरइति ॥ अयमर्थः ॥ कौषीतकिब्राह्मणेप्रतर्दनायोपसन्नायेंद्रएवमु
पदिदेश ॥ प्राणोस्मिप्रज्ञात्मानंमामायुरमृतमित्युपास्स्वेति तत्रसंशयः ॥ किंप्राणशब्देनउच्छ्वासनिश्वासका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रीवायुर्विवक्षितः॥ उतेंद्रशब्दाद्यभिधेयः सहस्राक्षत्वाद्याकारवान्देवताविशेषः॥ आहोस्वित्कार्यकारणा
ध्यक्षो जीवः॥ अथवा परब्रह्मेति संति चात्र प्रकरणे पक्षचतुष्टयगमकानि चतुर्विधानि लिंगानि॥ इदं शरी
रं प्रतिगृह्योत्थापयतीति प्राणवायोर्लिंगं॥ अस्मीत्यहंकारवादो वक्तुरिंद्राख्यदेवताविशेषस्य लिंगं॥ न वा
चं विजिज्ञासीत वक्तारं विद्यादित्यादिनाऽऽक्षतं वक्तृत्वादिकं जीवलिंगं॥ आनंदोऽजरोऽमृत इत्यादिकं ब्रह्मलिंगं
॥ चतुर्णां लिंगानां समबलत्वादिच्छया यत्किंचित्स्वीकर्तव्यमिति पूर्वः पक्षः॥ आनंदत्वाजरत्वादीनां ब्रह्मलिंगा
नामनेकत्वात्तेषां च वाक्यादौ कथंचिदपि योजयितुमशक्यत्वात्॥ शरीरोत्थापनादीनां वाय्वादिलिंगानां तु
पाध्युपहिते ब्रह्मणि सुसंपादत्वाद्ब्रह्मैवात्र प्राणशब्देन विवक्षितमिति राद्धांत इति॥ पूर्वमीमांसायामपि षष्ठा
ध्यायस्य सप्तमे पादे सहस्रसंवत्सराधिकरणस्य संशये पक्षाः अष्टावुपन्यस्ताः॥ किमस्मिन्सत्रे दीर्घायुषां
गंधर्वादीनामधिकारः॥ उत रसायनेन सिद्धानां मनुष्याणां॥ अथ पितृपुत्रपौत्रादिपरंपरारूपस्य कुलस्या
होस्विदस्मादेव शास्त्रादत्र प्रवृत्तस्य सहस्रसंवत्सरमायुर्भविष्यति॥ किं वा सार्द्धद्विशतानां पुरुषाणामत्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

धिकारः॥ अत्रसंवत्सरोक्तिर्मासपरा वा द्वादशरात्रिपरा वा दिनपरा वेति॥ एवं च सति संशयस्यैककोटित्वं
तार्किकैर्व्यावर्त्यते न तु बहुकोटिकत्वं॥ नन्वेवमपि यथोक्तानां पक्षाणां प्रमाणाधिकरणन्यायेन गमकानि लिं
गानि वक्तव्यानीति चेत् तान्युदाहरामः॥ द्वितीयाप्रतिपद्युते त्युक्ते सामान्यतः प्रतिपन्मात्रं प्रतीयते॥ युग्मा
ग्निवाक्ये प्रतिपद्यप्यमावास्येति पूर्वदिनपूज्यत्वस्य शुक्लपक्षविषयत्वादितरस्य कृष्णपक्षविषयत्वं॥ न चा
त्रामावास्याशब्दः पूर्णिमाया अप्युपलक्षणमिति शंकनीयं॥ चतुर्दश्या च पूर्णिमेति पूर्णिमायाः पूर्वदिनेन
सह युग्मत्वाभिधानात्॥ उदाहृतस्मृत्यंतरेण उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुताः इत्यमावास्यायुता
याः प्रतिपद उपोष्यत्वाभिधानात् द्वितीयायुक्तायाः उपवासव्यतिरिक्तव्रतादिविषयत्वं॥ उपोष्यशब्दे
न व्रतादीनामुपलक्षणमिति चेत् न पूर्वाण्हो वै देवानामिति श्रुत्या व्रतादेः पूर्वाण्हस्य विहितत्वेनोत्तरदि न
स्वीकारे कर्मकालव्याप्तिलाभात्॥ यस्मिन्काले तु यत्कर्म तत्कालव्यापिनी तिथिरिति हि कर्मकालव्याप्तिः स्पष्टैते
न चोपवासेपि समानमेतदिति वाच्यम्॥ उपवासस्याहोरात्रसाध्यत्वेन खंडतिथौ संपूर्णकर्मकालव्याप्त्यसं॰

भवात्॥व्याप्तिबाहुल्यंतुपूर्वविद्धायामेवभवति॥अन्होपरभागेकृत्स्नायांरात्रौचतद्व्याप्तेः॥उद्येतूपवास
स्येतिस्मृत्यापरेद्युरुपवासः प्राप्नोतीतिचेत् नतस्याः सामान्यशास्त्रत्वेनप्रतिपदुपवासाभिधायिनोवि
शेषशास्त्राद्दुर्बलत्वात्॥पैठीनसिस्कंदव्यासैः पूर्वतिथावपराण्हव्यापितयासायान्हव्यापितयोभय"
व्यापितयाचपूज्यत्वाभिधानेसतितासामेवतिसृणांव्याप्तीनामभावेउत्तरतिथौपक्षत्रयंसंपद्यते॥ननुपू
र्वतिथावपराण्हव्याप्तौसत्यांतन्नांतरीयकतयासायान्हव्याप्तेरवश्यंभावित्वेनपृथक्तदभिधानंनिरर्थकमि
तिचेत्॥किमिदंकेवलसायान्हाभिधायिवाक्येचोदयसि॥किंवोभयाभिधायिवाक्येनाद्यः॥यदादिनेवापरा
ण्हव्याप्तिंसायान्हमात्रंव्याप्यते॥तदापिपूर्वविद्धायाः पूज्यतायावक्तव्यत्वात्॥द्वितीयेवैश्वानरेष्टिन्या
येनावयुत्यानुवादोभविष्यति॥सचन्यायउद्भिदादिपादेव्यवस्थितः काम्यकांडेश्रूयते॥वैश्वानरंद्वादश
कपालंनिर्वपेत् पुत्रेजातेयदष्टाकपालोभवतिगायत्र्यैवैनंब्रह्मवर्चसेनपुनाति॥ यन्नवकपालस्त्रिवृतैवा
स्मिंस्तेजोदधाति॥यद्दशकपालोविराजैवास्मिन्नाद्यंदधाति॥यदेकादशकपालस्त्रिष्टुभैवास्मिन्निंद्रियं

CC-0. In Public Domain. Digitization by eGangotri

द्धातीति॥अत्रद्वादशकपालेष्टौब्रह्मवर्चसादिफलविशेषायाष्टकपालादिगुणविधिरिति पूर्वः पक्षः।उत्पत्ति
शिष्टद्वादशकपालेनावरोधेसत्युत्पन्नशिष्टानामष्टाकपालादीनामत्रावकाशाभावादुपक्रमोपसंहारांतर्गत
त्वेनतेषांविध्यंतराभावाच्चावयवेष्टाकपालादिभिर्नांतरीयकसिद्धैरवयविनोद्वादशकपालस्यस्तुतिरिति
सिद्धांतः।एवमत्रापियदासायान्हव्यापिन्यपिगृह्यतेतदापराण्हव्यापिन्याग्रहणंकिमुवक्तव्यमितिनांत
रीयकसिद्ध्यासायान्हव्याप्त्याअपराण्हव्याप्तिःप्रशस्यते॥स्कंदपुराणेबलिदिनाभिधानायाःशुक्लप्रतिप
दः पूर्वविद्धत्वाभिधानादितरासर्वाप्रतिपदुत्तरेत्येषपक्षःप्रतीयते॥शुक्लपक्षोपवासापराण्हसायान्हब
लिदिनानांपंचानांसमूहस्यपूर्वतिथिप्रयोजकत्वेसत्यंतिमःपक्षउदेति।एवंबहुविधसंशयेसतिनिर्णयं
ब्रूमः॥यद्यपिद्वितीयाप्रतिपद्युतेत्यत्रनकोपिविशेषःपठ्यते तथाप्यशेषप्रतिपत्त्वीकारेयुग्माग्न्यादिनिब
हूनिवाक्यानिबाध्येरन्॥नचांतिमःपक्षोयुक्तिसहः॥तदाहिपूर्वविद्धायाः प्रयोजकमेवंवक्तव्यं॥शुक्ल
पक्षसायान्हापराण्हव्यापिनिबलिदिनेउपवासःसपूर्वविद्धायाविषयइति॥तच्चवक्तुंनशक्यते॥बलिदिन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वंनिमित्तीकृत्यउपवासस्याविधेयत्वात्॥ पूजोत्सवादिकमेवहितत्रविहितं॥अतःसमूहस्यप्रयोजकत्वा
भावेशुक्लपक्षादिपंचस्वन्यतमस्यप्रयोजकत्वमभ्युपेयं॥तत्रकिमिच्छयाविकल्पः॥आहोस्विदेकंप्रतिनि
यतमितिविचारेविकल्पस्तावन्नयुज्यते॥अष्टदोषग्रस्तत्वात्॥तथाहि॥यदाबल्युत्सवस्यप्रयोजकत्वंस्वी
क्रियतेतदोपवासवाक्यस्यप्राप्तंप्रामाण्यंपरित्यजेत॥अप्राप्तंचाप्रामाण्यंस्वीक्रियेत। पुनरपियदाकदा
चिदुपवासप्रयोजकत्वस्वीकारेकल्पितमप्रामाण्यमपहूयेतानिराकृतंचप्रामाण्यमुज्जीव्येत॥तदेवमुप
वासवाक्येचत्वारोदोषाः अनेनैवन्यायेनबल्युत्सववाक्येऽपियथोक्ताश्चत्वारोदोषाउत्प्रेक्षणीयाः॥नचैवंव्रीहियवादा
वपिविकल्पोनस्यादितिवाच्यं॥अगत्यातत्रतदाश्रयणात्।तदाहुर्भट्टाचार्याः।एवमेषोऽष्टदोषोपियद्व्रीहियववाक्य
योःविकल्पआश्रितस्तत्रगतिरन्यानविद्यतइति॥प्रकृतेतुगत्यंतरसंभवान्नविकल्पः।अतोविकल्पासंभवादेकस्यैवप्रति
नियतस्यस्वीकर्त्तव्यत्वेसतिशुक्लपक्षस्यैवस्वीकरणंयुक्ततरंमन्यामहे॥तथासतिबह्वनुग्रहसिद्धेर्युग्मादिवाक्यंबलि
दिनवाक्यमुपवासवाक्यंचेत्येतान्यनुगृह्यंते॥नह्येतानिकृष्णपक्षविषयतयाकथंचिदपियोजयितुंशक्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ते॥ तदनुसारेण द्वितीयायुतत्वं कृष्णपक्षविषयत्वेन संकोचनीयं॥ तस्य सामान्यवचनत्वात्॥ इत्थं शुक्लकृष्ण
प्रतिपदोः क्रमेण पूर्वोत्तरविद्धतयाव्यवस्थितौ सत्यां योयं द्वितीयायुक्तोपवासनिषेधः असौ शुक्लपक्षविषय
तया योजनीयः॥ यद्यप्यापराण्हिकवचनं शुक्लकृष्णपक्षद्वयसाधारणं प्रतिभासते तथापि शुक्लपक्षविषयत्व
मेव तस्य न्याय्यं॥ सांमुख्यमुपजीव्य प्रवृत्तत्वात्॥ कृष्णपक्षे द्वितीयायुतायाः प्रतिपदो विमुखत्वात्॥ नन्वेवं
सति यदा शुक्लपक्षे सायान्हमात्रं व्याप्नोति न त्वपराण्हं तदानीमुत्तरतिथिः प्रसज्यतेति चेत्॥ मैवं॥ संमुखी नाम
सायान्हव्यापिनीति वचनेन तादृशे विषये पूर्वतिथेर्विधानात्॥ एवमपीषन्न्यूनसायान्हव्यासौ शुक्लपक्षेपि परे
द्युरेव प्रसज्येतेति चेत्॥ प्रसज्यतां नाम पूर्वतिथियुग्मवाक्यविषयत्वाभावात्॥ यदा प्रातरमावास्या त्रिमुहूर्त्ता
ततोधिका वा सायं च प्रतिपत्त्रिमुहूर्त्ता ततोधिका वा भवति। तादृश्याएवोभयतस्त्रिमुहूर्त्तवेधोपेतायास्ति
थेस्तद्विषयत्वात्॥ न च त्रिमुहूर्त्तवेधः सर्वसाधारणो न प्रतिपद्विषय इति शंकनीयं॥ विशेषवचनाभावे सामा-
न्यस्य स्वीकर्त्तव्यत्वात्॥ द्वितीयायुक्तोपवासनिषेधस्तु पूर्वेद्युः प्रतिपदस्त्रिमुहूर्त्तवेधे सति द्रष्टव्यः॥ सायान्ह

CC-0. In Public Domain. Digitization by eGangotri

व्याप्तिवचनेनत्रिमुहूर्त्तवेधोभिधीयते॥ आपराण्हिकवचनेततोधिकवेधः॥ तत्रोभयत्रशुक्लप्रतिपत्पूर्वैवोपो
ष्या॥ यदाकृष्णप्रतिपत्परेद्युरुदयादूर्ध्वंत्रिमुहूर्त्ताततोधिकावास्यात्॥ तदासैवोपोष्या॥ अन्यथापूर्वेद्युरिति॰
निर्णयः॥ व्यासवचनेपूर्वविद्धायांशुक्लप्रतिपदियैदैवपित्र्येविहितेतयोर्दैवशब्देनप्रतिपन्निमित्तउपवासो
वल्युत्सवश्चेत्युभयंविवक्षितम्॥ वचनांतराभ्यांतयोःश्रृंगग्राहिकयाविधानात्॥ एकादशीतथाषष्ठीअमा
वास्याचतुर्थिका॥ उपोष्याःपरसंयुक्ताःपराःपूर्वेणसंयुताः॥ श्रावणीदुर्गनवमीतथादूर्वाष्टमीचया॥ पूर्व
विद्धातुकर्त्तव्याशिवरात्रिर्बलेर्दिनमिति॥ नन्वाश्वयुजमासेयोयंनवरात्रोत्सवः॥ तदुपक्रमस्यापिपूर्वविद्धा
यांक्रियमाणत्वात्सोप्यत्रविवक्षणीयइतिचेत्॥ न॥ तस्यनक्तव्रतत्वादेकभक्तनक्तप्रतिपदीष्टीनांदैवत्वेपिपृ
थङ्निर्णयस्यवक्ष्यमाणत्वात्॥ नचव्रतादीन्यपिचदैवान्यत्रविवक्ष्यंतामितिशंकनीयम्॥ तेषूदयतिथिप्रा॰
शस्त्यस्यबहुभिर्वक्ष्यमाणत्वात्॥ पित्र्यशब्देनात्रमृताहश्राद्धंविवक्षितं॥ आपराह्णिकीतितस्मिन्वचनेभि
धानात्॥ आपराण्हिकत्वंचमृताहश्राद्धप्रयोजकमितिवक्ष्यते॥ एवंतर्हितिथ्यंतरमृताहश्राद्धवदत्रापिप्राप्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्वात्॥ पित्र्यं वामनुरब्रवीदिति विशेषविधानमनर्थकमिति चेन्न तदुपवासार्थत्वात्॥ यदापूर्वेद्युरल्पोपरा
ण्हस्पर्शः परेद्युर्भूयान्॥ तदाति व्यंतरेषु परेद्युरेव मृताहश्राद्धं॥ प्रतिपदि तु तदुपवासे च पूर्वेद्युरेव विधीयते॥ न
चात्र पित्र्यशब्दस्यैकोद्दिष्टविषयत्वं शंक्यं॥ एकोद्दिष्टादीनां मध्याह्नादिकालेषु विहितत्वेन कर्मकालव्याप्त्यास्ति
र्थस्तत्र ग्रहीतव्यत्वात्॥ ते च काला हारीतेन दर्शिताः॥ आमश्राद्धं तु पूर्वाण्हे एकोद्दिष्टं तु मध्यतः॥ पार्वणं चाप
राण्हे तु प्रातर्वृद्धिनिमित्तकमिति॥ मनुरपि॥ पूर्वाण्हे दैविकं श्राद्धमपराण्हे तु पार्वणं॥ एकोद्दिष्टं तु मध्याह्ने प्रा
तर्वृद्धिनिमित्तकमिति॥ दैविकं विश्वामित्र आह॥ देवानुद्दिश्य क्रियते यत्तद्दैविकमुच्यते॥ तन्नित्यश्राद्धवत्कुर्या
द्द्वादश्यादिषु यत्नतः॥ तस्मान्नैकोद्दिष्टादिकमत्र विवक्षितम्॥ किंतु मृताहश्राद्धं। अन्यद्वा किंचित्पार्वणश्रा
द्धं॥ अत्र पूर्वविद्धायां शुक्लप्रतिपदि दैवशब्देन विवक्षितो य उपवासस्तमुदाहरामः॥ भविष्योत्तरपुराणे॥ बृह
त्तपाभिधे व्रते कार्तिकमासांतदर्शे पायसभोजनादिनियमं विधायेदं पठ्यते॥ ततो मार्गशिरे मासि प्रतिपद्यप
रेहनि॥ पृष्ट्वा गुरुं चोपवसेन्महादेवं स्मरन्मुहुरिति॥ ननु पूर्वविद्धायां शुक्लप्रतिपदि योयमुपवासो विहितस्त

CC-0. In Public Domain. Digitization by eGangotri

स्य संकल्पः किं प्रातः कार्यः किं वा प्रतिपत्काले नाद्यः॥ अमावास्यावेलायां प्रतिपदुपवाससंकल्पायोगा
त्॥ अत एव बौधायनः॥ यो यस्य विहितः कालः कर्मणस्तदुपक्रमे॥ तिथिर्याभिगता सा तु कार्या नोपक्र
मोज्झितेति॥ स्कंदपुराणे। यो यस्य विहितः कालः कर्मणस्तदुपक्रमे॥ विद्यमानो भवेदंगं नो ज्झितोपक्रमे
णत्विति॥ न द्वितीयः॥ प्रातःकालस्यैव संकल्पांगत्वात्॥ तथा च स्मर्यते॥ प्रातः संकल्पयेद्विद्वान् उपवासव्र
तादिकमिति॥ तथा प्रातरारभ्य मतिमान् कुर्यान्नक्तव्रतादिकं॥ नापराण्हे न मध्यान्हे पित्र्यकालौ हितौ स्मृता
विति॥ अत्रोच्यते॥ यथोक्तवचनबलात् प्रातरेव संकल्पः कार्यः॥ तदानीं ज्योतिःशास्त्रप्रसिद्धप्रतिपदभावे
पि स्मृतिभिरापादितायाः प्रतिपदः सत्वात्॥ अत एव देवलः॥ यां तिथिं समनुप्राप्य अस्तं याति दिवाकरः॥ तिथिः
सा सकला ज्ञेया दानाध्ययनकर्मस्विति॥ अत्र दानाध्ययनयोरु पवासादिनिखिलदैवोपलक्ष
णार्थत्वविवक्षया कर्मस्विति बहुवचनं निर्दिष्टम्॥ अत्रास्तमयात्पूर्वं मुहूर्त्तत्रयव्यापिनीं तिथिं स
मनुप्राप्येति व्याख्येयम्॥ ॥ ॥ ॥ ॥ ॥ ननु ततोल्पव्याप्तिर्विवक्षिता॥ न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 श्चासतिपूर्वोक्तवेधाभावेनोत्तरतिथेरेवग्राह्यत्वप्रसंगात्तथात्रिमुहूर्तव्याप्तिः स्कंदपुराणेदर्शिता॥ यां
 तिथिंसमनुप्राप्ययात्यस्तंपद्मिनीप्रियः॥ सातिथिस्तद्दिनेप्रोक्तात्रिमुहूर्त्ताचयाभवेदिति॥ शिवरहस्य॰
स्रोऽपुराणयोऽपि॥ यांप्राप्यास्तमुपैत्यर्कः साचेत्स्यात्त्रिमुहूर्त्तिका॥ धर्मकृत्येषुसर्वेषुसंपूर्णांतांविदुर्बुधाइ
ति॥ बृहद्वसिष्ठोपि॥ यस्यांतिथावस्तमियात्सूर्यस्तत्त्रिमुहूर्त्तकैः॥ यागदानजपादिभ्यस्तामेवोपक्रमे॰
त्तिथिमिति॥ ननुसायंतनत्रिमुहूर्त्तस्पृक्प्रतिपदुपेतायांतिथौप्रातरेवसंकल्प्यप्रतिपदुपवासःकार्यइति
॥ युग्मादिवाक्यमाश्रित्यनिर्णीतेतत्तिथिक्षयेतथास्तु॥ साम्यवृद्ध्योस्तुखर्वदर्पवाक्यात् परेद्युरुपवासःप्रा
प्नोतीतिचेत्॥ नैवम्॥ खर्वादिवाक्यस्यैकोद्दिष्टादिविषयत्वात्॥ तथाचव्यासः। द्वितीयादिकयुग्मानांपूज्यं॰
तानियमादिषु॥ एकोद्दिष्टादिवृध्यादौह्रासवृध्यादिचोदनेति॥ नियमादिष्वित्यादिशब्देनपित्र्यकर्मव्यतिरि
क्तव्रतोपवासादिसकलकर्मणोग्रहणं॥ एकोद्दिष्टादित्यादिशब्देनविवाहादिमंगलांगभूतश्राद्धव्यतिरिक्त
पार्वणश्राद्धस्य॥ वृद्ध्यादावित्यादिशब्देनमांगलिकश्राद्धस्य ह्रासवृध्यादीत्यादिशब्देनखर्वग्रहणं॥ तदेवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वेद्युः शुक्लप्रतिपदुपवासं कृत्वा परेद्युः पारणं कुर्यात्॥ तत्रेदं चिंत्यते॥ किं प्रातः पारणं॥ किं वा तिथ्यंत इति॥ ना
द्यः॥ सुमंतुवचनविरोधात्॥ तिथिनक्षत्रनियमे तिथिभांते च पारणं॥ अतोन्यथा पारणे तु व्रतभंगमवाप्नुयादि
ति॥ न द्वितीयः॥ देवलवचनविरोधात्॥ उपवासेषु सर्वेषु पूर्वाण्हे पारणं भवेत्॥ अन्यथा तु फलस्यार्द्धं धर्ममेवो
पसर्पतीति॥ धर्मो यमः॥ नायं दोषः॥ पूर्वाण्हवाक्यस्य सामान्यरूपत्वेन परविद्धोपवासविषयतयासंकोच
नीयत्वात्॥ एतदेवाभिप्रेत्य निगमः स्मर्यते॥ पूर्वविद्धासु तिथिषु भेषु च श्रवणं विना॥ उपोष्य विधिवत्कुर्यात्तत्त
दंते च पारणमिति॥ भेषु नक्षत्रेषु॥ स्कंदपुराणेपि तिथीनामेव सर्वासामुपवासव्रतादिषु॥ तिथ्यंते पारणं कु
र्यात् विना शिवचतुर्दशीमिति॥ अत्रोपवासव्रतादिष्वित्यादिशब्देनैकभक्तनक्तायाचितानि गृह्यंते॥ यां तिथि
मुद्दिश्यैतानि पूर्वेद्युर्विहितानि परेद्युस्तत्तिथिभागे तीते पश्चाद्भोजनं कार्यम्॥ अन्यथा पूर्वदिनानुष्ठितैकभक्ता
दिव्रतानां वैकल्यं स्यादित्यभिप्रायः॥ अस्य च तिथिभांतपारणस्यापवादः क्वचित्स्मर्यते॥ तिथ्यंते चैव भांते च
पारणं यत्र चोद्यते॥ यामत्रयोर्ध्ववर्तिन्यां प्रातरेव हि पारणामिति॥ यथोक्तोपवासवद्भूत्सुत्सवोपि पूर्वविद्धाया

... Valmeeki Campus, Kathmandu

मेवकर्त्तव्यः ॥ सचोत्सवो ब्रह्मपुराणे वामनपुराणे भविष्योत्तरपुराणे च प्रपंचितः ॥ अत्र प्रातःकाले द्यूतादिकं ब्रह्मपुराणे दर्शितम् ॥ तस्मात् द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैरिति ॥ यद्यपि प्रातरमावास्या वर्त्तते न तु प्रतिपत्तथापि पूर्वोक्तसंकल्पन्यायेन प्रतिपदः साकल्यमाश्रित्य द्यूतादिकं प्रातरेव कार्यम् ॥ ननु यावेतावुपवासबल्युत्सवौ पूर्वविद्धायां प्रतिपदि विहितौ तयोः केनापि निमित्तेन तत्रानुष्ठानासंभवे सति किमुत्तरविद्धा गौणकालत्वेनाश्रयणीया किं वा मुख्यकालातिक्रमात्तयोः परित्याग एव ॥ अत्र केचिदाहुः । परित्याग एव युक्तः ॥ मुख्यकालमंतरेणाप्यनुष्ठाने द्वितीयातृतीयादिष्वपि तदनुष्ठानप्रसंगात् ॥ अथोच्यते । यथा त्रैवर्णिकोपनयनस्य गर्भाष्टमादिमुख्यकालासंभवे सत्याषोडशादिकाला गौणकालत्वेन स्वीकृताः ॥ एवमत्रापीति ॥ तन्न ॥ वैषम्यात्तत्र गौणकालो वाचनिकः ॥ आषोडशात्तु द्वाविंशाच्चतुर्विंशाच्च वत्सरात् ॥ ब्रह्मक्षत्रविशां काल उपनायनिकः पर इति ॥ न त्वेवमत्रोत्तरप्रतिपदो गौणत्वेन स्वीकारे किंचिद्वचनमस्ति । अंतरेणापि वचनं युक्तिमात्रेण तत्कल्पनायां षोडशादिवर्षेभ्य ऊर्ध्वमपि सन्निकर्षविप्रकर्षतारतम्येन गौणतरगौणतमावुपनयनकालौ प्रसज्येते

CC-0. In Public Domain. Digitization by eGangotri

यातां॥नचतौयुक्तौ॥अतऊर्ध्वंपतंत्येतेयथाकालमसंस्कृताइति। पातित्यस्मरणात्॥किंचपूर्वोत्तरविद्धयो
रुभयोरपिस्वीकारेपूज्यत्वविचारोनिरर्थकःस्यात्॥तस्मात्परित्यागएवेति तत्रब्रूमः॥संत्येवात्रोपनयनव
दुत्तरतिथेःप्रापकाणिबहूनिवचनानि॥प्रतिपत्सद्वितीयास्यादित्येकंवचनम्॥नन्वेतद्यथोक्तविषयव्यति
रिक्तविषयेमुख्यकालत्वंविदधातिनतुयथोक्तविषयेगौणकालत्वमितिचेत्॥अत्रवक्तव्यंकिमत्रविष
यांतरेमुख्यत्ववाचनिकं॥किंवायथोक्तविषयस्यकालेविहितेसतिअर्थादितरविषयत्वंतस्यवचनस्यप
रिशिष्यतइति॥नाद्यः॥तस्मिन्वचनेविषयांतरस्यशब्दतोऽप्रतीतेः॥द्वितीयेतुसामान्यवचनस्यविशेष
व्यतिरिक्तसंभावितकृत्स्नविषयत्वंपरिशेषणीयं॥तथासतिकृष्णप्रतिपद्विषयत्वमुपवासव्यतिरिक्तदा
नव्रतादिविषयत्वंचसंभावितत्वाद्यथापरिशिष्यतेतथोपवासेपिगौणकालविषयत्वंकुतोनपरिशिष्यते॥द्वि
तीयायुतोपवासनिषेधादितिचेत्॥तस्यनिषेधस्यपूर्वविद्धोपवासप्रशंसायांतात्पर्यात्॥अपशवोवा
अन्येगोअश्वेभ्यःपशवोगोअश्वाइत्यत्रगोअश्वप्रशंसार्थमजादीनांपशुत्वंनिषिध्यते॥नतुसर्वथातन्निषे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का·मा· धः प्रत्यक्षविरोधात्॥ शास्त्रांतरविरोधाच्च॥ एवमन्याप्युत्तरविद्धायांप्रतिपदि सर्वथाप्रतिपदुपवासनिषे
५४ धोव्याहन्येत॥ तथाचोदितानुदितहोमयोरन्योन्यंनिंदेतरप्रशंसायेनतुसर्वथाहेयत्वार्थो ॥ नोचेदुभाव
पिहोमौपरित्यज्येतायां॥ यदितत्रशाखाभेदेनव्यवस्था॥ तर्ह्यत्रापिमुख्यगौणभेदेनव्यवस्थास्तु॥ नचै
तावतातिथेः पूज्यत्वविचारोनिरर्थकोभवति॥ प्रशस्ततिथिस्वीकारायतदुपयोगात्॥ यानिचान्यानिसामा
न्यवचनानिउदयेतूपवासस्यपूर्वाण्हिकास्तुतिथयोदैवेकार्ये फलप्रदाइत्यादीनितानिसर्वाणियथाकृ
च्छ्राप्रतिपदमुपोद्बलयंतितथागौणप्रतिपदंकुतोनोपोद्बलयेयुः॥ नचैवंसतिद्वितीयातृतीयादिष्वपिप्र
संगः॥ गौणप्रतिपत्त्वस्यतत्राभावात्॥ गौणप्रतिपद्येतावतातिनिर्बंधेनकस्तवलाभइतिचेत्॥ नन्वद्वे
षेणवातवकोलाभइतिवक्तव्यं॥ शिष्टाचारइतिचेत्॥ विपर्ययस्त्वत्रंपश्यामः॥ तथाहियदायथोक्तरीत्या
कस्यांचित्तिथौद्वैविध्यंभवति॥ तदानींसंप्रतिपन्नशिष्टेषुकेचनशिष्टाः पूर्वत्रानुष्ठंति॥ अन्येचपरत्र॥ राम·
नचतत्राविगीतः शिष्टाचारः प्रमाणंनेतरइतिवाच्यं॥ उभयेषांशिष्टानामविगीतत्वकथनायसंप्रतिपन्ने ५६

त्तिविशेषितत्वात्॥ एवंतर्हिमुख्यत्वमप्यन्यतमस्यनिश्चेतुमशक्यमितिचेन्न॥ यस्मिन्देशेयस्मिन्का
लेयेषुशिष्टेषुनरागद्वेषस्यस्वस्यप्रामाण्यातिशयस्यबुद्धिः॥ तदातादृशाचारस्यमुख्यत्वात्॥ तदेतदेवा
भिप्रेत्यगुरोःशिष्यानुशासनेतैत्तिरीयाःसमामनंति। अथयदितेकर्मविचिकित्सावावृत्तविचिकित्सावा
स्यात्॥ येतत्रब्राह्मणाःसमदर्शिनःयुक्ताआयुक्ताःअलूक्षाःधर्मकामाःस्युर्यथातेतत्रवर्तेरन्तथात्वं
तत्रवर्तेथाइति॥ युक्तिकुशलैर्युक्ताःशास्त्रतत्पराः॥ आयुक्तास्तदर्थानुष्ठाननिरताः॥ अलूक्षाःक्रोधा
दिवर्जिताः॥ धर्मकामाजीवन्मुक्तवत्कर्मण्यौदासीन्यमकुर्वाणाः॥ उक्तरीत्याकस्यचिच्छिष्टाचारविशे
षस्यमुख्यत्वेसत्यपरोगौणोभविष्यति नतुसर्वथैवानाचारः॥ एवंचसत्यकामेवतैत्तिरीयशाखामधी
त्यबौधायनापस्तंबमतभेदेनपरस्परविलक्षणमाचरतामुभयविधानांमनुष्याणांस्वस्वपूर्वपुरुषपा
रंपर्यक्रमायातस्तदाचारोमुख्यः॥ कदाचित्तदसंभवेमानांतरेणाप्यनुष्ठानमेव श्रेयोनतुसर्वथातल्लो
पोयुक्तः॥ किंबहुनामुख्यायाःपूर्वविद्धायाःप्रतिपदोऽसंभवेशेषिपरित्यागाद्वरमुत्तरविद्धायाः परिग्र

CC-0. In Public Domain. Digitization by eGangotri

का·मा हणमित्यवगंतव्यं॥तदेवंशुक्लप्रतिपदुपवासबल्युत्सवयोः पूर्वविद्धामुख्येतिव्यवस्थितम्॥ ॥अथैक
५५ भक्तनिर्णयः॥ ॥ब्रह्मपुराणेवैश्वानरव्रतेपठ्यते॥ ॥प्रतिपद्येकभक्ताशीसमाप्तेकपिलाप्रदइति॥ त
त्रादावेकभक्तंत्रिविधं। स्वतंत्रमन्यांगमुपवासप्रतिनिधिरूपंचेति॥तेष्विदानींमुद्दात्हतेस्वतंत्रं॥तत्रेदंचिंत्य
ते॥किमुपवासवत्तिथिरस्मिन्ग्रहीतव्याउतप्रकारांतरेणेति॥उपवासवदितितावत्प्राप्तं॥दैवंपित्र्यंतथाका
र्यमितिवचनेनउपवासैकभक्तादिष्वुक्तत्वेनदैवस्यविवक्षिततत्वात्॥नचकर्मकालव्याप्त्यातन्निर्णयइतिशंकनी
यम्॥तत्कालस्याद्याप्यनिर्णीतत्वात्॥कथंचित्तन्निर्णयेपिकर्मकालव्यापिवचनस्यपित्र्यविषयत्वेनाप्युप
पत्तेः॥ तस्मादुपवासवत्तन्निर्णयइतिप्राप्तेब्रूमः॥ कर्मकालव्याप्तिरेवात्रनिर्णयहेतुः॥कर्मकालस्तत्कर्म
स्वरूपंचेत्युभयंस्कंदपुराणेदर्शितं॥ दिनार्द्धसमयेतीतेभुज्यतेनियमेनयत्॥एकभक्तमितिप्रोक्तमतस्त
त्स्याद्दिवैवहि॥ देवलोपि॥दिनार्द्धसमयेतीतेभुज्यतेनियमेनयत्॥एकभक्तमितिप्रोक्तंन्यूनंग्रासत्रयेण॰ राम
त्विति॥अत्रचदिनार्द्धस्योपरिसार्द्धमुहूर्त्तपरिमितः कालः पंचधाविभागेमध्यान्हस्यापरभागएकभक्तस्य ५५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुख्यकालः॥ दिनार्द्धे तीते सति समनंतरभावित्वात्॥ अस्तमयात्प्राचीनो वशिष्टो गौणकालो दिवेत्यभ्यनुज्ञानात्॥ एवं स्थिते सति मुख्यकालव्यापिनी तिथिर्ग्रहीतव्या॥ अत एव पद्मपुराणं मध्यान्हव्यापिनी ग्राह्या एकभक्ते सदा तिथिरिति॥ बौधायनोपि॥ उदये तूपवासस्य नक्तस्यास्तमये तिथिः॥ मध्यान्हव्यापिनी ग्राह्या एकभक्ते सदा तिथिरिति॥ न चात्रोपवासन्यायो युक्तः॥ तत्र पूर्वविद्धायामेव विशेषशास्त्रपर्यवसानात्॥ द्विविधं हि विशेषशास्त्रं तिथिप्रयुक्तमेकं। कर्मप्रयुक्तमपरं॥ तत्र पौर्वाण्हिकास्तु तिथयो दैव इत्यनेन कर्मविषयेण सामान्यशास्त्रेणोत्तरविद्धायां प्राप्तायामुपोष्याः परसंयुताः परा: पूर्वेण संयुता इत्यनेन कर्मविषयेण विशेषशास्त्रेण पूर्वविद्धा विहिता। तिथिविषये अपि सामान्यविशेषशास्त्रे उदाह्रियेते॥ पूर्वाण्हिकास्तु तिथय इति तिथिमात्रमुपजीव्य प्रवृत्तत्वात्सामान्यशास्त्रं प्रतिपत्संमुखी कार्येत्येतद्विशेषशास्त्रं। तथा सति द्विविधेनापि विशेष शास्त्रेण पूर्वविद्धायामेवोपवासः सुस्थितः। अत्र तु मध्यान्हव्यापिनी त्येतत्कर्मविशेषविषयशास्त्रं॥ अतस्तदनुसारेण निर्णयो युज्यते॥ ननु प्रतिपत्संमुखी कार्येत्यनेन तिथिविषयेण विशेषशास्त्रेणा

कुतोननिर्णय इति चेत्॥ उपवासविषयत्वेनापि तस्योपपत्तेरिति ब्रूमः॥ ननु मध्यान्हव्याप्तिवचनमपि ति
थ्यंतरैकभक्तविषयत्वेनोपपादयितुं शक्यं। अतः कर्मविशेषशास्त्रतिथिविशेषशास्त्रयोः समानबलत्व
मिति चेत्॥ अस्तु नाम किन्नश्छिन्नं॥ मध्यान्हव्यापित्वसंमुखत्वयोः पूर्वविद्धायां संपादयितुं शक्यत्वे
नविरोधाभावात्॥ यदा तूत्तरविद्धायामेव मध्यान्हव्यापित्वं तदा विरोध इति चेत्॥ तथापि तिथिविषयवि
शेषशास्त्रात् कर्मविषयविशेषशास्त्रं प्रबलं॥ तिथेर्गुणत्वात् कर्मणश्च प्रधानत्वात्॥ तस्मादेवं विधेविष
ये कर्मकालव्याप्त्यैव निर्णेतव्यं॥ अत्र निर्णेतव्यो विषयः षोढाभिद्यते॥ पूर्वेद्युरेव मध्यान्हव्यापित्वं॥ परेद्यु
रेव तद्व्यापित्वं॥ उभयत्र तद्व्यापित्वं॥ उभयत्र तदव्यापित्वं॥ उभयत्र साम्येन तदेकदेशव्यापित्वं॥ उभय
त्रवैषम्येण तदेकदेशव्यापित्वं चेति॥ तत्र प्रथमद्वितीययोः मध्यान्हव्यापित्वस्य निर्णायकत्वं॥ तृतीये पूर्व
विद्धा ग्राह्या। मुख्यकालव्याप्तेः समत्वेपि गौणकालव्याप्तेरधिकत्वात्॥ अनेनैव न्यायेनोभयत्र मुख्यकालव्याप्त्यभावे

पि गौणकालव्याप्तिलाभात् पूर्वविद्धैव॥ पंचमेप्ययमेव न्यायो योज्यः॥ षष्ठे तु यदा पूर्वेद्युर्मध्यान्हैकदेशमधिकं व्याप्नो

CC-0. In Public Domain. Digitization by eGangotri

तितदानींतदाधिक्यात् गौणकालव्याप्तेश्च पूर्वेद्युर्ग्राह्या ॥ यदा परेद्युर्मध्यान्हैकदेशमधिकंव्याप्नोति तदा गौणकाल-
व्याप्त्यभावेपि मुख्यकालव्याप्त्याधिक्यानुसारेण परेद्युर्ग्राह्या॥ नन्वस्त्वेवं स्वतंत्रैकभक्तेनिर्णयः॥ ॥ ७ ॥
अन्यांगे तु कथं॥ ॥ तत्र कानुपपत्तिरितिचेत् ॥ उच्यते॥ पूजाव्रतेषु सर्वत्र मध्यान्हव्यापिनी तिथिरिति ॥ म-
ध्यान्हे पूजयेन्नृपेत्यादिशास्त्रैरंगिनः पूजादेर्मध्यान्हे विहितत्वेनांगस्यैकभक्तस्यापराण्हादौ प्राप्यमाण-
त्वात्। न मुख्यकालसंभवः। माभून्नाद्दश विषये मुख्यः कालः ॥ प्रधानानुसारेण गुणस्य नेतव्यत्वात् ॥ यदा
स्वतंत्रैकभक्तेपि केनचिन्निमित्तेन मुख्यकालासंभवे गौणकालोप्यनुज्ञायते तदा किमु वक्तव्यं अन्यांगे। य-
त्तूपवासप्रतिनिधिरूपमेकभक्तं तदुपवासतिथौ कार्यं ॥ तस्य गौणोपवासत्वात् ॥ अतएव सुमंतुः ॥ तिथौ य-
त्रोपवासः स्यादेकभक्तेपि सा तथेति ॥ न च ताद्दशमेव नास्तीति शंकनीयं ॥ उपवासव्रतं प्रक्रम्य रोगादिना त-
दशक्तौ गुर्वनुज्ञया तस्यैकभक्तस्य संभावितत्वात् ॥ अष्टौतान्यव्रतघ्नानि आपो मूलं फलं पयः ॥ हविर्ब्राह्मण-
काम्या च गुरोर्वचनमौषधमिति शास्त्रात् ॥ इत्येकभक्तेनिर्णयः॥ ॥ ॥ अथ नक्तंनिर्णीयते॥ ॥ तत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वाराहपुराणेधान्यव्रतेपठ्यते॥ मार्गशीर्षेसितेपक्षेप्रतिपद्यातिथिर्भवेत्॥ तस्यांनक्तंप्रकुर्वीतरात्रौविष्णुंप्रपूज
येदिति॥ अत्रनक्तशब्दोभोजनपरः॥ कालपरत्वेप्रकुर्वीतेत्यस्यानन्वयात्॥ नहिकालःकेनचित्कर्त्तुंशक्यते।त
स्यभोजनस्यरात्रावितिकालविधिः। अतोदिवाभोजनरहितत्वेसतिरात्रिभोजनंव्रतस्यस्वरूपं। अन्यथास्वतःप्राप्तस्यरात्रि
भोजनस्यविधानवैयर्थ्यात्। तस्यचनक्तभोजनस्यविष्णुपूजनमंगं। तत्सन्निधौपठितत्वात्। तथाहोमोपितदंगं॥ होमंच
तत्रकुर्वीतेत्यभिधानात्॥ एवंचसतिप्रधानाविरोधेनपूजाहोमयोरंगयोर्दिवानुष्ठानमुक्तंभवति॥ प्रधानस्यचनक्त
स्यकालरूपंभविष्यत्पुराणेदर्शितं॥ मुहूर्त्तोनंदिनंनक्तंप्रवदंतिमनीषिणः॥ नक्षत्रदर्शनान्नक्तमहंमन्येगणा
धिपेति॥ अस्यचकालद्वयस्याधिकारिभेदेनव्यवस्थामाहदेवलः। नक्षत्रदर्शनान्नक्तंगृहस्थस्यबुधैःस्मृतम्
॥ यतेर्दिनाष्टमेभागेतस्यरात्रौनिषिध्यतइति॥ स्मृत्यंतरेपि॥ नक्तंनिशायांकुर्वीतगृहस्थोविधिसंयुतः॥ य
तिश्चविधवाचैवकुर्यात्तत्सदिवाकरं॥ सदिवाकरंतुतत्प्रोक्तंअंतिमेघटिकाद्वये॥ निशानक्तंतुविज्ञेयंयामार्द्धे
प्रथमेसदेति॥ रात्रिनक्तभोजनेव्यासः॥ त्रिमुहूर्त्तंप्रदोषस्याद्भानावस्तंगतेसति। नक्तंतुतत्रकर्त्तव्यमिति

CC-0. In Public Domain. Digitization by eGangotri

शास्त्रविनिश्चय इति॥ तदेवं नक्तकालो व्यवस्थितौ॥ तत्र नक्तं प्रदोषव्यापिन्यां तिथौ कार्यं। तदाह वत्सः। प्रदोष
व्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा॥ एकादशीं विना सर्वा शुक्ले कृष्णे तथा स्मृतेति॥ एकादश्यां तु यन्नक्तं तत्रो
दयव्यापिनी तिथिर्ग्राह्या॥ तदुक्तं स्कन्दपुराणे॥ प्रदोषव्यापिनी ग्राह्या सदा नक्तव्रते तिथिः। उदयस्था सदा पू
ज्या हरिनक्तव्रते तिथिरिति। अत्राप्येकभक्तन्यायेन षोढा विषयभेदा उत्प्रेक्षणीयाः॥ मध्याह्नप्रदोषयोरेवभिन्न
त्वात्॥ पूर्वेद्युरेव प्रदोषव्याप्तौ पूर्वतिथिर्ग्राह्या॥ परेद्युरेव प्रदोषव्याप्तौ परतिथिः॥ उभयत्र प्रदोषव्याप्तौ पर
तिथिरेव॥ तदाह जाबालिः॥ सदैव तिथ्योरुभयोः प्रदोषव्यापिनी तिथिः॥ तत्रोत्तरत्र नक्तं स्यादुभयत्रापि
सा यत इति॥ उभयत्रापि दिवारात्रौ च सा तिथिर्विद्यते यत इत्यर्थः॥ उभयत्र प्रदोषव्याप्त्यभावेऽपि परैव॥ त
दाह जाबालिः॥ अतथात्वे परत्रस्याद्स्तादर्वाक्यतो हि सेति॥ प्रदोषे तदभावेप्यस्तमयादर्वाग्यतः सा विद्य
ते ततः सा ग्राह्येत्यर्थः। अस्य च दिवारात्रव्रतत्वेन प्रदोषव्याप्तिवत्सायंकालव्याप्तिरपि निर्णयहेतुर्भवतीत्य
नेनाभिप्रायेणार्वागस्तमयादित्युक्तं॥ दिवारात्रिव्रतत्वं च कूर्मपुराणेऽभिहितं॥ प्रदोषव्यापिनी यत्र त्रिमुहूर्त्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्तादिवा॥ तदानक्तव्रतेकुर्यात्स्वाध्यायस्यनिषेधवदिति॥ यद्यप्यत्रप्रदोषकालसायंकालौद्वावेवप्रयोज
कौप्रतिभासेते तथापिप्रदोषव्याप्तिर्मुख्यःकल्पः॥ सायंकालव्याप्तिरनुकल्पइतिजाबालिवचनादवगम्य
ते॥ तत्रस्यतथात्वइतिप्रदोषव्याप्त्यभावमनूद्यताद‍ृश्यास्तिथेर्ग्राह्यत्वेअर्वागस्तमयाद्यत इतिहेतूपन्यासात्॥
ईद‍ृशेविषयेगृहस्थोपियतिवद्दिवानक्तमाचरेत्॥तदुक्तंस्कंदपुराणे॥ प्रदोषव्यापिनीनस्याद्दिवानक्तंविधी
यते॥ आत्मनोद्विगुणछायामतिक्रामतिभास्करे॥ तन्नक्तंनक्तमित्याहुर्ननक्तंनिशिभोजनं॥ एवंज्ञात्वाततोवि
द्वान्सायान्हेतुभुजिक्रियां॥कुर्यान्नक्तव्रतीनक्तफलंभवति निश्चितमिति॥ यत्तुसप्तमीभानुवासरादौसौरन
क्तंविहितं तत्रपूर्वोक्तविपर्यासेनसायंकालव्याप्तिर्मुख्यःकल्पः॥ प्रदोषव्याप्तिरनुकल्पः॥ एतदेवाभिप्रेत्य
सुमंतुः॥त्रिमुहूर्त्तस्पृगेवाऽन्हिनिशिवैतावतीतिथिः॥ तस्यांसौरंभवेन्नक्तमहन्येवतुभोजनमिति॥ अत्रसा॰
यंव्याप्तेर्मुख्यकालत्वात्॥प्रथमतोनिर्देशः प्रदोषव्याप्तेरनुकल्पत्वात् पश्चान्निर्देशः॥ इतरनक्तेषुतुप्रदो
षव्याप्तेर्मुख्यत्वादुदात्हतकूर्मपुराणवचनेसैवप्रथमंनिर्द्दिष्टा।सायंकालव्याप्तिः पश्चान्निर्द्दिष्टेतिविवेकः॥ ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्वितरनक्तेषुप्रदोषव्याप्तितिथिग्रहणेपिभानुवासरसंक्रांत्यादिनागृहस्थस्यापियदारात्रिभोजननिषे
धः तदादिवैवनक्तंकुर्यात्।।तथाचभविष्योत्तरपुराणे।।येत्वादित्यदिनेब्रह्मन्नक्तंकुर्वंतिमानवाः।।दिनांते
तेपिभुंजीरन् निषेधाद्रात्रिभोजने इति।।अस्मिंश्च दिवाभोजनउत्तमोंतिमोमुहूर्त्तोमध्यमउपांत्यं।। ततःप्रा
चीनोजघन्यः।। एवंचसत्यंतिमभागत्रिमुहूर्त्तवचनान्युपपद्यंते।।रात्रिभोजनेपिघटिकात्रयमुत्तमःकालः
।।घटिकाषट्कंमध्यमःकालः एतदेवाभिप्रेत्यवचनंस्मर्यते।।प्रदोषोस्तमयादूर्ध्वंघटिकात्रयमिष्यतइति।
त्रिमुहूर्त्तःप्रदोषःस्याद्रवावस्तंगतेसतीति।।निशीथपर्यंतोजघन्यःकालः।।नक्तंप्रकुर्वीतरात्राविति सामा
न्येनाभिधानात्।।असौरनक्तेषुसाम्येनवैषम्येणवादिनद्वयेप्रदोषैकदेशव्याप्तौपरेद्युरेवनक्तंकार्यं।।सायंका
लस्यगौणस्यतत्तिथिव्याप्तत्वात्।। अत्राप्येकभक्तवदन्यागनक्तोपवासस्थानीयनक्तयोर्निर्णयोद्रष्टव्यः
।।यथोक्तलक्षणलक्षितयोरेकभक्तनक्तयोरेकस्मिन्दिनेयदाप्रसक्तिस्तदाकथंकर्त्तव्यं।।नचैतादृशीप्रस
क्तिरेवनास्तीतिशंकनीयं।भविष्योत्तरपुराणोक्तेरथसप्तमीव्रतेकदाचित्तत्प्रसक्तेः।। तथाहितत्रतृतीया

दिषुसप्तम्यंतेषुपंचसुदिनेषुक्रमेणैकभक्तनक्तयाचितोपवासपारणानिविहितानि। अत्रयदातृतीयायाम
त्रयपरिमिताततउर्ध्वंचतुर्थीतदामध्यान्हव्यापित्वात्तृतीयैकभक्तंतत्रप्राप्तंप्रदोषव्यापित्वाच्चतुर्थीनक्त
मपितत्रैवतथासतिपरस्परविरोधोदुःपरिहरः॥ अत्रोच्यते॥ एकभक्तस्यप्राथम्यात्प्रबलत्वेनतस्मिन्मुख्य
कल्पएवानुष्ठेयस्तद्विरोधिनितुनक्तेनुकल्पः॥ सचद्विविधः॥ दिनांतरानुष्ठानात्कर्त्रंतरानुष्ठानाच्च। यदाच
तुर्थीपरेद्युर्द्वेध्यासायंकालंव्याप्नोतितदातस्यगौणकालव्यापित्वादेकस्यैवकर्त्तुर्दिनभेदेनव्रतद्वयमनुतिष्ठे
त्। यदाचतुर्थीसमाक्षीणाच॥ तदागौणकालस्याप्यसंभवेनपूर्वेद्युरेवभार्यापुत्रादिनाकर्त्रंतरेणतन्नक्तं
करणीयं॥ ॥इतिनक्तनिर्णयः॥ ॥अयाचितंनिर्णीयते॥ ॥पूर्वोदाहृतेसप्तमीव्रतेपंचम्यामयाचि
तंविहितं॥ तस्यैकभक्तवत्स्वातिपदोक्तःकालविशेषविधिर्नास्ति॥ तस्ययाचितभोजननिषेधरूपत्वात्॥ सच
निषेधउपवासवदहोरात्रंविषयीकरोति॥ अतएवसंकल्पोप्यस्मिन्नहोरात्रेयाचितमन्नंनभोक्ष्यइत्येवंकर्त्त
व्यः॥ अथवायाचितादन्यदयाचितमित्यप्रयत्नलभ्यस्यपरदत्तस्यभोजनंविवक्ष्यतेतदापिपराधीनत्वादेव

CC-0. In Public Domain. Digitization by eGangotri

न तस्य कालविशेषो विधातुं शक्यते ॥ यद्यपि स्वगृहे पूर्वसंचितं वस्तु इदानीमयाचितं भवति तथापि पूर्वं प्र
यत्नसंपादितत्वाद्याचितमेव ॥ अथवा निषेधस्य प्रसक्तिपूर्वकत्वादयाच्ञाप्रसक्तेश्च परद्रव्यविषयत्वात् ॥ अ
याचितशब्दोपि परद्रव्यमेव विषयीकरोति ॥ अत्रायाचितशब्दस्य प्रयोक्तरीत्या ह्यवर्थौ संपन्नौ प्रतिषेधः
पर्युदासश्च । तयोः प्रतिषेधपक्षं प्राजापत्यकृच्छ्रव्याख्यानगौतमो व्यवजहार ॥ अथापरं त्र्यहं नक्तं चन या
चेतेति ॥ पर्युदासपक्षं तु बृहस्पतिर्व्यवजहार । त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितं ॥ त्र्यहं परं तु नाश्नीयात्
प्राजापत्यं चरन्द्विज इति ॥ स्मृत्यंतरेपि ॥ अयाचिताशी मितभुक्परां सिद्धिमवाप्नुयादिति ॥ मितभोजित्वं
दशग्रासत्वं ॥ तदुक्तं चतुर्विंशतिमते ॥ प्रातस्तु द्वादशग्रासा नक्ते पंचदशैव तु ॥ अयाचिते तु द्वौ चाष्टौ प्राजाप
त्यो विधिः स्मृत इति ॥ तच्च भोज्यद्रव्यं परकीयमप्रयत्नोपनीतं चेत्येतदुभयं स्मार्त्तलिंगादवगम्यते ॥ तथा च प्र
तिग्रहप्रकरणे याज्ञवल्क्यः । अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्मण इति ॥ तथा यतिधर्मेषु उशनाः ॥ भिक्षाशनं
समुद्दिष्टं प्राक्के नापि निमंत्रितं ॥ अयाचितं तु तद्भैक्ष्यं भोक्तव्यं मनुरब्रवीत् ॥ यदि प्रतिषेधो यदि वा पर्युदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सः उभयथाप्येकभक्तादिवन्न कालो विशेषणीयः॥ प्रतिषेधेनुद्देश्याभावात् पर्युदासे पराधीनत्वात्॥ असति

तु कालविशेषविधौ न कर्मकालव्याप्तिवचनमत्र प्रवर्त्तते॥ तथा सति किं पूर्वाण्हिकास्तु तिथय इति वचनेन प
राग्रात्या॥ किंवा युग्माग्निवाक्येन पूर्वेति विवक्षायां युग्मवाक्यस्य तिथिविशेषविषयत्वादनुसरणं न्याय्यं॥
अनेनैव न्यायेन प्रतिपद्यप्ययाचिते पूर्वविद्धैव ग्राह्या॥ अयाचितस्य नियमरूपत्वात्॥ द्वितीयादिकयुग्मानां
पूज्यता नियमादिष्वित्युक्तत्वात्॥ ॥ इत्ययाचितनिर्णयः॥ ॥ प्रतिपद्युपवासैकभक्तनक्तायाचितानि नि
र्णीतानि॥ तत्र शुक्लप्रतिपत्पूर्वविद्धोपोष्या कृष्णप्रतिपदुत्तरविद्धा॥ एकभक्तनक्तयोः सर्वासु तिथिषु मध्या
न्हप्रदोषव्याप्त्या निर्णयः॥ अयाचितस्य प्रातिस्विककालविशेषविध्यभावात्॥ उपवासवत् शुक्लकृष्णप्रति
पदौ पूर्वोत्तरविद्धे ग्रहीतव्ये इत्येतावद्व्यवस्थितं॥ अथ प्रतिपद्व्रतानि निर्णीयंते॥ भविष्योत्तरपुराणे।
द्रानं पठ्यते॥ प्रतिपत्सु द्विजान्पूज्य पूजयित्वा प्रजापतिं॥ सौवर्णमरविंदं च कारयित्वाष्टपत्रकं॥ कृत्वा त्वौदुं
बरे पात्रे सुगंधिघृतपूरिते॥ पुष्पैर्धूपैः पूजयित्वा विप्राय प्रतिपादयेदिति॥ ब्रह्मपुराणे फलव्रतं पठ्यते॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

मासि भाद्रपदे शुक्ले पक्षे च प्रतिपत्तिथौ ॥ नैवेद्यं तु पचेन्मौनी षोडशान्त्रिगुणानि च ॥ फलानि पिष्टपक्वानि दद्या
द्विप्राय षोडश ॥ देवाय षोडशैतानि दातव्यानि प्रयत्नतः ॥ भुज्यते षोडश तथा व्रतस्य नियमाशया ॥ एवमन्या
न्यपि दानव्रतान्युदाहरणीयानि ॥ तानि च सर्वाण्युत्तरविद्धायां प्रतिपदि कर्त्तव्यानि ॥ तेषां दैवत्वात् ॥ तदा
ह याज्ञवल्क्यः ॥ पौर्वाण्हिकास्तु तिथयो दैवे कार्ये फलप्रदा इति ॥ यद्यप्येतत्तिथिसामान्यमुपजीव्य
प्रवृत्तं तथापि प्रतिपदि बाधकाभावात् तत्र प्रवर्त्तते ॥ न चात्र युग्मवाक्यं बाधकं ॥ तस्य तिथिविशेषमुप
जीव्य प्रवृत्तस्यापि कर्मकालव्याप्तिवाक्यात् दुर्बलत्वात्तिथि रंगं कर्माङ्गि ततः प्रबलमिति पूर्वमुक्तं ॥
कर्मकालव्याप्तिं च प्रवृद्धयाज्ञवल्क्यश्चाह ॥ कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः ॥ तया क
र्माणि कुर्वीत ह्रासवृद्धी न कारणमिति ॥ स्कंदपुराणे ॥ यस्मिन्काले तु यत्कर्म तत्कालव्यापिनी तिथिः ॥
तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणमिति ॥ गार्ग्योपि ॥ यो यस्य विहितः कालस्तत्कालव्यापिनी ति
थिः ॥ तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणमिति ॥ कर्मकालश्च दानव्रतयोर्दैवत्वेन पूर्वाण्हो वगंतव्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

का-मा ॥पूर्वाण्होवैदेवानामितिशास्त्रात्॥एकभक्तनक्तयोर्दैवत्वेपिप्रतिपदोक्तकालविशेषशास्त्रेणसामान्यरू
६१ पंपूर्वाण्हशास्त्रंबाध्यते॥नत्वेवंप्रकृतयोर्दानव्रतयोःकिंचिद्बाधकमस्ति॥अन्हःपूर्वोभागःपूर्वाण्हःसच
पंचधाविभागपक्षेमुहूर्त्तत्रयात्मकःप्रातःकालः॥चतुर्द्धाविभागपक्षेसार्द्धप्रहरात्मकः॥त्रिधाविभाग
पक्षेपंचमुहूर्त्तात्मकः द्वेधाविभागपक्षेसार्द्धसप्तमुहूर्त्तात्मकः॥पंचदशधाविभागपक्षेप्यर्थात्तथैवसंप
द्यते॥यद्यपिबहुशास्त्रानुरोधेनपंचधाविभागएवात्रग्राह्यइतिपूर्वमुक्तंतथापिबहुकर्त्तव्योपेतयोर्दान
व्रतयोर्मुहूर्त्तत्रयमात्रेणानुष्ठातुमशक्यत्वात्॥इतरेपिपक्षाअनुकल्पत्वेनग्रहीतव्याः॥यत्रसार्द्धसप्तमु
हूर्त्तैरपिकर्मनसमाप्यतेतत्रकृत्स्नोदिवसोभ्यनुज्ञायते॥अतएवदेवलः॥यांतिथिंसमनुप्राप्यउदयंयाति
भास्करः॥सातिथिःसकलाज्ञेयास्नानदानजपादिष्विति॥व्यासोपि॥उदयन्नेवसवितायांतिथिंप्रतिपद्यते
सातिथिःसकलाज्ञेयादानाध्ययनकर्मस्विति॥भविष्योत्तरपुराणेपि॥व्रतोपवासनियमेघटिकैकायदा राम
भवेत्॥सातिथिःसकलाज्ञेयापित्र्यर्थेवापराण्हिकीति॥पद्मपुराणेपि॥व्रतोपवासनियमेघटिकैकाय ६१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वा भवेत्॥उदये सा तिथिस्तत्र विपरीता तु पैतृक इति॥ स्कंदपुराणेपि॥ व्रतोपवासस्नानादौ घटिकैका यदा
भवेत्॥उदये सा तिथिर्ग्राह्या विपरीता तु पैतृक इति॥ विष्णुधर्मोत्तरेपि॥ व्रतोपवासस्नानादौ घटिकैका यदा
भवेत॥उदये सा तिथिर्ग्राह्या श्राद्धादावस्तगामिनीति॥ बौधायनोपि॥ आदित्योदयवेलायां याल्पापि चति
थिर्भवेत्॥ पूर्णा इत्येव मंतव्या प्रभूता नोदयं विनेति॥नन्वस्त्वेवं कृत्स्नदिवसाभ्यनुज्ञा तथाप्युत्तरविद्धाया
स्तिथेर्ग्रहणे कियत्परिमाणमुदये अपेक्षणीयमिति विवेचनीयम्॥तत्र बौधायनेनाल्पापीत्यभिधानात्॥ नि
मेषमात्रं प्रतिभाति॥ तथा व्यासवाक्येपि प्रतिभाति॥उदयन्नेवेत्यभिधानात्॥ भविष्योत्तरपुराणादिवचने
षु घटिकामात्रं प्रतीयते॥ वचनांतरे तु विष्णुधर्मोत्तरबौधायनप्रोक्ते घटिकाचतुष्टयं भासते॥ तथा च पठ्य
ते॥उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ॥ द्विमुहूर्तं त्रिरन्हश्च सा तिथिर्हव्यकव्ययोरिति॥अस्यार्थः॥ भा
नावुदिते सत्युत्तरकाले न्हो मुहूर्तद्वयं दैवतं॥ तस्मिंश्चास्तमिते ततः पूर्वकालीनमन्हो मुहूर्तत्रयं पित्र्यं दैव
त्यं। अतस्तावत्कालव्यापिनी या तिथिर्भवति सैव क्रमेण हव्यकव्ययोर्ग्राह्या॥अत्रोच्यते॥ पौर्वाण्हिकाइ

का॰मा॰ ति वचनेन दैवे पूर्वाण्हव्यास्यभिधानात्॥ पूर्वाण्हस्य पंचधाविभक्तस्य मुख्यत्वादुदिते भानौ त्रिमुहूर्त्ता तिथि
६४ र्ग्रहीतव्या॥ यत्तु दक्षेणोक्तं॥ त्रिमुहूर्त्ता न कर्त्तव्या या तिथिः क्षयगामिनी। द्विमुहूर्त्तापि कर्त्तव्या या तिथिर्वृद्धि
गामिनीति॥ तन्न त्रिमुहूर्त्तव्याप्तेर्बाधकं प्रत्युतोपोद्बलकमेव। तथाहि प्रतिषेधः॥ सर्वत्र प्रसक्तिपूर्वकः प्रसक्ति
श्चात्र यथोक्तरीत्या पौर्वाण्हिकवाक्यात्त्रिमुहूर्त्तमभिधायि पैठीनसिवाक्याद्वा भवति॥ तच्च प्रसक्तं त्रिमुहूर्त्त
त्वं समतिथौ बाधकाभावात्तथैव व्यवतिष्ठते। तिथिक्षये त्वधिकव्याप्तिविधित्सया प्रतिषिध्यते॥ अतस्तत्र चतु
र्थमुहूर्तस्पर्शिनी तिथिर्ग्राह्या॥ तिथिसाम्यवत्तिथिवृद्धावपि मुहूर्त्तत्रयमेव मुख्यं॥ मुहूर्त्तद्वयं त्वनुकल्पः
॥ अत एव सूचयितुं द्विमुहूर्त्तापीत्यपिशब्दः पठ्यते॥ नन्वत्र क्षयवृद्ध्युपजीवनेन निर्णयः क्रियते॥ स चा
नुपपन्नः॥ व्यासवाक्ये ह्रासवृद्धिचोदनायाः पित्र्यविषयत्वाभिधानादेकोद्दिष्टादिवृद्ध्यादौ ह्रासवृद्ध्या
दिचोदनेति हि पूर्वमुदाहृतं॥ दानव्रते च दैवे अतः कथमनयोर्वृद्धिक्षयाभ्यां निर्णयः॥ किं चोदाहृतयाज्ञ राम
वल्क्यस्कंदपुराणगार्ग्यवचनेषु ह्रासवृद्धी न कारणमित्युक्तं॥ तत्कथमत्र ह्रासवृद्ध्योर्निर्णयकारणत्वं॥ ६२

CC-0. In Public Domain. Digitization by eGangotri

अत्रोच्यते॥ संति ह्यन्यानि ह्रासवृद्धिवाक्यानि॥ तत्रोशना॥ खर्वो दर्पस्तथा हिंस्रा त्रिविधं तिथिलक्षणं॥ ख
र्वदर्पौ परौ कार्यौ हिंस्राः पूर्वत्र युज्यते॥ भविष्योत्तरे॥ खर्वो दर्पस्तथा हिंस्रा त्रिविधं तिथिलक्षणं॥ खर्वदर्पौ प
रौ कार्यौ हिंस्रा स्यात्पूर्वकालिकीति। पितामहोपि। खर्वो दर्पस्तथा हिंस्रा त्रिविधं तिथिलक्षणं। खर्वदर्पौ परौ पूज्यौ हिं
स्रा स्यात्पूर्वकालिकीति। खर्वः साम्यं। अल्पक्षयो वा। दर्पो वृद्धिः। हिंस्रा अधिकक्षयः। एतैः खर्वादिवाक्यैः सह यस्मिन्विषये यु
ग्मादिवाक्यस्य विरोधः प्राप्नोति तत्र दैवपित्र्यभेदेन व्यवस्थापकं व्यासवाक्यं न तु प्रकृतयोः क्षयवृद्ध्योः पित
विषयत्वप्रतिपादकं याज्ञवल्क्यादिवचनेष्वपि कर्मकालव्याप्तिशास्त्रस्य खर्वदर्पादिशास्त्रस्य च विरोधे प्राप्ते
सति कर्मकालशास्त्रस्य प्राबल्यमुच्यते न तु प्रकृतयोः क्षयवृद्ध्योर्निर्णयहेतुत्वं प्रतिषिध्यते॥ ननु व्यासः खर्वा
दिवाक्यानि पित्र्यविषयत्वेन संकोचयामास याज्ञवल्क्यादयस्तु पित्र्ये कर्मकालव्याप्त्या खर्वादिवाक्यान्यबा
धंत॥ हंतैवं निर्विषयत्वमेषां प्रसज्येतेति चेत्॥ नैव यदा पूर्वोत्तरदिनयोः पित्र्यविषय— कर्मकालव्याप्तिः समा
ना यदा वा दिनद्वयेपि कर्मकालव्याप्त्यभावस्तत्रोभयत्र खर्वादिवाक्यैर्निर्णेतुं शक्यत्वात्॥ आस्तां प्रासंगिकी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

 रववौदिवाक्यचिंता ॥ प्रकृते तु सूर्योदये मुहूर्तत्रयव्यापिनी प्रतिपद्दानव्रतयोर्ग्रहीतव्या ॥ एवं सत्युदयमात्र
 व्याप्तिशास्त्रं घटिकामात्रव्याप्तिशास्त्रं चैवैश्वानराधिकरणन्यायेनावमुत्यानुवादरूपतया त्रिमुहूर्तव्या
प्तिं प्रशंसंति ॥ अथवा पूर्वेद्युरुदयकालं परित्यज्यापरि सर्वत्र व्याप्नोति परेद्युरुदयकालमात्रं व्याप्नोति तदा
नीमुदयानंतरभाविन्या मुख्ययास्त्रिमुहूर्तव्याप्तेर्दिनद्वयेप्यभावेन द्वयोरपि दिनयोर्गौणकालत्वे सति किं
ग्राह्यमिति वीक्षायां पूर्वदिने कर्मकालव्याप्तेर्भूयस्त्वात्तस्यैव ग्रहणं न्यायतः प्राप्तं ॥ केनापि निमित्तेन तत्सस्पृ
हे सति परेद्युः कर्मकालव्याप्तिसंपादनाय पूर्णत्वमभिधायोदयविहीनस्य व्याप्तिबाहुल्यस्य हेयत्वोक्ति
व्याजेन तदेव प्रशस्यते ॥ आदित्योदयवेलायां याल्पापि च तिथिर्भवेत् ॥ पूर्णा इत्येव मंतव्या प्रभूता नोदयं
विनेति । यदा पूर्वेद्युः संगवमारभ्य परेद्युरुदयात्प्रागेव तिथिक्षयवशात्समाप्ता तदा यद्यपि दिनद्वये
सोदयमुहूर्तत्रयं नास्ति तथापि पूर्वेद्युरेवानुष्ठेयं ॥ सा तिथिः सकला ज्ञेया यस्यामस्तमितो रविरिति वचनेन
संपाद्यायाः सोदयत्रिमुहूर्ताया व्याप्तेर्विद्यमानत्वात् ॥ परेद्युस्तादृश्या अप्यभावात् ॥ यदा पूर्वेद्युरुदयमा

CC-0. In Public Domain. Digitization by eGangotri

रभ्यपरेद्युरुदयादूर्ध्वंमुहूर्त्तत्रयंवर्द्धते तदानींयद्यपिद्वयोर्दिनयोःसोदयत्रिमुहूर्त्तव्याप्तिरस्ति तथापिपू
र्वेद्युरेवानुष्ठानं॥ अस्तमयव्याप्तेरधिकत्वात्॥ अतएवपद्मपुराणेभिहितं॥ व्रतेस्नानेतथाभक्तेपितृकार्ये
विशेषतः॥ यस्यामस्तंगतोभानुः सातिथिःपुण्यभाग्भवेदिति॥ नन्वास्तांसोदयस्त्रिमुहूर्त्तव्याप्तिरस्तमय
व्याप्तिश्च निर्णयस्तुशुक्लकृष्णपक्षाभ्यांभविष्यति॥ तथाचमार्कंडेयः॥ शुक्लपक्षेतिथिर्ग्राह्या यस्यामभ्यु
दितोरविः॥ कृष्णपक्षेतिथिर्ग्राह्या यस्यामस्तमितोरविरिति॥ विष्णुधर्मोत्तरेपि॥ वर्द्धमानेतुपक्षस्यउदयेपू
ज्यतेतिथिः॥ यदाचंद्रः क्षयंयाति तदास्यादापराण्हिकीति॥ अथवापक्षस्यवृद्धिक्षयाभ्यांनिर्णेतव्यं॥ तथा
च वृद्धवसिष्ठः। वर्द्धमानस्यपक्षस्यउदयेपूज्यतेतिथिः॥ यदापक्षः क्षयंयातितदास्यादापराण्हिकीति॥
बौधायनः॥ सातिथिस्तच्चनक्षत्रंयस्यामभ्युदितोरविः॥ वर्द्धमानस्यपक्षस्यहानौत्वस्तमयंप्रतीति॥ अ
त्रोच्यते॥ शुक्लपक्षकृष्णपक्षाभ्यांनिर्णयोनसंभवति॥ तथासतिबहुवचनबाधप्रसंगात्॥ तथाहि॥ यानि
वचनानिपूर्वंविज्ञायांशुक्लप्रतिपदिउपवासविधायकानिपूर्वमुदाहृतानितानिबाध्येरन्॥ तथाकृष्णप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तिपदःपरविद्धायाउपोष्यत्वंपूर्वंनिर्णीतंतच्चाविपरिवर्तेत॥एवमेकभक्तादावपियथायोगंविपरिवृत्तिरुन्नेया।
नापिपक्षस्यक्षयवृद्धिभ्यांनिर्णयोयुज्यते॥तत्राप्युक्तदोषस्यापरिहार्यत्वात्॥यदाशुक्लपक्षस्तिथिवृद्ध्या
षोडशदिनात्मकोभवतितदाभवन्मतेपरविद्धायांशुक्लप्रतिपद्युपवासःप्राप्नोति॥कृष्णपक्षस्यतिथिक्षय
वशाच्चतुर्दशदिनात्मकत्वेपूर्वविद्धायांकृष्णप्रतिपद्युपवासःप्राप्नोति॥एवंबाधांतरमुन्नेयं॥अस्तिचशु
क्लकृष्णपक्षवाक्यस्यविनाप्यन्यबाधंविषयविशेषः॥तथाह्यांगिरसास्मर्यते॥संपूर्णादशमीकार्यापरया
पूर्वयाथवा॥युक्तानदूषितातस्मादितिसासर्वतोमुखीति॥तत्रशुक्लकृष्णपक्षाभ्यांव्यवस्थाकर्त्तव्या॥प
क्षवृद्धिक्षयवाक्यमपिपूर्वेणसमानविषयतयाव्याख्येयं॥वर्द्धमानस्यचंद्रस्ययःपक्षस्तस्येतियोजनीयं
॥तथासतिशुक्लपक्षइत्युक्तंभवति॥यदापक्षःक्षयंयातिइत्यत्रापिपक्षनिर्वाहकश्चंद्रःक्षयंयातीतिव्याख्या
नेकृष्णपक्षइतिलभ्यते॥अतोयथोक्तसोदयत्रिमुहूर्त्तव्याप्तिकृतोनिर्णयःसुस्थितः।अत्राप्येकभ
क्तवतोद्वाभिद्यते॥उदयकालेपूर्वेद्युरेवत्रिमुहूर्त्तव्यापिनी॥परेद्युरेवत्रिमुहूर्त्तव्यापिनीउभयत्रापित्रि

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुहूर्तव्यापिनी नोभयत्र त्रिमुहूर्त्तस्पर्शिनी॥ उभयत्र साम्येन वैषम्येण वा त्रिमुहूर्त्तवर्त्तिन्येकदेशवर्त्ति-
नी चेति॥ अत्र प्रथमपक्षे खंडतिथित्वाभावान्नास्ति संदेहः॥ तृतीयादिषु चतुर्षु पक्षेषु अस्तमयव्याप्तेः क-
र्मकालबाहुल्यस्य च लाभात्पूर्वेद्युरेवानुष्ठानं॥ द्वितीयपक्षे तु क्षयगामित्वे त्रिमुहूर्त्तोमप्युत्तरविद्धां परित्य-
ज्य पूर्वेद्युरेवानुष्ठानं॥ वृद्धिगामित्वे साम्ये च परेद्युरिति निर्णयः॥ इष्ट्यंगभूतानुप्रतिपत्सर्वैनिर्णयेव स्यते॥ ॥
॥ इति दानव्रतनिर्णयः॥ ॥ उक्तान्युपवासैकभक्तायाचितदानव्रतानि प्रतिपद्विषयाणि तावता दैवविषयो
निर्णयः सुस्थितः॥ ॥ अथ पित्र्यं निर्णीयते॥ तत्र सामान्येनापराण्हप्रतिपदि पित्र्यं विहितं॥ प्रतिपत्सेव वि-
ज्ञेया याभवेदापराण्हिकी॥ दैवकर्मतथा ज्ञेयं पित्र्यं वा मनुरब्रवीदिति हि व्यासवाक्यं पूर्वमुदाहृतं॥ पित्र्यं
च द्विविधं एकोद्दिष्टं पार्वणं च॥ तयोः स्वरूपमाह कण्वः॥ एकमुद्दिश्य यच्छ्राद्धमेकोद्दिष्टं प्रकीर्तितं॥ त्रीनुद्दि-
श्य तु यत्तद्धि पार्वणं मुनयो विदुरिति॥ तत्र प्रतिपदि मृतस्य मासांतरवर्त्तिन्यां प्रतिपद्येकोद्दिष्टरूपं मासिकं प्र-
सक्तं॥ संवत्सरांतरवर्त्तिन्यां तस्यां प्रतिपदि पार्वणरूपमाब्दिकं श्राद्धं प्राप्नोति॥ तत्र मासिकस्य तद्दिन कर्त्तव्य

CC-0. In Public Domain. Digitization by eGangotri

तामाह॥ याज्ञवल्क्यः॥ मृतेहनि तु कर्त्तव्यं प्रतिमासं तु वत्सरं॥ प्रतिसंवत्सरं चैवमाद्यमेकादशेहनीति॥ ते
षां च मासिकानामेकोद्दिष्टरूपत्वं पैठीनसिराह॥ षाण्मासिकाब्दिके श्राद्धे स्यातां पूर्वेद्युरेव ते॥ मासिकानि
स्वकीये तु दिवसे द्वादशेपि वा॥ सपिंडीकरणादर्वाक् कुर्वन् श्राद्धानि षोडश॥ एकोद्दिष्टविधानेन कुर्यात्सर्वा
णि तानि त्विति॥ अयमर्थः॥ ऊनषाण्मासिकं सप्तममासगतमृताहदिनात्पूर्वेद्युरनुष्ठेयं॥ ऊनाब्दिकं
च द्वितीयवत्सरादेर्मृताहदिनात्पूर्वेद्युः कर्त्तव्यं॥ मासिकानि तु तत्तन्मासस्य मृताहदिनेनुष्ठेयानि॥ स एव मु
ख्यः कल्पः॥ यदा तु द्वादशाहादौ सपिंडीकरणं तदा॥ तस्मात्पूर्वं यस्मिन्कस्मिन्नपि वा दिने मासिकान्यनु
ष्ठेयानि सोयमनुकल्पः॥ पक्षद्वयेप्येकोद्दिष्टविधानमेव॥ न तु पार्वणविधानमिति॥ अत्रेदं चिंत्यते॥ कि
मेकोद्दिष्टेष्वपराण्हव्यापिनी तिथिर्ग्राह्या किंवा सायान्हव्यापिनी उतास्तमयव्यापिनी॥ अहोस्विन्मध्यान्ह
व्यापिनीति॥ न चात्र पक्षांतराणि संभाव्यंते॥ तत्साधकाभावात्॥ ननु युग्माग्निवाक्यं तिथिह्रासवृद्धिवाक्यं
शुक्लकृष्णपक्षवाक्यं पक्षस्य यद्वृद्धिवाक्यं कर्मकालव्याप्तिवाक्यं वा पक्षांतरसाधकं भविष्यति॥ मैवं॥ पक्षस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वृद्धिवाक्यस्य शुक्लकृष्णपक्षपरत्वेन व्याख्यातत्वात्॥ शुक्लादिवाक्यं तु पूर्वोत्तरयोस्तिथ्योः शास्त्रांतराभ्यां प्राप्तिसाम्ये सति पुरुषेच्छानिवारणाय व्यवस्थापकमित्युक्तं॥ तिथिह्रासवृद्धी तु कर्मकालेन बाध्येते॥ कर्मकालवाक्ये साक्षादेव ह्रासवृद्धी न कारणमित्युक्तत्वात्॥ युग्मवाक्यं तु न पित्र्यविषयं। कर्मकालश्चैकोद्दिष्टस्य नाद्यापि निर्णीतः॥ अतो न पक्षांतरसंभवः। उपन्यस्ते पुनः पक्षे प्रथमं तावत्सामान्यविशेषशास्त्राभ्यामपराह्णव्यापिनी प्रतिभाति॥ अपराह्णिकास्तथा ह्येताः पित्र्यर्थे तु शुभावहाः इति हि निगमवाक्यं पूर्वमुदाहृतम्॥ हारीतोपि॥ अपराह्णः पितृणां तु याऽपराह्णानुयायिनी॥ सा ग्राह्या पितृकार्ये तु न पूर्वास्तानुयायिनीति॥ बृहन्मनुरपि॥ यस्यामस्तं रविर्याति पितरस्तामुपासते॥ तिथिं तेभ्योऽयतो दत्तो ह्यपराह्णः स्वयं भुवेति॥ तदेतत्सामान्यशास्त्रं तिथिमात्रमुपजीव्य प्रवृत्तत्वात्॥ प्रतिपत्स्वेव विज्ञेया या भवेदापराह्णिकीति तु विशेषशास्त्रं तिथिविशेषोपजीवनेन प्रवृत्तत्वात्ताभ्यामुभाभ्यां शास्त्राभ्यां प्रथमपक्ष उत्तिष्ठति॥ द्वितीयपक्षेप्यस्ति शास्त्रद्वयं बोधायनः॥ उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ॥ द्विमुहूर्त्तं त्रिरह्नश्च सा तिथिर्हव्यकव्ययोरिति वचनार्थस्तु पूर्वं व्याख्यातः॥

तदेतत्सायान्हव्याप्तेः सामान्यशास्त्रं॥ विशेषस्तु पैठीनसिना दर्शितः॥ पंचमी सप्तमी चैव दशमी च त्रयोदशी॥
प्रतिपन्नवमी चैव कर्तव्या संमुखी तिथिरिति॥ न चात्रापि प्रतिपदः सांमुख्यमात्रं प्रतीयते तेन तु सायान्हव्याप्ति
रिति शंकनीयं॥ संमुखी नाम सायान्हव्यापिनी दृश्यते यदि इति स्कंदपुराणे॥ सांमुख्यस्य व्याख्यातत्वात्॥ अस्त
मयव्यापित्वपक्षो वृद्धयाज्ञवल्क्येन दर्शितः॥ दैवकार्ये तिथिर्ज्ञेया यस्यामभ्युदितो रविः॥ पितृकार्ये तिथिर्ज्ञेया य
स्यामस्तमितो रविरिति। तथा दानक्रियायामुदाहृतेषु घटिकाव्याप्तिवाक्येष्वस्तमये घटिकाव्याप्तिः पित्र्ये
प्रदर्शिता॥ न चात्र तदेतदुपन्यस्तं पक्षत्रयमेकोद्दिष्टपार्वणविषयं पित्र्यकर्मसामान्यमुपजीव्य प्रवृत्तत्वात्॥ ए
कोद्दिष्टे तु चतुर्थः पक्षो वाचनिकः॥ तथा च गौतमः॥ मध्यान्हव्यापिनी या स्यात्सैकोद्दिष्टे तिथिर्भवेत्॥ अपरा
ण्हव्यापिनी या पार्वणे सा तिथिर्भवेदिति॥ शिवराघवसंवादेपि॥ मध्यान्हव्यापिनी यास्यात्सैकोद्दिष्टे ति
थिर्भवेदिति॥ कर्मकालव्याप्तिशास्त्रेणाप्ययमेव चतुर्थः पक्षः प्राप्यते॥ मध्यान्हस्यैकोद्दिष्टकर्मकालत्वात्॥
तथा च हारीतशातातपौ॥ आमश्राद्धं तु पूर्वाण्हे एकोद्दिष्टं तु मध्यमे॥ पार्वणं चापराण्हे तु प्रातर्वृद्धिनिमित्तक

CC-0. In Public Domain. Digitization by eGangotri

मिति स्मृत्यंतरंच॥ पूर्वान्हे दैविकं श्राद्धमपराण्हे तु पार्वणं॥ एकोद्दिष्टं तु मध्यान्हे प्रातर्वृद्धिनिमित्तक
मिति॥ व्यासः॥ एकमुद्दिश्य यच्छ्राद्धं दैवहीनं विधीयते॥ एकोद्दिष्टं तु नत्प्रोक्तं मध्यान्हे तत्प्रकीर्त्तितमिति॥
मध्यान्हश्च सप्तमाष्टमनवममुहूर्त्तात्मकः॥ ते च मुहूर्त्ता गांधर्वकुतपरौहिणसंज्ञकाः॥ तत्रैकोद्दिष्टस्योप
क्रमे कुतपस्य पूर्वोत्तरभागा विद्धया विकल्पितौ॥ तदाह व्यासः॥ कुतपप्रथमे भागे एकोद्दिष्टमुपक्रमेत्।
आवर्त्तनसमीपे वा तत्रैवं नियतात्मवानिति॥ समाप्तिकालमाह श्लोकगौतमः॥ आरभ्य कुतपे श्राद्धं कुर्यादा
रौहिणं बुधः॥ विधिज्ञो विधिमास्थाय रौहिणं तु न लंघयेदिति॥ तदेवं कुतपरौहिणयोर्मध्यान्हगतमध्यम
चरमभागयोः कर्मकालव्यवस्थितयोः सतोस्तन्मुहूर्त्तव्यापिनी तिथिरेकोद्दिष्टे ग्रहीतव्येति स्थितम्॥
अत्राप्येकभक्तवद्भेदा अवतारणीयाः॥ तत्र पूर्वेद्युरेव परेद्युरेव वा मध्यान्हव्याप्तिरित्यनयोः पक्षयोर्नैकोपि सं
देहः॥ उभयत्र तद्व्यापित्वं तत्स्पर्शाभावो वेत्यनयोः पक्षयोः पूर्वेद्युरेवानुष्ठानम्॥ तथा सति पूर्वोदाहृतान्य
पराण्हसायान्हास्तमयव्याप्तिविषयाणि पित्र्यसामान्यवचनान्यनुगृहीतानि भविष्यंति॥ उभयत्र स

CC-0. In Public Domain. Digitization by eGangotri

म्येन एकदेशव्याप्तौ खर्वादिवाक्यं द्रष्टव्यं॥ तच्च पार्वणप्रस्तावे योजयिष्यते॥ वैषम्येणैकदेशव्याप्तौ तु यदा पूर्वेद्युर्महती तदा महत्वानुग्रहात् सामान्यवचनानुग्रहाच्च पूर्वेद्युरेवानुष्ठानं। यदा परेद्युरेव महती तदा सामान्यशास्त्रमुपेक्ष्यापि महत्वमेवादरणीयमिति पार्वणश्राद्धनिर्णये वक्ष्यते॥ अतस्तेनैव न्यायेनात्रापि परेद्युरेवानुष्ठानं द्रष्टव्यम्॥ ॥ इत्येकोद्दिष्टनिर्णयः॥ ॥ अथ पार्वणश्राद्धं निर्णीयते॥ ॥ पर्वण्यमावास्यायां यद्विहितं तत्पार्वणं॥ तच्च तत्कालं च शातातप आह॥ दर्शश्राद्धं तु यत्प्रोक्तं पार्वणं तत्प्रकीर्त्तितं॥ अपराण्हेपि तृणां तु तस्य दानं विशिष्यत इति॥ यद्यप्येतादृशं पार्वणं प्रतिपदि न प्राप्नोति तथापि तद्विकृतिरूपतया त्रिपुरुषोद्देशेन कर्त्तव्याब्दिककाम्यश्राद्धादेः पार्वणत्वं व्यवहर्त्तुं शक्यं॥ अत एव काण्ववाक्यं पूर्वमुदाहृतं॥ त्रीनुद्दिश्य तु यत्तद्धि पार्वणं मुनयो विदुरिति॥ तथा सति प्रतिपदि मृतस्य वत्सरांतरे तन्मासतत्पक्षवर्त्तिन्यां प्रतिपद्याब्दिकं पार्वणं प्राप्नोति एवमेतस्यार्थस्य प्रापकं वचनं मलमासप्रस्तावे दर्शितं॥ मासपक्षतिथिस्पृष्टे यो यस्मिन्म्रियतेहनि॥ प्रत्यब्दं तु तथाभूतं क्षयाहं तस्य तं विदुरिति॥ ब्रह्मपुराणेपि॥ प्रतिसंवत्सरं का

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्यैमातापित्रोर्मृतेहनि॥पितृव्यस्यत्वपुत्रस्य भ्रातुर्ज्येष्ठस्यचैवहीति॥काम्यंतुपार्वणमपर पक्षेसर्वासुति
थिषुप्रत्येकंविहितं॥तथाचयाज्ञवल्क्यः॥कन्यांकन्यावेदिनश्चपशून्वैसत्सुतानपि॥द्यूतंकृषिंचवाणि
ज्यंद्विशफैकशफास्तथा॥ब्रह्मवर्चस्विनःपुत्रान्स्वर्णरूप्येसकुप्यते॥ज्ञातिश्रैष्ठ्यंसर्वकामानाप्नोतिश्रा
द्धदःसदा॥प्रतिपत्प्रभृतिष्वेकांवर्जयित्वाचतुर्दशीं॥शस्त्रेणतुहतायेवैतेभ्यस्तत्रप्रदीयतइति॥मार्कंडे
योपि॥प्रतिपद्धनलाभायद्वितीयाद्विपदप्रदा।वरार्थिनीतृतीयाचचतुर्थीशत्रुनाशनी॥श्रियंप्राप्नोतिपंच
म्यांषष्ठ्यांपूज्यतमोनरः॥गाणपत्यंचसप्तम्यांअष्टम्यांवृद्धिमुत्तमां॥स्त्रियंनवम्यांप्राप्नोतिदशम्यांपूर्णका
मतां।वेदांस्तथाप्नुयात्सर्वानेकादश्यांक्रियापरः॥द्वादश्यांजयलाभंचप्राप्नोतिपितृपूजकः॥पूजामेधान्य
सून्वृद्धिस्वातंत्र्यंपुष्टिमुत्तमां॥दीर्घमायुर्धनैश्वर्यंकुर्वाणस्त्रयोदशीं॥अवाप्नोतिनसंदेहः श्राद्धंश्रा
द्धपरोनरः॥युवानःपितरोयस्यमृताःशस्त्रेणवाहताः।तेनकार्यंचतुर्दश्यांतेषांतृप्तिमभीप्सता॥श्राद्धंकुर्व
न्नमावास्यांयत्नेनपुरुषःशुचिः॥सर्वान्कामानवाप्नोतिश्राद्धकृत्पुरुषःसदेति॥अतोविकृतिरूपंपार्वणंसंभा

CC-0. In Public Domain. Digitization by eGangotri

व्यते॥ प्रतिपदितस्य च पार्वणस्योचितां तिथिं निर्णेतुं प्रथमतो विधिनिषेधरूपाभ्यां अन्वयव्यतिरेकाभ्याम
नुष्ठानकालो निरूप्यते॥ तत्र शातातपोक्तो विधिरुदाहृतः॥ अपराण्हे पितॄणां त्विति॥ तथा वाक्यांतराण्यपि॥
मनुः॥ तथाश्राद्धस्य पूर्वाण्हादपराण्हो विशिष्यत इति वृद्धमनुहारीतवचनेनैकोद्दिष्टप्रस्तावे उदाहृते॥ अ
पराण्हः स्वयंभुवेति॥ अपराण्हः पितॄणामिति च॥ श्रुतिश्च॥ अपराण्हः पितॄणामिति॥ शंखः॥ पूर्वाण्हे दैवि
कं कृत्यमपराण्हे पितृक्रिया॥ ग्रहणे निशि वा कुर्यान्न रात्रौ पैतृकं पुनरिति॥ स्मृत्यंतरेपि॥ अपराण्हे तु पैतृ
कमिति॥ ननु सायान्हस्यापि कर्मकालत्वं क्वचित्स्मर्यते॥ दिनांते पंच नाड्यस्तु पुण्याः प्रोक्ता मनीषिभिः॥
उदये च तथा पित्र्ये दैवे चैवच कर्मणीति॥ मैवं॥ यमेन प्रतिषिद्धत्वात्॥ सायान्हस्त्रिमुहूर्तः स्यात् श्राद्धं तत्र
न कारयेत्॥ राक्षसी नाम सा वेला गर्हिता सर्वकर्मस्विति॥ तर्हि पंचनाडीवचनं निर्विषयं स्यादिति चेत् न केना
पि निमित्तेनापराण्हासंभवे गौणकालाभ्यनुज्ञापरत्वात्॥ अत एव व्यासः॥ स्वकालातिक्रमे कुर्याद्रात्रेः पूर्वं
यथाविधिरिति॥ व्याघ्रपादपि॥ विधिज्ञः श्रद्धयोपेतः सम्यक्पात्रनियोजकः॥ रात्रेरन्यत्र कुर्वाणः श्रेयः प्राप्नोत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तमिति॥ ननु सायान्हेपि यथाकथंचित्सत्पूहस्तद्दास्श्राद्धस्य किं लोप एव किं वा रात्रावपि कर्तुं शक्यते॥ ते
त्र लोप एवेति तावत्प्राप्तं कुतः॥ मुख्यकालत्व गौणकालत्वयोः रात्रेर्निषेधात्॥ मुख्यकालत्वं प्रतिषेधति म
नुः॥ रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्त्तिता हिसा॥ संध्ययोरुभयोश्चैव सूर्ये चैवाचिरोदिते इति॥ नन्वेवं सति ग्रहण
श्राद्धमपि प्रतिषिध्येतेति शंकनीयं॥ शातातपेन विशेषितत्वात्॥ रात्रौ श्राद्धं न कुर्वीत राहोरन्यत्र दर्शनात्॥ सू
र्योदयमुहूर्ते च संध्ययोरुभयोस्तथेति॥ गौणकालत्वमपि व्यासव्याघ्रपज्ञ्या पर्युदस्तं रात्रेः पूर्वरात्रेरन्यत्रेति
ताभ्यामुक्तत्वात्॥ तस्मादन्हि श्राद्धासंभवे लोप एवेति प्राप्ते ब्रूमः॥ न तावद्रात्रौ सर्वात्मना श्राद्धस्य निषेधो व
क्तुं शक्यः॥ आपस्तंबेन रात्रौ श्राद्धसमाप्त्यभ्युपगमात्॥ न च नक्तं श्राद्धं कुर्वीतारब्धे च भोजनसमापनमिति
॥ ननु संध्यासमीपे प्रारब्धस्य रात्रौ समाप्तिप्रसंगः॥ तादृशस्य प्रारंभः स्कंदेन निषिद्धः॥ उपसंध्यं न कुर्वीत
पितृपूजां कथंचन॥ स कालआसुरः प्रोक्तः श्राद्धं तत्र विवर्जयेदिति॥ मैवं॥ संध्यासामीप्यस्य मुख्यका
लत्वनिषेधात्॥ गौणकालत्वं तु पूर्वमभिहितं॥ तत्र प्रारब्धस्य रात्रावपि परिसमाप्तिः संभाव्यते॥ नन्वेवमपि

Sanskrit University, Balmeeki Campus, Kathmandu

का॰मा॰ रात्रौ समाप्तिरेवाभ्यनुज्ञायते॥ न त्वारंभ इति चेत्॥ मैवं॥ आरंभस्यापि तथा समाप्त्या उपलक्षणीयत्वात्॥
६९ आब्दिकश्राद्धपरित्यागे प्रत्यवायबाहुल्यस्मरणात्॥ तथा च भविष्यत्सु राणप्रभासखंडयोः पठ्यते॥ मृते
ह्नि पितुर्यस्तु न कुर्याच्छ्राद्धमादरात्॥ मातुश्चैव वरारोहे वत्सरांते मृते ह्नि॥ नाहं तस्य महादेवि पूजां गृ॰
ण्हामि नो हरिरिति॥ अन्यच्चापि॥ भोजको यस्तु वै श्राद्धं न करोति खगाधिप॥ मातापितृभ्यां सततं वर्षे वर्षे मृ
ते ह्नि॥ स याति नरकं घोरं तामिस्त्रं नाम नामत इति॥ अन्यत्रापि पंडिता ज्ञानिनो वापि मूर्खयोषित एव वा॥
मृताहं समतिक्रम्य चांडालाः कोटिजन्मस्विति॥ मरीचिः॥ पंडितास्त्वानिनो मूर्खास्त्रियो वा ब्रह्मचारिणः॥
मृताहं समतिक्रम्य चांडालेष्वभिजायत इति॥ नन्वेवं सति रात्रेरन्यत्र कुर्वाणः श्रेयः प्राप्नोत्यनुत्तममिति॰
स्मरणात्॥ अपराण्हवन्मुख्यत्वेन सायान्हवद्गौणत्वेन वा प्रातःसंगवावपि कालौ प्रसज्येयातां॥ नायं दो॰
षः॥ शिवराघवसंवादे प्रातःकालस्य निषिद्धत्वात्॥ प्रातःकाले तु न श्राद्धं प्रकुर्वीत द्विजोत्तम॥ नैमित्तिकेषु राम
श्राद्धेषु न कालनियमः स्मृत इति॥ यद्यपि संगवो न साक्षान्निषिद्धस्तथापि कुतपमुहूर्ते मुख्यो पक्रम्य॰ ६९

CC-0. In Public Domain. Digitization by eGangotri

स्य गांधर्वमुहूर्तेन च गौणोपक्रमस्याभिधाने सति अर्थान्निषेधः परिशिष्यते॥ उपक्रमद्वयं च शिवराघवसंवाद
एव दर्शितं॥ ग्रहादिव्यतिरिक्तस्य प्रक्रमे कुतपः स्मृतः॥ कुतपाद्यवाप्यर्वागासनं कुतपे भवेदिति॥ ग्रहो
ग्रहणं॥ आदिशब्देन संक्रांत्यादिनिमित्तमुच्यते॥ तस्य च निमित्ताधीनत्वात्॥ कुतपो न नियंतुं शक्यते॥ इत
रस्य तु सांवत्सरिकादेरस्ति कुतपनियमः॥ स चोपक्रमे नियमः॥ कदाचित्कार्यवशाच्छ्राद्धस्य सहसाकरणी
यत्वे सति कुतपादर्वाचीनो गांधर्वोप्युपक्रमकालतयाभ्यनुज्ञायते॥ कुतपस्य मुख्यत्वमनेकवचनविहित
त्वादवगंतव्यम्॥ तत्र कुतपस्वरूपं भविष्यत्पुराणेभिहितं॥ प्रविश्य भानुः स्वच्छायां शंकुवद्यत्र तिष्ठति
॥ स कालः कुतपो नाम मंदीभूतस्य संज्ञयेति॥ नारदः॥ संत्यज्य सप्तमं भागं अष्टमं क्रमते यदा॥ स कालः
कुतपो ज्ञेयो मंदीभूतस्य संज्ञयेति॥ आपस्तंबः॥ सप्तमात्परतो यस्तु नवमात्पूर्वतः स्थितः॥ उभयोरपि म
ध्यस्थः कुतपः स उदाहृत इति॥ स च कुतपो मुख्यत्वाय वायुपुराणे प्रशस्यते॥ दिवसस्याष्टमे भागे मंदीभ
वति भास्करः॥ स कालः कुतपो नाम पितॄणां दत्तमक्षयमिति॥ कुतपात्पूर्वोत्तरयोर्गांधर्वरौहिणयोर्गौणप्रक्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मकालत्वंसूचयितुं छत्रियन्यायेनमुहूर्त्तत्रयंकुतपशब्देनव्यवजहारनारदः॥ मध्येन्हस्त्रिमुहूर्त्तेतुयदा
भवतिभास्करः॥सकालःकुतपोनामपितॄणांदत्तमक्षयमिति॥कुतपेप्रक्रांतस्यसायान्हादर्वाचीनःसर्वोपि
मुख्योनुष्ठानकालः॥तदुक्तंमत्स्यपुराणे॥अन्होमुहूर्त्ताविख्यातादशपंचचसर्वदा।तत्राष्टमोमुहूर्त्तोयः
सकालःकुतपःस्मृतः॥अष्टमेभास्करोयस्मात् मंदीभवतिसर्वदा॥तस्मादनंतफलदस्तत्रारंभोविधीयते।
ऊर्ध्वंमुहूर्त्तात्कुतपाद्यन्मुहूर्त्तचतुष्टयं॥मुहूर्त्तपंचकंह्येतत्स्वधाभवनमिष्यतइति॥नन्वपराण्हस्यांतिमो
भागोनिषिद्धः॥तथाचयमः॥चतुर्थेप्रहरेप्राप्तेयःश्राद्धंकुरुतेनरः॥आसुरंतद्भवेच्छ्राद्धंदातातुनरकंव्रजे
दिति॥स्मृत्यंतरेपि॥चतुर्थेप्रहरेप्राप्तेयःश्राद्धंकुरुतेद्विजः॥तदन्नंराक्षसोभुंक्तेनिराशाःपितरोगताइति
चेन्नायंदोषः॥इहापरान्हस्यांतिमेनपादन्यूनमुहूर्त्तेनसहसायान्हश्चतुर्थप्रहरोभवति॥तत्रसायान्ह
भागेकटाक्षेणायंनिषेधोनत्वपराण्हभागकटाक्षेण॥तामेतांविवक्षांविशदीकर्त्तुंयमोवचनांतरेणसाया
न्हंनिराचकार॥तच्चवचनंपूर्वमुदाहृतं॥नन्वपराण्हस्यमुख्यकालत्वंनप्रतिनियतं।शुक्लपक्षेव्यभिचा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रात्।। तथाच मार्कंडेयः।शुक्लपक्षेतुपूर्वाण्हेश्राद्धंकुर्याद्विचक्षणः ।।कृष्णपक्षेपराण्हेतुरौहिणंनतुलंघयेदि॰
ति।। नैषदोषः।। अत्रशुक्लकृष्णयोः शब्दयोर्दैवपित्र्यपरत्वात्।।दैवान्नु द्दिश्यक्रियमाणंश्राद्धंदैवं।तच्चफल
कामिनामुत्साहहेतुतयाचित्तप्रसादंजनयतीतिशुक्लशब्देनाभिधीयते।।एवंपितॄनुद्दिश्यक्रियमाणंपि
त्र्यंतद्पिपितृमरणादिस्मारकतयाचित्तकालुष्यंजनयतीतिकृष्णाशब्देनाभिधीयते।।शुक्लस्यदैवस्यक
र्मणः पक्षः शुक्लपक्षः।। यदादैवंश्राद्धंकरिष्यामीतिबुद्धिस्तदेत्यर्थः।।एवमितरत्रयोजनीयं।।एवंसत्यपरा
ण्हेनपार्वणश्राद्धंव्यभिचरति।।रौहिणंतुनलंघयेदित्येकोद्दिष्टविषयं।। यद्यापा ततःप्रतीतएवार्थोवचन
स्यास्यपरिगृह्येततदापूर्वोदाहृतंवचनजातंनिखिलमपिव्याकुलीभवेत्।।तदेवंपार्वणश्राद्धस्यापरा॰
ण्हः कर्मकालः।।कुतपःप्रारंभकालइति।। भवेतामेतौकर्मतदुपक्रमकालौ।। प्रकृते तु सांवत्सरिकादौप्र
तिपत्पूर्वविद्धाग्राह्याउतोत्तरविद्धेतिवीक्षायांदेवस्वा- मीब्रूते।। यस्मिन्कालेयद्विहितंतदुपक्रमोपसं॰
हारयुक्तेतस्मिन्कालेतस्यांतिथौयस्मिन्नहनिनसंभावयितुंशक्यतेतदुत्तरंपूर्वंवाग्राह्यमिति।।यदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुतपापराण्होभयव्यापिनी नसंभवति ॥ तदाकेवलापराण्हव्यापिन्यपि तिथिर्ग्रहीतव्या॥ पित्र्यर्थेचापरा
ण्हिकीतिभविष्यत्पुराणेभिधानात्॥ हारीतोपि॥ अपराण्हः पितॄणांतुयापराण्हानुयायिनी॥ साग्राह्यापि
तृकार्येतुनग्राह्यास्तानुयायिनीति॥ ननुकेवलापराण्हव्यापिनीवत्केवलमध्यान्हव्यापिन्यपिस्मृत्यंतरेक
र्मांगत्वेनप्रतीयते॥ मध्यान्हव्यापिनीयास्यात्तिथिः पूर्वापरापिवा॥ तत्रकर्माणिकुर्वीतह्रासवृद्धीनकार
णमिति॥ मैवं॥ वचनांतरसंवादेनास्यवचनस्यैकोद्दिष्टविषयत्वेनैकभक्तविषयत्वेनचोपपत्तेः॥ अप
राण्हव्याप्तिरेकभक्तन्यायेनषोढाभिद्यते॥ तत्रपूर्वेद्युरेवापराण्हव्याप्तौयथोक्तवचनेनसाग्राह्या॥ प
रेद्युरेवापराण्हव्याप्तौयथोक्तवचनात्सारंभकालसद्भावाच्चपराशस्ता॥ उभयत्रापराण्हव्यापित्वेबोधा
यनआह॥ अपराण्हद्वयव्यापिन्यतीतस्यचयातिथिः॥ क्षयेपूर्वाचकर्त्तव्यावृद्धौकार्यातथोत्तरेति॥ अ
तीतस्यमृतस्य॥ अत्रेदंचिंत्यते॥ किंमृताहतिथेः प्रतिपदोवृद्धिक्षयाभ्यांनिर्णयः॥ उतोत्तरस्याद्वितीया राम
यावृद्धिक्षयाभ्यामिति॥ प्रतिपदोवृद्धिक्षयाभ्यामितितावत्साम्तं॥ खर्वादिवाक्यतुल्यतयाप्रतिभासमा ७१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नत्वात्॥ तथाहि॥ खर्वोदर्पस्तथाहिंसात्रिविधंतिथिलक्षणं॥ खर्वदर्पौपरौकार्यौहिंसास्यात्पूर्वकालिकी
ति॥ अत्रानुष्ठानांगतिर्थैरेवधर्माः॥ खर्वदर्पहिंसानत्तूपरितनतिथिधर्माः॥ एतच्चदर्शनिर्णयेस्पष्टीकरिष्यते
॥ खर्वादिवाक्यवदत्रापिग्राह्यतिथिगतावेववृद्धिक्षयाविति प्राप्ते ब्रूमः॥ उत्तरतिथिगतावेवात्रवृद्धिक्षयौन
ग्राह्यतिथिगतौ॥ कुतः ह्यपराण्हव्यापित्वाभिधानात्॥ पूर्वेद्युरामध्यान्हावसानममावास्याप्रवृत्तावनन्तोपरा
ण्हापक्रममारभ्यपरेद्युरपराण्हावसानपर्यंतत्वेसतिप्रतिपदोह्यपराण्हव्यापित्वंभवति॥ तच्चत्रिमुहूर्त्तवृद्धा
संपद्यतेनतुक्षयेण॥ तथासतिक्षयेपूर्वानुकर्त्तव्यत्वेतन्नोपपद्यते॥ उत्तरतिथिगतवृद्धिक्षयस्वीकारेतुसुतरां
मिदंवचनमुपपद्यते॥ तथाहि॥ यदापरेद्युर्द्वितीयासायान्हंप्रविशति तदातिथिवृद्धिः॥ तत्रपरेद्युरनुष्ठानंन्या
य्यं॥ कृतप्रमारभ्याशेषमुख्यकालव्यापित्वात्॥ यदाद्वितीयापरेद्युरपराण्हेपिक्रियतीक्षीयते तदाप्रतिपत्पू
र्वविद्धाकर्त्तव्या॥ उत्तरविद्धायाःप्रतिपदोज्योतिःशास्त्रप्रक्रिययापराण्हव्यापित्वेपिपारिभाषिक्यास्मार्त्तप्र
क्रिययातदव्यापित्वात्॥ तथाचस्मर्यते॥ तिथ्यादौचभवेद्यावान्ह्रासोवृद्धिःपरेहनि॥ तावान्ग्राह्यःसपूर्वे

का·मा· द्युरदृष्टोपिस्वकर्मणीति॥तिथ्यादावित्यादिशब्देननक्षत्रयोगौगृह्येतेतिथिनक्षत्रयोगेषुक्षीयमाणेषुसक्षयोया
७२ वत्घटिकापरिमितोभवति।।तावत्घटिकापरिमितःक्षयस्तेभ्यःपूर्वेषुतिथिनक्षत्रयोगेषुज्योतिःशास्त्रेणा
दृष्टोपिस्मार्त्तपरिभाषयागृहीतव्यः॥एवंवृद्धिरपिद्रष्टव्या॥तथासतिप्रकृतेपिद्वितीयायाःअपराण्हेयावान्
क्षयस्तावान्पूर्वेद्युःप्रतिपदियोजनीयः॥तथासत्युत्तरविद्धाप्रतिपन्नापराण्हव्यापिनीपूर्वविद्धातुअपरा
ण्हव्यापिनीसैवग्रहीतव्याभवति॥नन्वस्मिन्वचनेस्वकर्मणीत्युच्यते।।तत्रचस्वकर्मनिमित्तोवृद्धिक्षयः
प्रक्षेपद्वयस्यार्थःसंपद्यते॥नचप्रकृतंप्रत्याब्दिकंद्वितीयायाःस्वकर्म॥अतःकथंतदीयवृद्धिक्षययोवचनस्या
स्यविषयोभवतः॥नैषदोषः॥माभूत्तस्याब्दिकंद्वितीयायाःस्वकर्मप्रतिपदस्तत्तद्भवत्येव॥तथासतिप्रति
सि पदोवत्कर्मतन्निमित्तभूतेसतितस्यांप्रतिपदिवृद्धिक्षयौप्रक्षेपणीयावितिवचनार्थःसंपद्यते॥तौचवृद्धिक्षयौ
प्रक्षेपाधिकरणतिथ्यादेरुत्तरतिथ्यादिगतावितिलभ्यते॥ननुतिथ्यंतरागतयोर्वृद्धिक्षययोस्तिथ्यंतरप्रक्षे रांम
पेसतिज्योतिःशास्त्रप्रसिद्धिःसर्वत्रविप्लवेत।तत्रतांप्रसिद्धिमुपजीव्यप्रवर्तमानःस्मार्त्तनिर्णयः सर्वोपि ९ ७२

विप्लवेतेतिचेत्॥मैवं॥नखल्वयंवृद्धिक्षयप्रक्षेपोनुष्ठेयतिथिनिर्णयायोपन्यस्यतेकिंतर्हिशास्त्रांतरेणानुष्ठेयति
थौनिर्णीतायां तदुपपादनायैतावपायौवृद्धिक्षयावुपन्यस्येते॥यथाद्दानव्रतयोःशास्त्रांतरेणत्रिमुहूर्त्तव्यापिन्यां
तिथौनिर्णीतायांकर्मकालव्याप्त्यभावशंकामपनेतुंसातिथिःसकलाज्ञेयेतिअविद्यमानमपिसाकल्यमापाद्यते।
एवमत्राप्यपराण्हद्वयव्यापिनीत्येतेनबौधायनवचनेनज्योतिःशास्त्रप्रसिद्धं द्वितीयायाःक्षयमुपजीव्यपूर्ववि
द्धायांप्रतिपदिनिर्णीतायांकुतपादिकर्मकालव्याप्त्युत्तरविद्धाप्रतिपत्कुतोनग्राह्येतिशंकामपनेतुंतिथ्यादाविति
वचनेनोत्तरविद्धायांप्रति पद्यपराण्हेक्षयआपाद्यते॥अतोज्योतिःशास्त्रप्रसिद्धेःस्मार्त्तनिर्णयस्यवान
कोपिविप्लवः॥यदादिनद्वयेप्यपराण्हमस्पृष्ट्वावशिष्टंकिंचित्कालंव्याप्नोतितदापूर्वविद्धाप्रतिपद्गृहीत
व्या॥तदाहमनुः॥द्व्यहेप्यव्यापिनीचेत्स्यान्मृताहेतुयदातिथिः॥पूर्वविद्धैवकर्त्तव्यात्रिमुहूर्त्ताभवेद्यदीति॥
सुमंतुरपि॥द्व्यहेप्यव्यापिनीचेत्स्यान्मृताहस्यतुयातिथिः॥पूर्वस्यांनिर्वपेत्पिंडमित्यांगिरसभाषितमिति॥न
त्वपराण्हस्पर्शउभयत्रापिसमानःप्रारंभकालेतुपरेद्युःकुतपेसद्भावोविशिष्यते॥ततःपरविद्धैवकुतोनग्राह्ये

CC-0. In Public Domain. Digitization by eGangotri

का·मा तिचेत्॥ गुणाधिक्यादितिब्रूमः॥ परेद्युः कुतपप्राप्तिरेकएवगुणः पूर्वेद्युस्तुतिथिमूलत्त्वमस्तमयव्याप्तिश्चेति
७३ गुणद्वयम्॥ मूलस्यप्राशस्त्यंनारदीयपुराणेदर्शितं॥ पित्र्यंमूलतिथौ प्रोक्तं शास्त्रज्ञैः कालकोविदैरिति॥ शिव
रहस्यसौरपुराणयोरपिप्रायः प्रांतउपोष्याहितिथिर्दैवफलेप्सुभिः॥ मूलेहिपितृतृप्त्यर्थंपित्र्यंचोक्तंमहर्षिभि
रिति॥ अस्तमयव्याप्तेः प्राशस्त्यमाहमनुः॥ यस्यामस्तंरविर्यातिपितरस्तामुपासते॥ सपितृभ्योयतोदत्तो
ह्यपराण्हस्वयंभुवेति॥ एतत्साप्त्यर्थमेवोत्तरविद्धांप्रतिषेधतिव्यासः॥ अन्त्यस्तमयवेलायांकलामात्रापिया
तिथिः॥ सैवप्रत्याब्दिकेश्राद्धेनेतरापुत्रहानिदेति॥ नचापराण्हवेलायामविद्यमानतयाकर्मकालव्याप्तिर
हितायास्तिथेरनुपादेयत्वमितिशंकनीयं॥ आपाद्यायास्तच्याप्तेर्विद्यमानत्वात्॥ अतएववसिष्ठः॥ पित्र्येस्त
मयवेलायांस्पृष्टापूर्णानिगद्यतइति॥ नारदीयपुराणेपि॥ पारणेमरणेनृणांतिथिस्तात्कालिकीस्मृता
॥ पित्र्येस्तमयवेलायांस्पृष्टापूर्णानिगद्यतइति॥ उदाहृताभ्यामस्तमयस्पर्शवाक्यांभ्यांकलामात्रवाक्येच राम·
पूर्वेद्युः सायंकालव्याप्तिर्विवक्षिता॥ परेद्युरपराण्हस्पर्शहीनस्यपूर्वदिनेसायंप्राप्तेरवश्यंभावात्॥ अन्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यापरण्मुहूर्त्तक्षयप्रसंगात्॥ एतदेवाभिप्रेत्यगोभिलः॥ सायान्हव्यापिनीयातुपार्वणेसाउदात्हतेति॥ ईदृ
शेविषयेपूर्वविद्धायाः कर्त्तव्यताशिवरहस्यब्रह्मवैवर्त्तसौरनारदीयपुराणेषुव्यतिरेकमुखे नदर्शिता॥ दर्शं
चपूर्णमासंचपितुःसांवत्सरंदिनं। पूर्वविद्धमकुर्वाणोनरकं प्रतिपद्यतइति॥ नन्वस्त्वेवमुभयत्रापराण्हः
स्पर्शाभावेतथापराण्हद्वयव्यापिन्यामुत्तरतिथिगतवृद्धिक्षयाभ्यांनिर्णयोस्तु॥ उत्तरतिथेः साम्येतुकथं
वित्तिथिमूलत्वास्तमयव्याप्तिगुणद्वयवशात्पूर्वविद्धायाकर्त्तव्याकिंवाकुतपसद्भाववशादुत्तरविद्धा तत्रा
पराण्हद्वयस्पर्शाभावविषयन्यायेनपूर्वविद्धायांप्राप्तायां देवस्वामिवचनादुत्तरविद्धेतिनिश्चयः।वचनंहिन्या
याद्बलीयः॥ यदातुदिनद्वयेप्यपराण्हैकदेशव्याप्तिस्तदापिवैषम्येणतत्व्याप्तौमहत्वेननिर्णेतव्यं॥ तदा
हमरीचिः।द्वयपराण्हव्यापिनीचेदाब्दिकस्ययदातिथिः।महतीयत्रतद्विद्धांप्रशंतिमहर्षयइति॥ साम्येनोभयत्रव्याप्ति
श्चततिथिगतैर्वृद्धिक्षयसाम्यैस्त्रिधाभिद्यते॥ तथाहि॥ पूर्वेद्युरपराण्हस्यद्वितीयघटिकामारभ्यपरेद्युरपराण्हस्यच
रमघटिकांविहायअवशिष्टासुपंचघटिकासुयदातिथिः वर्त्ततेतदा पूर्वापराण्हस्यप्रथमघटिकांद्वितीयापराण्हस्य

CC-0. In Public Domain. Digitization by eGangotri

चरमघटिकांचविहायावशिष्टासुपंचसुघटिकासुवर्त्तमानत्वात्साम्येनैकदेशव्याप्तिर्भवतितिथिश्चतदाघ
टिकाचतुष्टयेनवर्द्धते॥ यदापूर्वापराण्हस्यचरमघटिकांउत्तरापराण्हस्यप्रथमघटिकायांवर्त्तते॥तदापि
साम्येनएकदेशव्याप्तिर्भवति॥ घटिकाचतुष्टयेनतदातिथिःक्षीयते॥ यदापूर्वापराण्हस्यचरमेघटिकात्रये
द्वितीयापराण्हस्यचाद्येघटिकात्रयेपिवर्त्ततेतदापिसाम्येनैकदेशव्याप्तिस्तदवस्थातिथिस्तुनवर्द्धतेनापि
क्षीयतेकिंतुसमैवईदृशेविषयेखर्वदर्पवाक्यानिर्णयः। तदेवंप्रतिपत्पार्वणरूपमाब्दिकंनिर्णीतं॥पार्वण
रूपस्यकामस्यतुदर्शविकारत्वात्॥प्रातिस्विकविशेषाभावाच्च वक्ष्यमाणेनदर्शनिर्णयेनैवनिर्णयोव
गंतव्यः॥ ॥ इतिमाधवीयेकालनिर्णयेप्रतिपन्निर्णयाख्यं तृतीयप्रकरणं॥ ॥अथद्वितीयामार
भ्यपर्वावसाना श्चतुर्दशतिथयोस्मिन्प्रकरणेनिर्णीयंते॥ प्रथमद्वितीयादीनांपंचदशकलानांक्रमेणचन्द्र
मंडलप्रवेशनिर्गमनाभ्यांशुक्लकृष्णपक्षयोः प्रतिपद्द्वितीयादिनामधेयास्तिथयोभवंति॥तत्रप्रतिपदियोर्नि
र्णयः पूर्वप्रकरणेभिहितःसएवोत्तरासुसर्वासुतिथिषुसाम्येनसंचरयितव्यः॥विशेषस्तुतत्रतत्राभिधास्ये॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रतिपदि दैवं पित्र्यं व्यवस्थापितम्॥ दैवं षड्विधं उपवासैकनक्तभक्तायाचितदानव्रतभेदेन तीर्थस्नानजपहो
मादयस्तु व्रतशब्देनैव संगृहीताः॥ पित्र्यं द्विविधं॥ एकोद्दिष्टं पार्वणं चेति॥ तत्र सर्वत्र कर्मकालव्याप्तियु
क्ताया एव तिथेरनुष्ठानांगत्वं स्मृतिष्वभिप्रेतम्॥ कर्मकालश्च द्विविधो मुख्यो गौणश्चेति॥ तद्यथा॥ एक
भक्ते मध्याह्ने मुख्यः॥ आसायमवशिष्टो गौणः॥ तिथिव्याप्तिर्हि द्विधा स्वाभाविकतिथिव्याप्तिः साकल्या
पादिततिथिव्याप्तिश्चेति॥ तद्यथा॥ यदा संगवपर्यंता मावास्या तदानीमुपरितनो मध्याह्नो मुख्य एव
प्रतिपद्व्याप्तो भवति॥ यदा त्वपराण्हादिमारभ्य तिथिः क्षयवशात्परेद्युः संगवांता प्रतिपद्भवति॥ तदा
पूर्वेद्युर्गौणकालव्याप्तिमुपजीव्यैकभक्तानुष्ठानाय तत्स्वीकारे सति मध्याह्नेऽवश्यानुष्ठेयत्वात्तत्र स्वाभा
विकप्रतिपद्व्याप्त्यभावेऽपि साकल्यवचनापादितप्रतिपद्व्याप्तिः स्वीकृता॥ एवं च सति कर्मकालव्याप्तौ स
र्वस्मृतीनामत्यंतनिर्बंधदर्शनात्कर्मकालव्याप्तिशास्त्रमितरेभ्यः प्रबलमिति निश्चीयते॥ तदनुसारेण
द्वितीयाद्या अपि तिथयउपवासादौ दैव एकोद्दिष्टादौ पैत्र्ये च कर्मकालव्याप्तियुक्ताः स्वीकर्त्तव्याः॥ उपवासस्तु

CC-0. In Public Domain. Digitization by eGangotri

सर्वतिथिषु नारदीये दर्शितः॥ शुक्लान्वा यदि वा कृष्णान् प्रतिपत्प्रभृतींस्तिथीन्॥ उपोष्यैव बलिं दत्त्वा वि
धिनेत्यपरे दिने॥ ब्राह्मणान् भोजयित्वा तु सर्वपापैः प्रमुच्यते इति॥ उपवासस्याहोरात्रः कर्मकालः॥ त
स्मात्तद्व्यापिनी तिथिर्ग्राह्या॥ तदसंभवे खण्डतिथिर्ग्राह्येति निरूप्यते॥ तत्र च सूर्योदये त्रिमुहूर्त्ता ततोधि
का वा प्रतिपद्भवति॥ उत्तरदिने चास्तमयादर्वाक् त्रिमुहूर्त्ता ततोधिका वा तृतीया भवति सेयमुभयवि
द्धा द्वितीया॥ तत्र वेधक तिथेरु—दयेस्तमये वा त्रिमुहूर्त्तत्वं वेधप्रयोजकं न तु ततो न्यूनत्वं तदेव पैठीनसि
वाक्येन पूर्वमुदाहृतम्॥ वेध्यतिथेश्च त्रिमुहूर्त्तसङ्ख्या वोपेक्षित इति हि मुहूर्त्तं त्रिरन्हश्चेत्यनेन सुमन्तु
वचनेन दर्शितम्॥ उदयास्तमययोरेवं वेध इत्ययमर्थ उदये सा तिथिर्ग्राह्या विपरीता तु पैतृक इत्यादि
भिः कात्यायनवचनैरवगन्तव्यः। एवं च सति यथोदाहृते पूर्वविद्धोत्तरविद्धे ये द्वितीये तयोरुत्तरविद्धा द्वि
तीयोपोष्या॥ युग्माग्निवाक्येनान्वयव्यतिरेकाभ्यामुत्तरविद्धायाः प्राशस्त्याभिधानात्॥ यद्यप्युपोष्यत्वं
साक्षान्नाभिहितं तथापि कर्मान्तरविशेषस्यानुपादानात्॥ उपवासविषयत्वं परिशिष्यते॥ तथा हि॥ न तावत्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्यविषयत्वं संभवति॥ व्यासेन युग्मादिशास्त्रस्य खर्वादिशास्त्रस्य च दैवपित्र्यविषयत्वेन व्यवस्थापितत्वा
त्॥ नाप्येकभक्तनक्तविषयं॥ तयोर्मध्यान्ह प्रदोषव्याप्त्यधीनत्वेन युग्मादिशास्त्रानधीनत्वात्।अयाचितस्य
तूपवासवदनुष्ठेयत्वेन न पृथग्विषयत्वं न च दानादिविषयत्वं॥ दानादेः पौर्वाण्हिककतिथौ कर्त्तव्यतया निर्णीयत्वात्
॥ अत उपवासविषयत्वं परिशिष्यते। कदाचिदेकभक्तादितिथौ युग्मादिशास्त्रस्य संवादो भवति॥ तदा तच्छास्त्रमुपो
द्बलकं भवतु॥ न वयं वारयामः॥ वचनांतरे तु युग्मादितिथेरुपोष्यत्वं साक्षात्प्रतीयते॥ तथा च प्रतिपत्प्रकरणे प्रति
पदमावास्यायुग्मस्योपोष्यत्ववचनमुदाहृतम्॥ तत्रापि युग्मत्वाभिप्रायेणैव द्वितीयायाः परिविद्धायाः उपो
ष्यत्वं भृगुस्मृतिविष्णुधर्मोत्तराभ्यां दर्शितं॥ एकादश्यष्टमी षष्ठी द्वितीया च चतुर्दशी॥ त्रयोदशी चतुर्थी च उपोष्याः
स्युः परान्विता इति॥ यदा पूर्वेद्युरुदयमारभ्य परेद्युरुदयस्योपरि त्रिमुहूर्त्तं वर्द्धते॥ तदा पूर्वेद्युरेवोपवासः। न
चोदाहृतेन परान्विता इति वचनेन विरोधः शंकनीयः॥ परान्वितपूर्वान्वितयोः प्रसक्तयोः सतोरस्य वचनस्य नि
यामकत्वात्॥ न चात्र परान्वितत्वं प्रसक्तमस्ति॥ पूर्वस्य दिनस्य संपूर्णतिथित्वात्संपूर्णखंडयोः संपूर्णस्यासं

CC-0. In Public Domain. Digitization by eGangotri

देहत्वेनप्रबलत्वात् ॥ असंजातविरोधित्वकृतत्नकर्मकालव्याप्तिभ्यां पूर्वदिनस्यैव प्राबल्यम् ॥ तस्मात्त
त्रैवोपवासः ॥ ननु पूर्वोपवासंप्रतिषेधनिव्यासः ॥ तृतीययायुताकार्याद्वितीया न तु पूर्वयेति ॥ मैवं ॥ अस्य व
चनस्य खंडतिथिविषयत्वेन संपूर्णतिथावप्रवृत्तेः । खंडतिथिविषयत्वंच पूर्वयायुतानैवकार्येत्यभिधानाद
वगम्यते ॥ ननु खंडतिथावपि द्वितीया पूर्वविद्धैवोपोष्य ॥ प्रतिपत्सद्वितीया स्याद्वितीया प्रतिपद्युतेत्यापस्तंबे
न प्रतिपद्द्वितीययोर्युग्मत्वाभिधानात् ॥ एतदेववचनमुपजीव्य कृष्णप्रतिपत्सु विद्धैवोपोष्येति पूर्वं निर्णीतं एवं
तर्हि द्वितीयापि क्वचित्पूर्वविद्धा भवतु तदुक्तं स्कंदपुराणे ॥ प्रतिपत्संमुखी कार्या या भवेदापराण्हिकी ॥ पूर्वाण्हि
की च कर्त्तव्या द्वितीया तादृशी विभो इति ॥ तादृशी संमुखी पूर्वयुतेत्यर्थः ॥ पूर्वेद्युरुदये मुहूर्त्तं परित्यज्यावशि
ष्टपूर्वाण्ह संबंधिनी यदा भवति तदा वेधकारण्या ॥ पूर्वनिशेः मुहूर्त्तत्रयाभावेन वेद्धुमसामर्थ्यात्स्वयं खंडापि
सती संपूर्णवत्पूर्वत्रोपवासे युज्यते ॥ अत्र द्वितीयानवधाभिद्यते ॥ पूर्वेद्युरुदयमारभ्य प्रवृत्तारुदयं परित्यज्य

प्रवृत्ता पूर्वाण्हं सर्वं परित्यज्य प्रवृत्तेति त्रयो भेदास्तेष्वेकैकस्य परेद्युस्त्रिमुहूर्त्तत्वतन्न्यूनत्वमून्यत्वैस्त्रैवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ध्येसति मिलित्वा नव विधत्वं संपद्यते ।। अत्र पूर्वेद्युरुदयमारभ्य प्रवृत्तायाः संपूर्णत्वेन परेद्युर्मुहूर्त्तत्रयत्वं त
न्न्यूनत्वन्यूनत्वेषु त्रिष्वपि पक्षेषु विवादाविषयत्वात्पूर्वत्रैवोपवासो युक्तः ।। उदयं परित्यज्य कियत्पूर्वाण्हभा
गं प्रक्रम्य प्रवृत्तायाः परेद्युस्त्रिमुहूर्त्ततायां सत्यपि परत्रोपवाससंभवे तां परित्यज्य पौर्वाण्हिकवचनेन पू
र्वेद्युरेवोपवासो विधीयते ।। परेद्युस्त्रिमुहूर्त्तन्यूनत्वे न्ववेधकारिण्यास्तृतीयायाः सत्यपि वेद्धुं सामर्थ्ये वेध्या
या द्वितीयायास्त्रिमुहूर्त्तत्वाभावेन वेधयोग्यत्वाभावात् तत्रोपवासो न प्रसक्तः अतः परिशेषात्पूर्वाण्हवा
क्याच्च पूर्वत्रैवोपवासः ।। पूर्वेद्युः पूर्वाण्हं सर्वं परित्यज्य प्रवृत्तायाः परेद्युस्त्रिमुहूर्त्ततयोभयत्र तिथिसत्त्वात्कु
त्रोपवास इति संदेहे सति व्यासेनोत्तरविधानात्पूर्वदिननिषेधाच्चोत्तरत्रोपवासः ।। न चात्र शुक्लकृष्णव्यव
स्था शंकनीया ।। युग्मवाक्ये शुक्लकृष्णपक्षसाधारणेन परदिनविधानात् कृष्णपक्षेपि तत्त्वरजैर्बाधाभावाच्च ।
अन्ययोस्तु पक्षयोः पूर्ववद्विधानहेत्वेन पूर्वेद्युः पौर्वाण्हिकत्वाभावेपि परिशेषादापस्तंबोक्तयुग्मवाक्याच्च पूर्वे
त्रोपवास इति स्थितम् ।। एकभक्तादिपार्वणश्राद्धांतेषु कर्मसु द्वितीयाप्रयुक्तस्य विशेषस्य क्वचिदप्यस्मर-

का·मा· णात्पूर्वोक्तन्यायो योजनीयः॥ ॥ इतिद्वितीयानिर्णयः॥ ॥ अथतृतीयानिर्णी यते॥ ॥तत्रत्रिविधा
७७ निवचनानि स्मर्यंते॥ कानिचित्पूर्वविद्धाविधायकानि कानिचित्पूर्वविद्धा निषेधकानिकानिचिदुत्तर विद्धावि
धायकानीति॥ तत्रयुग्मवाक्यंतावत्पूर्वविद्धाविधायकंप्रसिद्धं॥ पूर्वविद्धानिषेधकंवा क्यमाहापस्तंबः॥ तृ
तीयातुनकर्त्तव्याद्वितीयोपहिताविभो॥ द्वितीययायुतांतांतुयः करोति नराधमः॥ संवत्सरकृतेनेहसतु धर्मे
णलुप्यते॥ द्वितीयाशेषसंयुक्तां तृतीयांकुरुतेतुयः॥ सयाति नरकंघोरंकाल सूत्रंभयंकरं ॥ द्वितीयाशेषसं
युक्तांया करोति विमोहिता॥ सावैधव्यमवाप्नोतिप्रवदंतिमनीषिण इति ॥स्कंदंपुराणेपि॥ तृतीयातुनकर्त्त
व्याद्वितीयासंयुतातिथिः॥ याकरोतिविमुढास्त्रिपुरुषोवा शिखिध्वज। द्वितीयासंयुतांतात पूर्वधर्मोहिलुप्य
ते॥ विधवात्वंदुर्भगत्वंभवेन्नास्त्यत्रसंशयः॥ कलाकाष्ठापि वाचेवद्वितीयासंप्रदृश्यते॥ सातृतीयानकर्त्त
व्याकर्त्तव्यागणसंयुता। यदिच्छेत्परमंपुण्यंव्रतकर्त्ता शिखिध्वजेति। अत्रपूर्वविद्धाया निषेधबाहुल्यात्सा राम
नग्राह्या युग्मवाक्यंतुरंभाव्रतविषयं भविष्यति॥ रंभाव्रतंतुभविष्यत्पुराणे दर्शितं॥ भद्रे कुरुष्वयत्नेनरं ७७

CC-0. In Public Domain. Digitization by eGangotri

भाख्यं व्रतमुत्तमं ॥ ज्येष्ठशुक्लतृतीयायां स्नाता नियमतत्परेत्यादि ॥ तत्रैवापरं रंभाव्रतं पठितं ॥ रंभातृतीयां
वक्ष्यामि सर्वपापप्रणाशिनीं ॥ मार्गशीर्षेथवा मासि तृतीयायां नराधिप ॥ शुक्लायां प्रातरुत्थाय दंतधावन
पूर्वकमित्यादि व्रतमभिधायोपसंहृतं ॥ सौभाग्यार्थं पुरा चीर्णं रंभया राजसत्तम ॥ तेन रंभातृतीयेयं परं सौभा
ग्यदायिनीति ॥ एतस्य रंभाव्रतस्य पूर्वविद्धायां कर्त्तव्यत्वं स्कंदपुराणे दर्शितं ॥ बृहत्तपा तथा रंभा सावित्री वट
पैतृकी ॥ कृष्णाष्टमी च भूता च कर्त्तव्या संमुखी तिथिरिति ॥ तत्रैव पूर्वविद्धानिषेधो रंभाव्रतव्यतिरिक्तविष
यत्वेन पठ्यते ॥ द्वितीयया तु विद्धा च तृतीया न कदाचन ॥ कर्त्तव्या व्रतिभिस्तात धर्मकामार्थतत्परैः ॥ विद्धा
पैत्रं त्वरंभां च तृतीयां पुण्यवर्द्धनीमिति ॥ उत्तरविद्धाविधायकं तु ब्रह्मवैवर्त्ते दर्शितं ॥ चतुर्थीसंयुता या तु सा
तृतीया फलप्रदेति ॥ आपस्तंबोपि ॥ चतुर्थीसंयुता या च सा तृतीया फलप्रदा ॥ अवैधव्यकरी स्त्रीणां पुत्रसौ
भाग्यवर्द्धनीति ॥ बृहस्पतिरपि ॥ एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी ॥ आमावास्या तृतीया च ता उपोष्याः
परान्विता इति ॥ अस्य चोत्तरविद्धाविधायकस्य रंभाव्यतिरिक्तविषयत्वं ब्रह्मवैवर्त्ते दर्शितं ॥ रंभाख्यां वर्जयि

CC-0. In Public Domain. Digitization by eGangotri

त्वात्तु तृतीयां द्विजसत्तम॥ अन्येषु सर्वकार्येषु गणयुक्ता प्रशस्यत इति॥ क्वचित्तु सर्वत्र तेषु पूर्वविद्धैव। तदाह वशिष्ठः॥ एकादशी तृतीया च षष्ठी चैव त्रयोदशी॥ पूर्वविद्धानुकर्तव्या यदि न स्यात्परेऽहनीति। अत्र परेऽहन्यसत्त्वं त्रेधाभिद्यते। सर्वथैवासत्त्वं द्विमुहूर्त्तासत्त्वं त्रिमुहूर्त्तासत्त्वं चेति॥ सर्वथैवासत्त्वे पूर्वदिनानुष्ठानमस्तु॥ यदा तु परेऽहनि घटिकात्रयं घटिकापंचकं भवति। तदा कथं अस्त्विति महान्संदेहः। त्रिमुहूर्त्तसद्भावस्य मुख्यकल्पत्वात्॥ पंचघटिकापक्षे मुख्यासंभवः॥ द्विमुहूर्त्तसद्भावस्यानुकल्पत्वात् घटिकात्रयपक्षे तस्याप्यसंभवः॥ तदा किं मुख्यानुकल्पयोरभावात्पूर्वेद्युरनुष्ठानं किं वा पूर्वविद्धाया निषेधबाहुल्यात्परेऽहनि अल्पमपि सत्त्वमाश्रित्यानुष्ठानं॥ न चात्र किंचिन्नियामकं वचनमस्ति॥ नापि न्यायेन निर्णेतुं शक्यते॥ न तावत्परदिनं न्याय्यं। ज्ञापकाभावात्॥ नापि मुख्यानुकल्पव्यतिरिक्तं कल्पांतरं संभवति॥ येन ज्ञापकमाशंक्येत। नापि पूर्वदिनं न्याय्यं। निषेधबाधहुल्यात् वसिष्ठवचनोक्तप्रतिप्रसवेन निषेधो बाध्यत इति चेत्॥ मैवं। तस्य वचनस्य परेद्युरसत्त्वं तासत्त्वेप्युपपन्नत्वात्॥ तस्मादागमन्याययोरत्राप्रवृत्तेर्योगिनः सर्वज्ञस्य धर्मसाक्षात्कारासंभवाच्च शि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शाचारएवात्रशरणं॥ अतएवव्यासः। तर्कोप्रतिष्ठः श्रुतयोविभिन्नानवाऋषेर्दर्शनमस्तिकिंचित्। धर्मस्य
तत्वंनिहितंगुहायांमहाजनोयेनगतःसपंथाइति। शिष्टाश्चमुहूर्त्तमात्रसद्भावमाश्रित्य गौरीव्रतंपरेद्यु
रेवानुतिष्ठंति॥ अतोगौरीव्रतंपरेद्युरेवानुष्ठेयं॥ अन्येषुभविष्यत्पुराणाद्युक्तेषुवित्तेशपूजादिषुमुख्यकल्पे
नानुकल्पेनचापरेद्युरनुष्ठानं॥ तद्विषयाश्चपूर्वविद्धानिषेधाः॥ कल्पद्वयासत्वेतुविद्यामानायामपिपरेद्युःस्व
ल्पायामपितृतीयायांतांपरित्यज्यवसिष्ठवचनेनपूर्वेद्युरनुष्ठानं॥ एकभक्तनक्तेतुव्रतांगेव्रतानुसारेणानु
ष्ठेये। स्वतंत्रयोस्तुमध्यान्हप्रदोषव्याप्तिवशेनानुष्ठानं॥ रंभाव्रतेप्यस्तमयादर्वाक्तृतीयायास्त्रिमुहूर्त्त
सद्भावेतस्यामेवपूर्वविद्धायामनुष्ठानंतद्विधायकवाक्येषुसंमुखेत्यभिधानात्सांमुख्यस्यचसायान्हव्या
प्तिरूपत्वात्॥ मुहूर्त्तत्रयान्न्यूनत्वेसतिपूर्वविद्धायाःप्रापकाभावाद्रंभाव्रतेपरविद्धायाअनिषिद्धत्वाच्चसा
मान्यवचनैःपरविद्धाप्रशंसकैःपरेद्युरनुष्ठानंयानिद्वितीयाविद्धायानिषेधकानिवाक्यानितेषुद्वितीयाकि
यतीविवक्षितेतिचेत्॥ मुहूर्त्तत्रयपरिमितेतिब्रूमः॥ वेधशास्त्रेतथाभिधानात्॥ यत्तुकलाकाष्ठापीतिक्व

CC-0. In Public Domain. Digitization by eGangotri

नंतत्कैमुतिकन्यायेनत्रिमुहूर्त्तसत्त्वंद्रढयति॥ ॥इतितृतीयानिर्णयः॥ ॥अथचतुर्थीनिर्णीयते॥ ॥
साचयुग्मवाक्यात्परविद्धापूज्या॥ नचशुक्लपक्षेतथात्वेपिकृष्णपक्षेपूर्वैवस्यादितिशंकनीयं॥ युग्मवाक्यस्य
पक्षद्वयसाधारणत्वात्॥ चतुर्द्दश्याचपूर्णिमेत्येतच्छुक्लपक्षविषयत्वेलिंगमितिचेत्॥ तस्यैकस्ययुग्मस्यशु
क्लपक्षविषयाण्येवेतिचेत्। न। प्रतिपद्यमावास्येत्यनेनपक्षद्वयस्पर्शिनायुग्मेनसाहचर्यादितरेषामपिपक्ष
द्वयस्पर्शित्वंकिंनस्यात्॥ एवंतर्हिसहचर्ययोर्द्वयोरपिपरस्परकलहादनिर्णयइतिचेत् नकारणांतरेणनि
र्णेतव्यत्वात्॥ तर्हिचतुर्द्दशीपूर्णिमायुग्ममेकपक्षवर्त्तितिथिद्वयात्मकत्वात्॥ द्वितीयादियुग्मैःसदृशंप्रति
पदामावास्यायुग्मंतुभिन्नपक्षद्वयवर्तितिथिद्वयरूपत्वाद्विलक्षणं॥ अतःपूर्णिमायुग्मसाहचर्येणैवनि
र्णयइतिचेन्नैवं। श्रुत्यासाहचर्यस्यबाध्यमानत्वात्॥ द्वितीयादिशब्दोमुख्यमारत्यापक्षद्वयवर्त्तिनास्ति॰
थीनब्रूते। सोयंश्रुतिलिंगादिषुषट्सुप्रथमंप्रमाणंसाहचर्यंतुसन्निधिः॥ सचस्थानावांतरभेदत्वात्संच

संप्रमाणं॥ तच्चप्रथमादत्यंतदुर्बलंसोयमर्थः॥ पूर्वमीमांसायांतृतीयेध्यायेश्रुतिलिंगादिसूत्रेमहता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri .

प्रबंधेनप्रपंचितः सूत्रंचैतत् ॥ श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानांसमवायेपारदौर्बल्यमर्थविप्रक
र्षादिति ॥ इयमेवचनश्रुतिसंनिध्योर्विरोधमुद्दिश्योत्तरमीमांसायांगुणोपसंहारेविचारितं ॥ तथाहि ॥ तांडि
शाखायांश्रूयते ॥ ॐमित्येतदक्षरमुद्गीथमुपासीतेति । अस्यायमर्थः । पंचभक्तियुक्तस्यसाम्नउद्गीथाख्या
भक्तिः कश्चिदवयवः तंचावयवमुद्गाता यागकालेगायति ॥ गीयमानंतमुद्गीथंसएवोद्गातातांडिशाखा
गतोपनिषद्विहितैरनेकैर्गुणैरुपासीतेति तेचगुणास्तांडिशाखायामेवविहिताः ॥ उद्गीथभक्तिस्तुतांडि
शार्दूलजैमिनीयतलवकारादिषुसर्वासुसामशाखासुपठिता ॥ तत्रयदिदंतांडिशाखोक्तगुणामुपासनं
तत्किंतांडिशाखागतएवोद्गीथविशेषेव्यवतिष्ठते किंवासर्वशाखागतउद्गीथसामान्येसंचरतीतिसंशयः
॥ तत्रसन्निधिवशादुद्गीथविशेषेवतिष्ठतइतिपूर्वःपक्षः ॥ उद्गीथशब्दोमुख्ययावृत्त्योद्गीथसामान्यंब्रूते ।
नचसन्निधिनापंचमप्रमाणेनप्रथमप्रमाणस्यश्रुतेःसंकोचोयुक्तः ॥ तस्मादुपासनमुद्गीथसामान्येचरतीति
सिद्धांतः ॥ अनेनन्यायेनप्रकृतेपिसाहचर्याख्येनसन्निधिनाहूतीत्यादिश्रुतेःसंकोचायोगाद्युग्मादिशा

स्त्रंपक्षद्वयविषयंद्रष्टव्यं॥यदिचतुर्द्दशीपूर्णिमयोः कृष्णपक्षविषयत्वंनसंभाव्यतेतर्हितत्रैकत्रशुक्लपक्षवि
षयत्वमस्तु॥तथाप्रतिपद्युग्ममपिगत्यंतराभावात्पक्षद्वयसंधिविषयंएवंव्यवस्थितौसत्यांयुग्मशास्त्रे
णपक्षद्वयेपिचतुर्थीपरविद्धैवप्राप्नोति। ननुवचनांतरेणचतुर्थीद्वयस्यव्यवस्थाप्रतीयते॥तथाचमार्कंडे
यपुराणे॥शुक्लपक्षेतिथिर्ग्राह्यायस्यामभ्युदितोरविः॥कृष्णपक्षेतिथिर्ग्राह्यायस्यामस्तमितोरविरिति।अ
त्रचवक्तव्यंकिमिदंशुक्लादिवाक्यंयुग्मादिशास्त्रनियमनद्वाराएकवाक्यतयातिथीनांव्यवस्थापकंउतस्वा
तंत्र्येण॥यदिनियमनद्वारातर्हियुग्माग्नीत्यादियुग्मेपूर्वतिथीनामुत्तरविद्धानांपूज्यत्वेनशुक्लपक्षेतिथि
र्ग्राह्यायस्यामभ्युदितोरविरित्येतत्पूर्वार्द्धमविरोधिउत्तरार्द्धंतुविरोधि॥तथातेष्वेवयुग्मेषुचरमतिथीनांपू
र्वविद्धानांपूज्यत्वेनकृष्णपक्षेतिथिर्ग्राह्यायस्यामस्तमितोरविरित्युत्तरार्द्धमविरोधि। पूर्वार्द्धंतुविरोधि॥त
थादर्शपूर्णप्रतिपद्युग्मेकृष्णपक्षगतस्यदर्शस्योदयेपूज्यत्वंशुक्लपक्षगतायाःप्रतिपदोस्तमयेपूज्यत्वंत
थासतितत्रोभयत्रविरोधःस्फुटतरः॥तस्मान्नयुग्मादिशास्त्रमनेननियंतुंशक्यं॥नापिस्वातंत्र्येणतिथी

नांव्यवस्थापकं॥ तत्रयुग्मादिशास्त्रविरोधस्यापरिहार्यत्वात्॥ अविरोधेनतुशुक्लादिवाक्यस्यदशमीवि
षत्वंप्रतिपत्प्रकरणेप्रसंगादुदाहृतं॥ तस्माच्छुक्लकृष्णयोरपिपक्षयोर्युग्मादिशास्त्राच्चतुर्थीपरविद्धाग्रा
ह्या॥ बृहद्वसिष्ठोपि॥ एकादशीतथाषष्ठी अमावास्याचतुर्थिका॥ उपोष्याः परसंयुक्ताः पराः पूर्वेणसंयुता
इति॥ ननुपरविद्धोपवासः क्वचित्प्रतिषिध्यते॥ द्वितीयापंचमीवेधाद्दशमीचत्रयोदशी॥ चतुर्दशीचोप
वासेहन्युःपूर्वोत्तरेतिथीइति॥ अयमर्थः॥ पंचमीवेधेनपूर्वांचतुर्थींतिथिमुत्तरांचषष्ठींतिथिमुपवासविष
येहंति॥ अतःपंचमीविद्धायांचतुर्थ्यांनोपवासइति॥ नैषदोषः॥ व्रतभेदेनव्यवस्थोपपत्तेः संतिहिचतु
र्थ्यांभिन्नदेवताविषयाणिबहूनिव्रतानि॥ तत्रविष्णुधर्मोत्तरप्रोक्तेचतुर्मूर्तिव्रतेमूर्तिचतुष्टयोपेतोविष्णु
र्देवता॥ स्कंदपुराणोक्तेअंगारकचतुर्थीव्रतेभौमोदेवता कूर्मपुराणोक्तेयमव्रतेयमोदेवता॥ सौरपुराणा
दिप्रोक्तेषुदूर्वागणपत्यादिव्रतेषुविनायकोदेवता कूर्मपुराणएवप्रोक्तेनागचतुर्थीव्रतेशेषशंखपालादयः
सर्पदेवतास्तत्रविनायकनागव्यतिरिक्तानांव्रतेपरेद्युरुपवासः प्राप्नोतितादृशेविषयेपंचमीवेधनिषेधोव्य

व्यस्थापनीयः॥ तथापूर्वविद्धाप्रशंसा च तस्मिन्नेव विषये द्रष्टव्या॥ अतएव ब्रह्मवैवर्ते पूर्वेनिरविद्धयोर्विधि
निषेधोस्मर्यते॥ चतुर्थीसंयुताकार्या तृतीया च चतुर्थिका॥ तृतीयया युतानैव पंचम्याकारयेत्क्वचिदिति॥ त
थातत्रैव पूर्वविद्धाप्रशस्यते॥ चतुर्थीसंयुताया च सा तृतीया फलप्रदा॥ चतुर्थी तु तृतीयायां महापुण्यफ
लप्रदेति॥ तस्याश्च विनायकव्रतविषयत्वं तत्रैव सूचितं॥ कर्त्तव्याव्रतिभिर्वत्स गणनाथसुतोषिणीति॥
स्कंदपुराणेपि॥ विनायकव्रते कार्या सर्वमासेषु षण्मुख। चतुर्थी तु जयायुक्ता गणनाथसुतोषिणीति॥ विना
यकव्रतानुष्ठाने चतुर्थ्यां मध्यान्हव्यापित्वं मुख्यं प्रयोजकं॥ तदाह बृहस्पतिः॥ चतुर्थी गणनाथस्य मातृवि
द्धाप्रशस्यते॥ मध्यान्हव्यापिनी चेत्स्यात्परतश्चेत्परेहनीति॥ यदा पूर्वेद्युर्मध्यान्हव्यापिनी भवति॥ तदा मु
ख्यप्रयोजकस्य विद्यमानतान्मातृविद्धत्वगुणसद्भावाच्च सा ग्राह्या तादृशे विषये परेद्युः। सतामपि मध्यान्हव्या
पिन्यां त्याज्या॥ अतएव प्रशस्यत इत्युक्तं॥ परेद्युरेव यदा मध्यान्हव्यापिनी तदा मातृविद्धत्वगुणभावेपि
प्रधानप्रयोजकानुसारेण परविद्धैव ग्राह्या॥ तथा च स्मृत्यंतरं॥ मातृविद्धा प्रशस्ता स्याच्चतुर्थी गणनायके

CC-0. In Public Domain. Digitization by eGangotri

मध्यान्हे परतश्चेत्स्यान्नागविद्धा प्रशस्यत इति ॥ ननु बहुषु वचनेषु पूर्वविद्धाया गणनाथसंतोषत्वमु-
क्तं। अतः पूर्वविद्धत्वस्यैव मुख्यप्रयोजकतायुक्ता॥ मैवं॥ मध्यान्हव्यापित्वस्यैव वैयर्थ्यप्रसंगात्॥ अनव-
श्यं हि नदा मध्यान्हव्यापित्वं प्रसंगाद्भवति॥ अतस्तद्विधानं व्यर्थं व्यावर्त्याभावात्॥ अथोच्येत पक्षांतरेप्य-
नेकवचनविहितस्य पूर्वविद्धत्वस्य वैयर्थ्यं तदवस्थं॥ मध्यान्हव्यापित्वेनैव तन्निर्णयादिति तन्न॥ यद्वा
तिथिक्षयवशादुभयत्र मध्यान्हव्याप्तिर्नास्ति॥ यदा चोभयत्र कृत्स्नमध्यान्हव्यापित्वं तदेकदेशव्यापि-
त्वं वा समानं तत्र सर्वत्र मध्यान्हव्याप्त्यानिर्णयाभावे सति पूर्वविद्धत्वेनैव निर्णेतव्यत्वात्॥ एवं तर्हि साव-
काशनिरवकाशयोर्निरवकाशं बलीय इति न्यायेन मध्यान्हव्यापित्वस्य निरवकाशतया प्राबल्यमित्येव व-
क्तव्यं न तु मुख्यतयेति चेत्॥ मुख्यत्वस्यापि संभवात्॥ तिथिनिर्णये कर्मकालव्याप्तिशास्त्रस्य मुख्यत्व-
मस्य प्रकरणस्य प्रारंभे दर्शितं॥ कर्मकालश्च विनायकव्रतस्य मध्यान्हः॥ प्रातः शुक्लतिलैः स्नात्वा मध्यान्हे
पूजयेन्नृपेति तत्कल्पे विधानात्॥ अतो मुख्यत्वादपि मध्यान्हव्यापित्वं प्रबलमिति॥ ननु कस्यांचित्स्मृतौ

CC-0. In Public Domain. Digitization by eGangotri

पूर्वविद्धत्वेनमध्यान्हव्यापित्वबाधउपलभ्यते॥ जयाचयदिसंपूर्णाचतुर्थीह्रसते यदि॥जयासैव हि
कर्त्तव्यानागविद्धांनकारयेदितिस्मरणात्॥ मैवं॥ अस्यवचनस्यदिनद्वयेमध्यान्हस्पर्शाभावविषयत्वे
नाप्युपपत्तेः॥ तथाहि॥ पूर्वदिने विनायकप्रयोजकेमध्यान्हेजयासंपूर्णा॥ परेद्युर्मुहूर्त्तत्रयक्षयवशा
न्मध्यान्हादर्वागेवचतुर्थीसमाप्तातदादिनद्वयेकर्मकालेयाप्तितिथेश्चतुर्थ्या अभावाद्विनायकव्रते किं
दिनमुपादेयमितिवीक्षायांपूर्वदिनंविधायपरदिनंप्रतिषेधति॥ अथोच्यते॥जयाचयदिसंपूर्णेत्यनेनक
र्मकालरूपमध्यान्हसमाप्तिपर्यंतत्वंनविवक्षितं॥किंतर्ह्यस्तमयपर्यंतत्वमिति॥ एवंतर्हिपूर्वविद्धेवना
स्तिवेधिकायाः पूर्वतिथेःसंपूर्णत्वेसति वेध्यायाश्चतुर्थ्याअनवकाशत्वात्॥ अस्तमाभूत्पूर्वविद्धत्वं तथापि
मध्यान्हव्यापिन्यां जयायांविहितायांपरेद्युर्मध्यान्हव्यापित्वंबाध्यतइतिचेत्॥ मैवं॥ नखलूत्तरदिनहेय
त्वेमध्यान्हव्यापित्वंकारणतयोपन्यस्यते। किंतुनागविद्धत्वं। अतोनागविद्धत्वनिंदायांवचनस्यतात्पर्यं
नचतुर्थीरहितजयाविधाने॥ अन्यथाचतुर्थीनिंदायामपितात्पर्यंप्रसज्येत॥नचतदुक्तं॥ नहिवरघा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तायकन्यासुद्वाहयेति॥ वचनच्छायातुकैश्रुतिकन्यायेपरालक्ष्यते यदिशब्दप्रयोगात्॥ यद्यपिजयासंपू
र्णातथापिनागविद्धाहेया॥ किमुतजयायुक्तायांचतुर्थ्यासंभवत्यामितिहिवचनव्यक्तिः॥ मध्यान्हव्या
प्ताविघ्नतीभक्तिः कुतस्तवेति चेत्॥ चतुर्थीरहितायांशुद्धतृतीयायांतवापिकुतोभक्तिरितिसमानः प
र्यनुयोगः॥ वचनबलादित्युत्तरमस्माकमपि वचनयोः परस्परकलहेपूर्वोक्ताभ्यांमुख्यत्वनिरवकाशत्वा
भ्यांमध्यान्हवचनमेवातिप्रबलंसिद्धिविनायकव्रतेतस्यप्रतिपदोक्तत्वादपिप्रबलत्वं॥ जयावचनंतुगौ
र्यादिव्रतेचरितार्थं। तच्चव्रतंभविष्यत्पुराणेभिहितं॥ विनायकंसमभ्यर्च्यचतुर्थ्यांयदुनंदन॥ सर्वविघ्न
विनिर्मुक्तः कार्यसिद्धिमवाप्नुयात् इत्यभिधायानंत-रमिदंपठ्यते॥ निद्रांरतिंशिवांभद्रांकीर्त्तिंमेधां
सरस्वतीं॥ प्रज्ञांतुष्टिंतथाकांतिंतच्चैवाहनिपूजयेत्॥ विद्याकामोविशेषेणपूजयेच्चसरस्वतीमिति॥
लिंगपुराणेपि॥ चतुर्थ्यांतुगणेशस्यगौर्याश्चैवविधानतः॥ पूजांकृत्वालभेत्सिद्धिंसौभाग्यंचनरःक्रमा
दिति॥ नारदीयपुराणेपि॥ माघशुक्लचतुर्थ्यांतुगौरीमाराधयेद्बुधः॥ चतुर्थीवरदानामगौरीतत्रसुपूजि

CC-0. In Public Domain. Digitization by eGangotri

त्तेति॥अतो यथोक्तरीत्या विनायकव्रते मध्यान्हव्यापित्वेनैव निर्णयः गौरीव्रते तु जयावचनं द्रष्टव्यं॥ त
त्र यदा दिनद्वयेप्येतद्द्वैषम्येमध्यान्हैकदेशव्यापिनी तदा पूर्वदिने तन्महत्त्वं चेति तदेवोपादेयं॥ उत्तरदिने
तन्महत्त्वे किं महत्त्वगुणेन तदुपादेयं किं वा मातृविद्धत्वगुणेन पूर्वमुपादेयमिति संशये पूर्वमिति ब्रूमः॥
परस्य नागविद्धत्वदोषोपेतत्वात्॥ पूर्वस्य च तदभावत्वात्॥ एतदेवाभिप्रेत्य स्कंदपुराणे पठ्यते॥ ज्ये
ष्ठा च वट्सा विज्ञीत यानं गत्रयोदशी॥ विनायकचतुर्थी च कर्त्तव्या संमुखी तिथिरिति॥ विनायकव्रतवन्ना
गव्रतेपि चतुर्थी मध्यान्हव्यापिनी ग्राह्या॥ नागव्रतं च कूर्मपुराणे दर्शितं॥ तिथौ सुगाव्हयायां च समुपोष्य य
थाविधि॥ शंखपालादिनागानां शेषस्य च महात्मनः॥ पूजा कार्या पुष्पगंधक्षीराप्यायनपूर्वकं॥ विषाणि
तस्य नश्यंति न च तान्घ्नंति पन्नगा इति॥ सुगाव्हया चतुर्थी॥ मध्यान्हव्यापित्वं च देवलेनोक्तं॥ सुगमध्यं दि
नेयत्र तत्रोपोष्य फणीश्वरान्॥ क्षीरेणाप्याय्य पंचम्यां पूजयेत्प्रयतो नरः॥ विषाणि तस्य नश्यंति न तान् हिं
संति पन्नगा इति विनायकचतुर्थी नागचतुर्थ्योरियान्विशेषः॥ एकभक्तन्यायेन मध्यान्हव्याप्तेः षोढा भेदे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सति यदा परेद्युरेव मध्यान्हव्याप्तिस्तदा विनायकचतुर्थी परा॥ इतरेषु तु पंचसु भेदेषु जयायोगस्य प्रशस्त
त्वात्॥ पूर्वेद्युरेव सा भवति॥ यदा तु पूर्वेद्युरेव मध्यान्हव्यापिनी तदा नागचतुर्थी पूर्वा॥ इतरेषु तु पंचसु भेदे
षु पंचमीयोगस्य प्रशस्तत्वात्॥ उत्तरा भवति॥ तस्माः शास्त्यं च पूजयेदिति वचनादवसीयते॥ ॥ इति चतु
र्थीनिर्णयः॥ ॥ अथ पंचमी निर्णीयते॥ ॥ युग्मशास्त्रेण पंचमी पूर्वविद्धा ग्राह्या॥ ननु प्रायः प्रातउपो
ष्याह्नि तिथिर्दैवफलेप्सुभिरिति शिवरहस्यसौरपुराणयोरस्ति ष्ययग्रभागस्यापवा सांगत्वाभिधानात्॥ पंच
म्युपवासः परेद्युः प्राप्नोति॥ तन्न॥ हारीतेन परविद्धायाः प्रतिषिद्धत्वात्॥ चतुर्थीसंयुता कार्या पंचमी पर
या न तु॥ दैवे कर्मणि पित्र्ये च शुक्लपक्षे तथासित इति॥ न्वैताषता प्रायः प्रात इति वचनस्य निर्विषयत्वं शं
कनीयं॥ निर्णीतासु निर्णेष्यमाणासु च तिथिषु यत्र यत्र परविद्धोपवासः शास्त्रांतरेण प्राप्तस्तस्य सर्वस्य त
द्विषयोपपत्तेः॥ न चैतेनैव शास्त्रेण तदुपवाससिद्धेः कृतमनेन वचनेनेति शंकनीयं॥ सामान्यविशेषरूपे
ण शास्त्रद्वयस्याभिचरितार्थत्वात्॥ तस्य सामान्यशास्त्ररूपस्य प्रातोपवासवचनस्य विरोधिनी पश्ची

CC-0. In Public Domain. Digitization by eGangotri

का·मा क्त — पंचमीनिषेधके नविशेषशास्त्ररूपेणहारीतवचनेनबाधोयुज्यते॥ एतादृशंबाधमभिलस्यैवप्रायः
८४ प्रांतउपोष्येतिप्रायः शब्दप्रयुक्तः॥प्रतिपन्न्यायेनपौर्वाण्हिकाद्वृत्तिवचनबलात्॥पंचम्यामपिदानव्रत
योः परदिनानुष्ठानप्राप्तौतद्व्यावृत्तयेहारीतवचनेदैवेकर्मणीत्युच्यते॥ नचदैवकर्मणिपूर्वाण्हस्यकर्म
कालशास्त्रप्राबल्यस्यचवर्णितत्वात्॥तद्बाधोनयुक्तइतिशंकनीयं। विधेर्निषेधस्याप्रतिपदोक्तस्यप्र
बलतरत्वात्॥नचपूर्वदिनपूर्वाण्हस्यात्यंतकर्मकालत्वंसाकल्यवचनापादितकर्मकालत्वस्यसद्भावात्
॥ईदृशमेवविषयमभिलस्यसाकल्यवचनस्यप्रवृत्तत्वात्॥स्वाभाविकतिथिव्याप्तियुक्तेविषयेसाकल्यवच
नस्यनिरर्थकत्वात्॥तस्माद्दैवकर्मणिपरविद्धायाःपंचम्याःनिषेधोनविरुध्यते॥नन्वेवमपिपित्र्येनिषेधो
निरर्थकः॥पित्र्यस्यस्वतएवपरविद्धायामप्राप्तत्वात्॥मैवं॥दृष्टांततयापित्र्यतदुपन्यासोपपत्तेः॥यथापि
त्र्यकर्मणिउत्तरविद्धानग्राह्यातथादैवेपीतिविवक्षयादैवपित्र्ययोःसहोपन्यासः॥ननुव्यासनिगमगतयु राम·
ग्मशास्त्रमुदात्दृत्यभवतापंचम्याःपूर्वविद्धत्वमभिधीयते॥आपस्तंबादयस्तुनहिपर्ययेणयुग्मान्यु ८४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दाजहुः॥प्रतिपत्सद्वितीयास्याद्वितीयाप्रतिपद्युता। चतुर्थीसहितायाचसातृतीयाफलप्रदा॥पंचमीचप्रक
र्त्तव्याषष्ठ्यायुक्ताचनारदेति॥अतएवैतद्युग्मशास्त्रपर्यालोचनेपंचम्याःपरविद्धत्वंप्राप्नोति॥बाढं।अत
एवात्रशुक्लकृष्णशास्त्रेणव्यवस्थाप्रसक्तातांनिषेद्धुंहारीतेनशुक्लपक्षेतथासितइत्युक्तं॥नचसाव्यव
स्थावचनेननिषेद्धुमशक्याकिंहिवचनंनकुर्यान्नास्तिवचनस्यातिभारइतिन्यायात्॥तस्माद्धारीतवच
नेनपंचमीपूर्वविद्धाग्राह्या॥स्कंदपुराणेपि॥पंचमीचतथाकार्याचतुर्थ्यासंयुताविभो॥तथापद्मपुरा
णभविष्यत्पुराणयोः॥युग्मेत्तरविद्धाविषयौविधिनिषेधौस्मर्येते॥पंचमीतुचतुर्थ्यांतुकार्याषष्ठ्यानः
संयुतेति॥यत्तुब्रह्मवैवर्त्तेभिहितं॥पंचमीतुप्रकर्त्तव्याषष्ठ्यायुक्तातुनारदेतितद्वचनंस्कंदोपवासविष
यतयासंकोचनीयं॥वाक्यशेषेतथाभिधानात्॥स्कंदोपवासेस्वीकार्यापंचमीपरसंयुतेतिवाक्यशेषः॥
नचासंजातविरोधिनोवाक्योपक्रमस्यसंजातविरोधिनावाक्यशेषेणकथंसंकोचइतिशंकनीयं॥असंदि
ग्धोपक्रमस्यप्राबल्येपिसंदिग्धोपक्रमस्यवाक्यशेषेणनिर्णेतव्यत्वात्॥अतएवजैमिनिनापिसूत्रितं॥

CC-0. In Public Domain. Digitization by eGangotri

संदिग्धेतुवाक्यस्यशेषादिति॥अतःस्कंदोपवासे पंचमीपरविद्धा।अन्यत्रपूर्वविद्धेतिस्थितं॥ इतिपंचमीनिर्णयः॥ अथष
ष्ठीनिर्णीयते॥ साचयुग्मशास्त्रद्वयेनद्विविधाप्रतिभाति॥नत्रषण्मुन्योरित्येकंयुग्मशास्त्रंतेनषष्ठ्याः सप्तमीविद्धत्वंप्रती
यते।पंचमीचप्रकर्त्तव्याषष्ठ्यायुक्ताचनारदेत्यपरंयुग्मशास्त्रं।तेनषष्ठ्याःपंचमीविद्धत्वंप्रतीयते। तयोःशास्त्रयोःकिंशु
क्लकृष्णभेदेनव्यवस्थाकार्या किंवादैवपित्र्यभेदेनउतस्कंदव्रतान्यव्रतभेदेन।तत्रनतावत्प्रथमःकल्पः।सुमंतुनापक्षद्वय
व्यवस्थांनिराकृत्यदैवपित्र्यभेदेनव्यवस्थापितत्वात्।तथाचतद्वचनं।नागविद्धानषष्ठीस्यात्पक्षयोरुभयोरपि।दैवेकर्म
णि तामेस्यांपित्र्येपूर्वेणसंयुतामिति।नापिद्वितीयः।दैवेपित्र्यभेदेनव्यवस्थाया अयुक्तत्वात्।तथाहि। यदेतत्सुमंतुनादै
वेकर्मणिशुक्लपक्षद्वयगतायाःषष्ठ्यानागविद्धत्वंप्रतिषिध्यते तन्नयास्तु।यन्नागविद्धायाः पित्र्येव्यवस्थापनं तत्रवक्त
व्यंकिंपूर्वविद्धत्वमेकोद्दिष्टविषयंकिंवापार्वणविषयं।नोभयमप्युपपद्यते।मध्यान्हापराण्हव्याप्तिभ्यामेवद्वयोर्निर्णयेसतिपूर्व
विद्धतायाअकिंचित्करत्वात्॥ नचैवंमंतव्यं परेद्युःसत्यामपिमध्यान्हापराण्हव्याप्तौतत्परित्यागायपूर्वविद्धत्वविधान
मिति॥मुख्यकर्मकालव्याप्तेःपरित्यागायोगात्।अन्यथामूषकभियास्वकर्मगृहंदहतीति न्यायआपतेत्॥ ॥

तर्हिसुमंतुवचनस्य का गतिरिति चेत्॥ उच्यते॥ न खल्वेतद्वचनं पित्र्ये पूर्वविद्धां विधातुं प्रवृत्तं॥ किं तर्हि
दैवतां निवारयितुं तत्प्रवृत्तिः॥ तत्रार्थवादत्वेन पित्र्ये साम्यनुज्ञायते॥ तत्रायं वचनव्यक्तिः यदि नाम क
थंचित्पूर्वविद्धा भवेत्॥ भवतु नाम सा पित्र्ये तिथिमूलस्य प्रायेण पितृतुष्टिहेतुत्वात्॥ दैवे सर्वथा पूर्ववि
द्धा न ग्राह्येति॥ तस्मात्तृतीयः पक्षः परिशिष्यते॥ स्कंदव्रते पूर्वविद्धा व्रतांतरेषूत्तरविद्धेति तत्र स्कंदष
ष्ठ्याः पूर्वविद्धत्वमाह वसिष्ठः॥ कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिश्चतुर्दशी॥ एताः पूर्वयुताः कार्यास्ति
थ्यंते पारणं भवेदिति॥ स्कंदषष्ठी लिंगपुराणे दर्शिता॥ प्रत्यब्दमपि षष्ठ्यां च षष्ठी कार्या गुहस्य च॥ दीप्ताग्निः सं
मुखी चास्य तस्मिन्नागामिवत्सर इति। तत्रैव रविषष्ठी दर्शिता। षष्ठ्यामुपोष्य विधिवत्सप्तम्यामर्कमर्चयेत्॥ सद्रव्यभागरु
कृच्चैव संप्राप्नोतीप्सितं फलमिति। फलषष्ठी मंदारषष्ठीत्यादिव्रतानि षष्ठ्या भविष्योत्तरे प्रोक्तानि। तत्र तत्र रव्यादिव्रतेषु परविद्धा
ग्राह्या। तदुक्तं विष्णुधर्मोत्तरे। एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी॥ अमावास्या तृतीया च ता उपोष्याः परान्विता इति॥
यद्यप्यत्र व्रतविशेषो नोपात्तस्तथापि स्कन्दव्रतस्य पूर्वविद्धायां विहितायां परिशेषादन्येषामुत्तरविद्धा भवति॥

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

का॰मा॰ तेषामप्यविरोधात्॥ पूर्वविद्धास्त्विति चेत् नप्रतिषेधात्॥ तथाच निगमः॥ नागविद्धा तु या षष्ठी रुद्र
८६ विद्धो दिवाकरः॥ कामविद्धो भवे द्विष्णुर्न ग्राह्यास्ते तु वासराः॥ नागः पंचमी॥ रुद्रः षष्ठी॥ दिवाकरः सप्त
मी॥ कामस्त्रयोदशी॥ विष्णुर्द्वादशी॥ शिवरहस्यसौरपुराणयोः॥ नागविद्धा तु या षष्ठी शिवविद्धा तु सप्त
मी॥ दशम्येकादशी विद्धा नोपोष्या तु कथंचनेति॥ तथा पूर्वविद्धाप्रतिषेधः॥ उत्तरविद्धाविधिश्चेत्युभयं सहै
वस्कंदपुराणे पठ्यते॥ नागविद्धा तु कर्त्तव्या षष्ठी च न कदाचन॥ सप्तमीसंयुता कार्या षष्ठी धर्मार्थचिंतकैरिति
॥ ब्रह्मवैवर्त्तेपि॥ नहि षष्ठी नागविद्धा कर्त्तव्या तु कदाचन॥ नागविद्धा तु या षष्ठी कृता पुण्यक्षया भवेत्॥
सप्तम्या सह कर्त्तव्या महापुण्यफलप्रदेति॥ पुण्यस्य क्षयो यस्यां सा पुण्यक्षया॥ यदि कदाचित्तिथिक्षयव
शादुत्तरविद्धा षष्ठी न लभ्यते॥ तदा स्कंदव्रतवदन्यान्यपि व्रतानि नागविद्धायां कर्त्तव्यानि॥ तदाह वसिष्ठः॥
एकादशी तृतीया च षष्ठी चैव त्रयोदशी॥ पूर्वविद्धा तु कर्त्तव्या यदि न स्यात्परेहनीति॥ नागवेधश्च षण्मुहूर्त्ता राम
त्मकः॥ तथाच स्कांदे॥ नागो द्वादशनाडीभिर्दिक् पंचदशभिस्तथा॥ भूतोष्टादशनाडीभिर्दूषयत्युत्तरांति ८६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थ्यमिति॥ इति षष्ठीनिर्णयः॥ अथ सप्तमी निर्णीयते॥ इह हि सप्तम्यां नानादेवताकानि बहूनि व्रतानि। तत्र भविष्योत्त
रप्रोक्तमुमामहेश्वरदेवताकं मुक्ताभरणसप्तमीव्रतं। तथा भविष्यत्पुराणे सूर्यदेवताकं विजयसप्तमीकं व्रतमुक्तं। सूर्य
देवताकमारोग्यसप्तमीव्रतं वराहपुराणेऽभिहितं। विष्णुदेवताकं मांगल्यव्रतं गारुडपुराणेऽभिहितं। एवमन्यान्यप्युदाहर
णीयानि। तत्र काश्चित्तिथयो देवताभेदेन व्यातिष्ठमाना लक्ष्यंते। तद्यथा॥ स्कंदषष्ठी पूर्वविद्धा मंदारादिषष्ठी परविद्धा॥ काश्चि
त्तस्यामेकस्यां देवतायां व्रतभेदेन व्यवतिष्ठंते। तद्यथा। तत्र गौरीव्रतेष्वेव रंभातृतीया पूर्वविद्धा लवणतृतीया परविद्धा काश्चिद्दे
कदेवताका एकस्मिन्व्रते कर्मकालव्याप्तिभेदेन व्यवतिष्ठंते। तद्यथा। विनायकव्रते पूर्वेद्युः परेद्युर्वा चतुर्थी मध्यान्हव्यापिनी गृ
ह्यते॥ काश्चिच्छुक्लकृष्णभेदेन व्यवतिष्ठंते। तद्यथा। शुक्लप्रतिपत्पूर्वविद्धा। कृष्णप्रतिपदुत्तरविद्धेति तत्र केन न्यायेन सप्तमी
व्यवस्थापनीयेति वीक्षायां न केनापीति प्रतिजानीमहे॥ सप्तम्याः पूर्वविद्धानिंदकस्योत्तरविद्धाविधायकस्य वच
नस्य च कस्यचिददर्शनात्॥ तद्विपर्ययेण पूर्वविद्धाविधायकस्योत्तरविद्धानिषेधकस्य सर्वत्रोपलंभात्॥ सर्वासु देवता
सु सर्वेषु व्रतेषु शुक्लकृष्णपक्षयोरपि सप्तमी पूर्वविद्धैव ग्राह्या युग्मादिशास्त्रे षण्मुन्योरित्यभिधानात्॥ स्कंदपु

CC-0. In Public Domain. Digitization by eGangotri

राणे ॥ कर्त्तव्या सप्तमी तत्र षष्ठी यत्र च सर्वदा ॥ षष्ठी तु सप्तमी यत्र तत्र सन्निहितो रविरिति भविष्यत्पुराणब्र
ह्मपुराणयोः ॥ षष्ठी च सप्तमी तात अन्योन्यं तु समाश्रिते ॥ पूर्वविद्धा द्विजश्रेष्ठ कर्त्तव्या सप्तमी तिथिरिति ॥
पैठीनसिः ॥ पंचमी सप्तमी चैव दशमी च त्रयोदशी ॥ प्रतिपन्नवमी चैव कर्त्तव्या संमुखी तिथिरिति ॥ उत्तरवि-
द्धाप्रतिषेधः स्कंदपुराणे दर्शितः ॥ षष्ठ्येकादश्यमावास्या पूर्वविद्धा तथाष्टमी ॥ सप्तमी परविद्धा च नोपोष्यं ति-
थिपंचकमिति ॥ न च व्रतविशेषेणाप्युत्तरविद्धायामाशा कर्त्तव्या ॥ तदुक्तं ब्रह्मवैवर्त्ते । सप्तमी नाष्टमीयुक्ता न स-
प्तम्यायुताष्टमी ॥ सर्वेषु व्रतकल्पेषु अष्टमी परतः शुभेति ॥ यदा पूर्वेद्युरस्तमयपर्यंता षष्ठी परेद्युस्तिथिक्षयेण
स्तमयादर्वागष्टमी त्रिमुहूर्त्ता तदा पूर्वविद्धाया अलाभादुत्तरविद्धायाश्च प्रतिषिद्धत्वात्कुत्रानुष्ठानमिति चेत् ॥
निषेधमुल्लंघ्याप्युत्तरविद्धायामिति ब्रूमः ॥ यद्यप्यस्मिन्नर्थे वचनं नोपलभ्यते ॥ तथापि शेषिलोपन्यायत्वादुत्तर
विद्धा गौणकालत्वेन स्वीकर्त्तव्या ॥ अस्ति चात्र दृष्टांतः ॥ स्कंदव्यतिरिक्तव्रतेषु पूर्वविद्धायाः षष्ठ्या निषेध राम
मुल्लंघ्य यदि न स्यात्परेहनीति वाक्येन पूर्वविद्धा गृहीता ॥ तथा रंभाव्यतिरिक्तगौरीव्रतेषु द्वितीयायुतास्वी- ८७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्त्तव्यातैवेवन्यायेनात्राप्यष्टमीविद्धायाः स्वीकारोस्तु॥ ॥ इतिसप्तमीनिर्णयः॥ ॥अथाष्टमीनिर्णीयते॥ ॥
द्विविधोहितत्रनिर्णयः॥ ॥ व्रतसामान्यनिर्णयोव्रतविशेषविषयश्चेति॥व्रतसामान्येतुशुक्लकृष्णपक्षभे
दाद्यवतिष्ठते॥तत्रशुक्लाष्टमीपराग्राह्या॥षण्मुन्योर्वसुरंध्रयोरितियुग्मशास्त्रात्॥ यद्यप्येतच्छास्त्रंप
क्षद्वयसाधारणमितिचतुर्थीप्रस्तावेप्रतिष्ठितं॥ तथापिशास्त्रांतरबलात्शुक्लपक्षेपर्यवस्यति॥तथाचनि
गमः॥शुक्लपक्षेष्टमीचैवशुक्लपक्षेचतुर्दशी॥पूर्वविद्धानकर्तव्याकर्त्तव्यापरसंयुता॥उपवासादिकार्ये
षुएषधर्मःसनातनइति॥ब्रह्मवैवर्त्ते॥सप्तमीनाष्टमीयुक्तानसप्तम्यायुताष्टमी॥ सर्वेषुव्रतकल्पेषुअ
ष्टमीपरतःशुभेति॥पद्मपुराणे॥नाष्टमीसप्तमीयुक्तासप्तमीनाष्टमीयुता॥नवम्यासहकार्यास्यादष्टमी
नात्रसंशयइति॥ स्कंदपुराणेपि॥अष्टमीनवमीमिश्रा कर्त्तव्याभूतिमिच्छता॥सप्तम्याचाष्टमीचैवनक
र्त्तव्याशिखिध्वजेति॥तान्येतानिब्रह्मवैवर्तादिवचनानियद्यपिपक्षद्वयसाधारण्येनपूर्वविद्धानिषेधमुत्त
रविद्धाविधिंचकुर्वंति॥तथाप्युदाहृतनिगमानुसारेणशुक्लपक्षविषयतयायोजनीयानि॥तथाचशुक्लपक्षाभिप्रा

का·मा· येणेचपूर्वविद्धांप्रतिषेधतिजाबालिः॥ नागविद्धातुयाषष्ठीभानुविद्धोमहेश्वरः॥ चतुर्दशीकामविद्धातिस्र
८९ स्तामलिनाःस्मृताइति॥ स्कंदपुराणेपि॥ नागविद्धातुयाषष्ठीसप्तम्यातुयदाष्टमी॥ भूतविद्धाप्यमावास्या
नग्राह्यामुनिपुंगवेति॥ तथाचशुक्लपक्षमेवाभिप्रेत्योत्तरविद्धाविधीयते॥ विष्णुधर्मोत्तरे॥ एकादश्यष्टमीष
ष्ठीद्वितीयाचचतुर्दशी॥ अमावास्यातृतीयाचताउपोष्याःपरान्विताइति॥ शंकरगीतायांसाक्षाद्देवशुक्ल
पक्षेपरविद्धाविहिता॥ एकादश्यष्टमीषष्ठीशुक्लपक्षेचतुर्दशी॥ पूज्याःपरेणसंयुक्ताःपराःपूर्वेणसंयुताइति
॥ कृष्णपक्षेपूर्वविद्धाविधिरुत्तरविद्धाप्रतिषेधश्चनिगमेपठ्यते॥ कृष्णपक्षेष्टमीयत्रकृष्णपक्षेचतुर्दशी॥ पू
र्वविद्धातुकर्त्तव्यापरविद्धानकर्हिचित्॥ उपवासादिकार्येषुह्येषधर्मःसनातनइति॥ नारदीये॥ कृष्णाष्ट
मीतथारंभातृतीयावटपैतृकी॥ वृहत्तपातथाब्रह्मन्कर्त्तव्यासंमुखीतिथिरिति॥ अत्राष्टम्याःशुक्लकृष्ण
व्यवस्थासामान्येनसर्वव्रतविषया। व्रतविशेषस्यानुपादानात्॥ व्रतानिचोदाह्रियंते॥ तत्रवामनपुराणे॥ राम
नभोमासेकृष्णाष्टम्यांकालाष्टमीव्रतंपठितं॥ विष्णुधर्मोत्तरेकृष्णपक्षेसंतानाष्टमीव्रतं॥ एतदुभयंयथो ८८

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्करीत्यापूर्वविद्धायामनुष्ठेयं॥ देवीपुराणे श्रावणमासेशुक्लाष्टम्यांदेवीव्रतं॥ गारुडपुराणे शुक्लाष्टम्यांनृसिं
हव्रतंएतदुभयमुत्तरविद्धायामनुष्ठेयं॥एवमन्यान्यप्युदाहरणीयानि॥ व्रतविशेषादष्टमीनिर्णयोद्विविधः॥
व्रतविशेषमात्रोपजीवनेनप्रवृत्तएकनक्षत्रादियोगंव्रतविशेषंचोपजीव्यप्रवृत्तोपरः॥तत्रदूर्वाष्टमीसंज्ञितः
कश्चिद्व्रतविशेषोभविष्यत्पुराणेपठ्यते॥ब्रह्मन्भाद्रपदेमासिशुक्लाष्टम्यामुपोषितः॥महेशंपूजयेद्यस्तुदूर्व
यासहितंमुनेइति॥अस्मिन्व्रतविशेषेशुक्लपक्षवर्तित्वेनोत्तरविद्धायांप्राप्तायामपवादमाहनारदः॥ धन्याकृ
ष्णाष्टमीदूर्वासावित्रीवटपैतृकी॥अनंगत्रयोदशीरंभाकर्त्तव्यासंमुखीतिथिरिति॥ पद्मपुराणे॥ श्रावणीदु
र्गनवमीतथोदूर्वाष्टमीचया॥पूर्वविद्धैवकर्त्तव्याशिवरात्रिर्बलेर्दिनमिति॥तथाशिवशक्तिमहोत्सवोनामक
श्चिद्व्रतविशेषः॥तस्यपूर्वन्यायेनशुक्लकृष्णपक्षव्यवस्थायांप्राप्तायांतदपवादः॥पद्मपुराणेपठ्यते॥अष्ट
मीनवमीविद्धानवम्याचाष्टमीयुता॥अर्द्धनारीश्वरप्रायाउमामाहेश्वरीतिथिः।अष्टमीनवमीयुग्मेमहोत्सा
हेमहोत्सवः॥शिवशक्त्योःशिवपक्षेत्रेपक्षयोरुभयोरपीति॥ महानुत्साहोयस्मिन्नितिबहुव्रीहिः॥ तत्संति

CC-0. In Public Domain. Digitization by eGangotri

थियुग्मस्य क्षेत्रस्य वा विशेषणं॥ यदा युग्मस्य विशेषणं तदा तादृशं युग्ममुपलभ्य सूर्यग्रहणादौ इत्यादाविव
मनस्युत्साहं प्राप्य देवतोत्सवः कर्त्तव्य इत्युक्तं भवति॥ यदा तु क्षेत्रविशेषणं तदा काशी श्री गिर्यादौ यस्मिन्क्षे·
त्रे मनस्युत्साहो जायते तत्रोत्सवः कर्त्तव्य इत्युक्तं भवति॥ नक्षत्रादियोगि व्रतविशेषोपजीवी निर्णय उदाह्रियते
॥स्कंदपुराणे व्रतविशेषः पठ्यते॥ मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुते॥ यस्मिन्कस्मिन्दिने कुर्याज्ज्येष्ठायाः
परिपूजनमिति॥ तस्य ज्येष्ठाव्रतस्य नक्षत्रयोगवशेनाष्टमी गृहीतव्या॥ नाष्टमी सप्तमीविद्धा सप्तमी चाष्टमी
युता॥ नवम्या सह कार्या स्यादष्टमी नात्र संशयः॥ मासि भाद्रपदे शुक्लपक्षे ज्येष्ठर्क्षसंयुता॥ रात्रिर्यस्मिन्दिने
कुर्याज्ज्येष्ठायाः परिपूजनमिति॥ अयमर्थः। अष्टम्यां नक्षत्रयोगाभावे शुक्लपक्षवर्त्तित्वात्सैवाष्टमी ग्राह्या॥ य
दा तु पूर्वदिने रात्रौ नक्षत्रयोगोस्ति तदा पूर्वविद्धा ग्राह्या॥ सोयं शुक्लपक्षप्रयुक्तस्य सामान्यशास्त्रस्य नक्षत्रप्रयु
क्तविशेषशास्त्रेणापवाद इति॥ सोयं पूर्वदिने रात्रौ नक्षत्रयोगः सोपि क्वचिदपोद्यते॥ तथा च स्कंदपुराणे॥ यस्मि
न्दिने भवेज्ज्येष्ठा मध्याह्नादूर्ध्वमप्यणुः॥ तस्मिन् हविष्यं पूजा च न्यूना चेत्पूर्ववासरः इति॥ अत्र केवलतिथि·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तो नक्षत्रयोगस्य प्रशस्तत्वात्केवलतिथिप्रयुक्तं निर्णयमपोद्य यथा नक्षत्रप्रयुक्तो निर्णय आदृतः ॥ तथा नक्षत्र
युक्ततिथौ वारविशेषयोगस्य ततोपि प्रशस्तत्वात्तेन निर्णयः कर्त्तव्यः ॥ एतदेवाभिप्रेत्य स्कंदपुराणे पठ्यते ॥ नभो
ष्टम्यां यदा वारो भानोर्ज्येष्ठर्क्षमेव च ॥ नीलज्येष्ठेति सा प्रोक्ता दुर्लभा बहुकालिकेति ॥ तदेवं त्रिधा निर्णयः संपन्नः
॥ नृसिंहव्रतसंतानाष्टमीव्रतादौ शुक्लकृष्णभेदेन निर्णयः ॥ दूर्वाष्टम्यां व्रतविशेषेण निर्णयः ॥ नीलज्येष्ठाष्टम्यां
योगविशेषेण निर्णय इति ॥ तदेतन्निर्णयत्रयं दृष्टांती कृत्य जन्माष्टमी विचार्यते ॥ सा किं पक्षभेदेन निर्णेतव्या ॥
उत व्रतविशेषेण आहोस्विद्योगविशेषेणेति ॥ अत्रैवेदमपरं चिंत्यते ॥ किं जन्माष्टमीव्रतमेव जयंतीव्रतं उ
त तयोर्भेद इति ॥ तथा अन्यदपि चिंतनीयं किं तिथ्यंतरवदत्राहर्वेधः उत मध्यरात्रवेध इति ॥ प्रथमं व्रतस्वरूपे नि
श्चिते पश्चादस्मिन्व्रते कीदृशी तिथिरित्याकांक्षोदेति ॥ तिथौ च पूर्वविद्धत्वेन परविद्धत्वे न वा निश्चितायां पश्चात्की
दृशो वेध इत्याकांक्षा ॥ तस्मादादौ व्रतं निश्चीयते ॥ तत्र जन्माष्टमीजयंतीशब्दाभ्यां व्यवह्रियमाणं व्रतमेकमेवे
ति तावत्साधितं ॥ कुतः ॥ रूपभेदाभावात् ॥ यथा यागस्य द्रव्यदेवते रूपं ॥ यथा चोपासनस्य गुणविशेषैर्युक्तादेव

CC-0. In Public Domain. Digitization by eGangotri

ता॥ यथा च तत्त्वविद्यायां वेद्यं तत्त्वस्वरूपं॥ तथा व्रते नियमविशेषः स्वरूपं॥ नियमश्चात्रोपवासजागरणं कृष्णपूजा
चंद्रार्घ्यदानमित्यादिलक्षणः॥ स चोभयत्र न भिद्यते॥ अथोच्येत रूपाभेदेपि नित्यकाम्ययोरिव भेदो भविष्य
ति॥ नित्या जन्माष्टमी अकरणे प्रत्यवायस्मरणात्॥ तथा च स्मर्यते। गृध्रमांसं खरं काकं श्येनं च मुनिसत्तम॥ ॥
मांसं वा हि पिबन्भुक्तं कृष्णजन्माष्टमीदिने॥ जन्माष्टमीदिने प्राप्ते येन भुक्तं द्विजोत्तम॥ त्रैलोक्यसंभवं पापं तेन भुक्तं
द्विजोत्तमेति॥ भविष्यत्पुराणे॥ श्रावणे बहुले पक्षे कृष्णजन्माष्टमीव्रतं॥ न करोति नरो यस्तु भवति क्रूरराक्ष
सः॥ कृष्णजन्माष्टमीं त्यक्त्वा योन्यव्रतमुपासते॥ नाप्नोति सुकृतं किंचिदिष्टापूर्तमथापि वा॥ वर्षे वर्षे तु या ना
री कृष्णजन्माष्टमीव्रतं॥ न करोति महाप्राज्ञ व्याली भवति कानने॥ स्कंदपुराणेपि॥ ये न कुर्वंति जानंतः कृष्ण
जन्माष्टमीव्रतं॥ ते भवंति नराः प्राज्ञ व्याला व्याघ्राश्च कानने॥ रटंतीह पुराणानि भूयो भूयो महामुने॥ अती
तानागतं तेन कुलमेकोत्तरं शतं॥ पातितं नरके घोरे भुंजता कृष्णवासरे इति। जयंती च काम्या फलविशेषस्मर राम
णात्॥ विष्णुधर्मोत्तरे हि जयंतीं प्रकृत्य पठ्यते॥ यद्बाल्ये यच्च कौमारे यौवने वार्द्धके तथा॥ बहुजन्मकृतं ९०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पापं हंति सा पोषिता तिथिरिति ॥ वन्हिपुराणेपि ॥ सप्तजन्मकृतं पापं राजन्यत्त्रिविधं नृणां ॥ तस्मात्क्षयति गोविं
दस्तिथौ तस्यां समर्चितः ॥ उपवासश्च तत्रोक्तो महापातकनाशनः ॥ जयंत्यां जगतीपाल विधिनानात्र संश
य इति ॥ पद्मपुराणेपि ॥ प्रेतयोनिगतानां तु प्रेतत्वं नाशितं नरैः ॥ यैः कृता श्रावणे मासे अष्टमी रोहिणीयुता ॥
किं पुनर्बुधवारेण सोमेनापि विशेषत इति ॥ स्कंदपुराणेपि ॥ महाजयार्थं कुरुतां जयंतीं मुक्तये नघ ॥ धर्ममर्थं
च कामं च मोक्षं च मुनिपुंगव ॥ ददाति वांछितानर्थान्नानार्थं नातिदुर्लभमिति ॥ भविष्योत्तरे जयंतीकल्पे ॥ प्रति
वर्षं विधानेन मद्भक्तो धर्मनंदन ॥ नरो वा यदि वा नारी यथोक्तफलमाप्नुयात् ॥ पुत्रसंतानमारोग्यं सौभाग्य
मतुलं भवेत् ॥ इह धर्मरतिर्भूत्वा मृतो वैकुंठमाप्नुयादिति ॥ एवं जन्माष्टम्या अकरणे प्रत्यवायाज्जयंत्याः फ
लविशेषाच्चोभयोः क्रमेण नित्यत्वं काम्यत्वं चाभ्युपेतव्यमिति ॥ मैवं ॥ गुणफलाधिकारत्वाभ्युपगमेपि जयं
त्याः फलविशेषोपपत्तेः ॥ गोदोहनदध्यादि तत्र दृष्टांतः ॥ चमसेनापः प्रणयेद्गोदोहनेन पशुकामस्येति नित्य
योर्दर्शपूर्णमासयोरपां प्रणयनं विधाय तदेवाश्रित्य पशुफलाय गोदोहनमात्रं विहितं । दध्नेंद्रियकामस्येत्यत्र

CC-0. In Public Domain. Digitization by eGangotri

च्चपूर्वप्रकृते नित्याग्निहोत्रे फलायद्धिविधीयते॥ एवंजन्माष्टमीमाश्रित्य फलविशेषायजयंती नामकोरोहि
णीयोगोविधीयतां॥ नचरोहिणीलक्षणस्यकालविशेषस्यानु पादेयत्वाद्विधेयत्वंशंकनीयं॥ कालविशेषस्य
स्वरूपेणपुरुषैरनुत्पाद्यत्वेप्यनुष्ठानांगत्वंशास्त्रेणावगत्यानुष्ठानायतत्प्रतीक्षायाः कर्त्तुंशक्यत्वात्॥ अन्यः
थावसंतेवसंतेज्योतिषायजेतेत्यादिकः सर्वोपिकालविधिर्लुप्येत॥ रोहिणीयोगस्यचजयंतीनामकत्वंज
यंतीलक्षणप्रतिपादकैः स्मृतिवाक्यैरध्यवसेयं॥ तानिचवाक्यान्युदाहरामः॥ विष्णुधर्मोत्तरे रोहिणीचय
दाकृष्णेपक्षेष्टम्यांद्विजोत्तम। जयंतीनामसाप्रोक्तासर्वपापहरातिथिरिति॥ सनत्कुमारसंहितायां॥ शृणुष्वा
वहितोराजन्कथ्यमानंमयानघ॥ श्रावणस्यचमासस्यकृष्णाष्टम्यांनराधिप॥ रोहिणीयदिलभ्येतजयंती
नामसातिथिरिति॥ स्कांदे॥ प्राजापत्येनसंयुक्ताअष्टमीतुयदाभवेत्॥ श्रावणेबहुलेसातुसर्वपापप्रणाशि
नी॥ जयंपुण्यंचकुरुतेजयांपुण्यांचतोविदुरिति॥ विष्णुरहस्ये॥ अष्टमीकृष्णपक्षस्यरोहिणीऋक्षसंयुता॥ राम
भवेत्प्रोष्ठपदेमासिजयंतीनामसास्मृतेति॥ पौर्णमास्यंतेषुमासेषुस्वीकृतेषुश्रावण्यांपूर्णिमायांश्रावणमासः ९१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यसमाप्तत्वादुपरितनीं प्रतिपदमारभ्य भाद्रपदमासइत्यभिप्रेत्यप्रोष्ठपदइत्युक्तं॥ विष्णुधर्मोत्तरे॥ प्राजापत्य
र्क्षसंयुक्ताकृष्णानभसिचाष्टमी॥ सोपवासोहरेः पूजांतत्रकृत्वानसीदतीति॥ वसिष्ठसंहितायां॥ श्रावणेवान
भस्येवारोहिणीसहिताष्टमी॥ यदाकृष्णानरैर्लब्धा साजयंतीतिकीर्त्तिता॥ श्रावणेनभवेद्योगोनभस्येतुभवे
ध्रुवं। तयोरभावेयोगस्यतस्मिन्वर्षेनसंभवइति। अत्रश्रावणेतिमुख्यःकल्पः नभस्येइत्यनुकल्पः। यदिवाश्रावणेयदिवानभ
स्येसर्वथापिरोहिणीकृष्णाष्टमीयोगोजयंतीत्येतद्विवादं॥ पुराणांतरे॥ रोहिणीचयदाकृष्णोपक्षेष्टम्यां
द्विजोत्तम॥ जयंतीनामसाप्रोक्ता सर्वपापहरातिथिरिति॥ तदेवमेतैःस्मृतिवाक्यैर्जयंत्याः कृष्णाष्टमीरोहिणी
योगेस्वरूपेसतिपूर्वोदाहृतफलकामिनस्तादृशोयोगोगोदोहनदध्यादिवद्गुणत्वेनविधीयते॥ काम्येतुज्योति
ष्टोमेगुणविशेषोनकोपिफलायविहितः॥ अतःकाम्यज्योतिष्टोमवैषम्याद्गोदोहनदध्यादिसाम्याच्चपूर्वोदा
हृतफलवाक्यानिप्रकृतेनित्येजन्माष्टमीव्रतेगुणफलप्रतिपादकत्वेनोपपद्यंते॥ तथासतियथादर्शपूर्णमासा
भ्यामन्यः कश्चित्पशुफलकोगोदोहनसंज्ञकोयागोनास्ति किंतुगुणएवकेवलंगोदोहनं॥ तथानजन्माष्टमीव्रता

CC-0. In Public Domain. Digitization by eGangotri

द्न्यज्जयंतीव्रतं किंतु प्रकृत एव व्रते फलाय गुणविधिरित्येवं प्राप्ते ब्रूमः॥ व्रतद्वयमिदं भवितुमर्हति॥ कुतः। नाम
भेदात्॥ निमित्तभेदात्॥ रूपभेदात्॥ शुद्धमिश्रत्वभेदात्॥ निर्देशभेदाच्च॥ तथाहि॥ पूर्वोदाहृतेषु अकरणे प्र
त्यवायप्रतिपादकस्मृतिवाक्येषु जन्माष्टमीव्रतमित्येव नाम व्यवहृतं॥ तथा पूर्वोदाहृतेषु जयंतीव्रतमिति ना
म व्यवहारः॥ नामभेदाच्च कर्मभेदो ज्योतिरधिकरणे व्यवस्थितः॥ अस्य चाधिकरणस्य संग्राहकावेतौ श्लोकौ
भवतः॥ अथैष ज्योतिरित्यत्र गुणो वा कर्म वा पृथक्॥ गुणः सहस्रदानात्मा ज्योतिष्टोमे ह्यनूदिते॥ अथेति प्रकृते
छिन्न एतच्छब्दो यगं वदेत्॥ संख्यये वान्यकर्मत्वमुत्पत्तिगतसंज्ञयेति॥ अयमर्थः॥ अथैष ज्योतिरथैष विश्व
ज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेतेति श्रुतं। तत्र संशयः। किं प्रकृत एव ज्योतिष्टोमे सहस्रं दक्षिणा स्यादि
गुणविधिः॥ उत यागांतरविधिरिति॥ एष ज्योतिरेतेनेत्याभ्यामेतच्छब्दाभ्यां प्रकृतं ज्योतिष्टोममनूद्यतत्र गु
णविधिरिति पूर्वः पक्षः॥ अर्थांतरद्योतकेनाथशब्देन प्रकृतस्य ज्योतिष्टोमस्य विच्छेदः क्रियते॥ एतच्छब्दश्च

प्रत्यासन्नं ब्रूते। प्रत्यासत्तिश्च द्विविधा॥ अतीता आगामिनी चेति। तत्रातीतायाः प्रत्यासत्तेर्विच्छेदे सति आग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म्निप्रत्यासत्तिपरत्वेनैतच्छब्दौ उपपन्नौ॥ तथाप्येककर्मत्वं माभूत्कर्मभेदे तु किं प्रमाणमिति चेत्॥ अपूर्वसंज्ञेति
वदामः॥ एष ज्योतिरित्यस्मिन्नुत्पत्तिवाक्ये पूर्वप्रकृतकर्मविषया या ज्योतिष्टोमसंज्ञा या अन्या ज्योतिरित्येषा सं
ज्ञा श्रूयते॥ तत्र यथा पूर्वाधिकरणे सप्तदश प्राजापत्यान्पशूनालभेतेत्यत्रोत्पत्तिवाक्यगतया संख्यया कर्मभे
दो निरूपितः॥ तथात्राप्युत्पत्तिवाक्यगतया नूतनसंज्ञया कर्मभेदोभ्युपगंतव्य इति॥ एवं च सति प्रकृतेप्यने
न न्यायेनोत्पत्तिवाक्यगताभ्यां जन्माष्टमीव्रतजयंतीव्रतसंज्ञाभ्यां व्रतभेदोभ्युपगंतव्यः॥ तथा निमित्तभेदा
दपि व्रतभेदः जन्माष्टमीव्रते तिथिरेव निमित्तं॥ जयंतीव्रते तु रोहिणीयोगः॥ ननु जन्माष्टमीत्यस्मिन्नपि व्यवहा
रे योग एव विवक्षितव्यः॥ नक्षत्रयुक्तायामेव तिथौ देवकीनंदनस्योत्पत्तेः॥ मैवं॥ तज्जन्मन्यष्टम्या एव प्रधा
नप्रयोजकत्वात्॥ रोहिणीतद्योगयोर्विद्यमानयोरपि बुधवारादिवदुपलक्षणत्वात्॥ अतएव शास्त्रेषु ज
न्माष्टमीत्येव समाख्यायते॥ अन्यथा जन्मरोहिणीजन्मयोग इति वा समाख्यायेत॥ तत्सद्भावमात्रेण प्रयो
जकत्वे बुधवारोपि प्रयोजकः स्यात्॥ अस्त्विति चेत्। न। अतिप्रसंगात्। तज्जन्मकाले ह्यापरावसानस्य संव

 त्सरविशेषस्यचसद्भावेननयोरपिप्रयोजकत्वंकेनवार्येत॥तस्माज्जन्माष्टम्याएवप्राधान्यं।तत्प्राधान्येन
 श्रुतिलिंगादिषुषट्सुसमाख्यारूपंषष्ठंप्रमाणमुपन्यस्तंवेदितव्यं॥यथाप्रत्यक्षादिषुसंभवेतिख्यातंतेष्वष्टसुप्र
माणेष्वेतित्स्यरूपमागमरूपंवाप्रमाणमुक्तंभवति॥ननुनिरर्थकोऽयंवाग्वादलक्षणः कोलाहलः॥यद्येकंव्र
तंयदिवाव्रतद्वयमुभयथाप्यनुष्ठाने कोनामातिशयः स्यात्॥ अस्त्येवमहानतिशयः॥यस्मिन्संवत्सरेश्राव
णबहुलाष्टमींपरित्यज्यान्यस्मिन्नवम्यांरोहिणीभवतितस्मिन्संवत्सरेजयंतीस्वरूपेणैवनास्ति॥ अतो
जयंतीव्रतस्यतत्रलुप्तत्वात्तस्यैवजन्माष्टमीव्रतत्वे तदपिनप्राप्नुयात्॥भेदपक्षेत्वसत्यामपिजयंत्यांजन्मा
ष्टमीव्रतंतत्रप्रवर्त्ततइत्ययमनुष्ठानेतिशयः। भवत्वेवंतथापिनोपन्यस्तो निमित्तभेदोव्रतभेदमावहति॥क
र्मभेदहेतुषुशब्दांतराभ्याससंख्यागुणप्रक्रिया॥नामधेयेषुषट्सुप्रमाणेषुनिमित्तस्यानंतर्भावादितिचेत्॥
मैवं॥ तथाहिपूर्वोक्तसंज्ञाभेदसंपादितंव्रतभेदंनिमित्तभेदंउपोद्बलयति॥ तस्मादत्रनिमित्तभेदाद्व्रतभेदः॥
तथारूपभेदादपिव्रतभेदोवगंतव्यः॥रूपभेदस्यकर्मभेदहेतुत्व मामिक्षाधिकरणेनिर्णीतं॥अस्यचाधिकर

CC-0. In Public Domain. Digitization by eGangotri

णस्य संग्राहकावेतौ श्लोकौ भवतः॥ गुणः कर्मांतरं वा स्यात् वाजिभ्यो वाजिनं त्विति॥ गुणो देवाननूद्योक्तः स
मुच्चयविकल्पतः॥ आमिक्षोत्पत्तिशिष्टत्वात्सबला तत्र वाजिनं॥ गुणोप्रविश्य कर्मान्यत् कल्पयेद्वाजि
देवकमिति॥ तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति श्रुतं॥ अम्लदधिसंबंधा
त्क्षीरनीरयोर्विभेदे सति यो घनीभूतः क्षीरांशः सामिक्षा॥ तस्याश्च विश्वेदेवा देवता॥ तत्र यत्पृथग्भूतं नी
रं तद्वाजिनं॥ तस्य च वाजिनो देवतास्तस्य च वाक्यस्य आमिक्षां तस्य प्रतिपाद्यमामिक्षाद्रव्यकं विश्वदे
वदेवताकमेकं कर्म॥ तथा सति किमुपरितनेन वाजिभ्यो वाजिनमित्यनेन वाक्येन पूर्वस्मिन्नेव कर्मणि वा
जिनं गुणो विधीयते उत कर्मांतरविधिरिति संशयः॥ तत्र वाजोन्नमामिक्षा सा एषां देवानामस्तीति वाजिन इति
व्युत्पत्त्या प्रकृतान्देवाननूद्य वाजिनं गुणो विधीयते॥ स चामिक्षया सह विकल्पते समुच्चयो वेति पूर्वः पक्षः॥
उत्पत्तिशिष्टामिक्षागुणावरुद्धस्य कर्मणो गुणांतराकांक्षाभावात्॥ वाजिनस्य तत्र प्रवेशासंभवे सत्यन्यथा
नुपपन्नो वाजिनगुणो वाजिशब्दार्थस्य प्रकृतदेवताव्यतिरिक्तदेवत्वं कल्पयित्वा कर्मभेदं पर्यवस्यतीति सि

CC-0. In Public Domain. Digitization by eGangotri

ज्ञांतः॥ तत्र यथा द्रव्यदेवतालक्षणस्य यागस्वरूपस्य भिन्नत्वात्कर्मभेदः॥ तथा प्रकृतेपि रूपभेदस्तत्कृतभेदोभ्यु
पगम्यतां॥ उपवासमात्रं जन्माष्टमीस्वरूपं तदुत्पत्तिवाक्ये तन्मात्रस्य प्रतीयमानत्वात्॥ ननु जयंतीव्रत एवो
पवासे कुर्यादित्युत्पत्तिवाक्यं स्मर्यते॥ न तु जन्माष्टमीव्रते॥ बाढं॥ तत्राप्यत्र विधिरुन्नेतव्यः॥ अन्यथा भोजने
प्रत्यवायस्मरणानुपपत्तेः स चोन्नीयमानो विधिरुपवासमात्रं विधत्ते न तु मंडपनिर्माणजागरणप्रतिमादाना
दिकं॥ विधेरुन्नयनहेतुष्वकरणप्रत्यवायवाक्येषु भोजननिषेधमात्रस्मरणात्॥ न हि तत्र निद्रायां दानाभावे वा
प्रत्यवायः स्मर्यते॥ अत उपवासमात्रं तत्र स्वरूपं न तु दानादिकं॥ अत एवाकरणे प्रत्यवायमभिधायवाक्यशे
षे जयंतीप्रयुक्तदानादिशंकाव्यावृत्तये केवलशब्द उपवासविशेषणत्वेन पठ्यते॥ केवलेनोपवासेन तस्मिन्
जन्मदिने मम॥ शतजन्मकृतात्पापान्मुच्यते नात्र संशय इति॥ तस्माज्जन्माष्टमीव्रतस्योपवासमात्रं स्व
रूपं॥ यदि शिष्टास्तत्रापि जागरणदानादिकमनुतिष्ठंति॥ अनुतिष्ठंतु नाम॥ अविरुद्धैः पुण्यविशेषैर्व्रतस्योपोद्ब
लनसंभवात्॥ शास्त्रेण तु प्रापितमुपवासमात्रं जयंतीव्रतस्य तु दानादिसहित उपवासः स्वरूपं॥ तद्विधायकेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शास्त्रेषु तथाभिधानात्॥ तथाच वन्हिपुराणे॥ तुष्ट्यर्थं देवकीसूनोर्जयंतीसंभवं व्रतं॥ कर्त्तव्यं वित्तमानेन भक्त्या
भक्तजनैरपीति॥ भविष्योत्तरेपि॥ मासि भाद्रपदेष्टम्यां निशीथे कृष्णपक्षगे॥ शशांके वृषराशिस्थे ऋक्षे रोहि
णि संज्ञके॥ योगेस्मिन्वसुदेवाद्धि देवकी मामजीजनत्॥ तस्मान्मां पूजयेत्तत्र शुचिः सम्यगुपोषितः॥ ब्राह्मणा
न्भोजयेद्भक्त्या ततो दद्याच्च दक्षिणां॥ हिरण्यं मेदिनीं गावो वासांसि कुसुमानि च॥ यद्यदिष्टतमं तत्तत्कृष्णो मे
प्रीयतामिति॥ भविष्यद्विष्णुधर्मोत्तरयोः॥ जयंत्यामुपवासश्च महापातकनाशनः। सर्वैः कार्यो महाभक्त्या पूज
नीयश्च केशव इति॥ वन्हिपुराणे॥ कृष्णाष्टम्यां भवेद्यत्र कलैका रोहिणी यदि॥ जयंती नाम सा प्रोक्ता उपोष्या
सा प्रयत्नत इति॥ स्मृत्यंतरेपि॥ प्राजापत्यर्क्षसंयुक्ता श्रावणस्यासिताष्टमी॥ वर्षे वर्षे तु कर्त्तव्या तुष्ट्यर्थं चक्र
पाणिन इति॥ नारदीयसंहितायां जयंतीं प्रकृत्य स्मर्यते॥ उपोष्य जन्मचिन्हानि कुर्याज्जागरणं तु यः॥ अ
र्द्धरात्रयुताष्टम्यां सोश्वमेधफलं लभेदिति॥ एवमेतेषु विधिवाक्येषु दानादियुक्त उपवासो जयंतीव्रतरूप
त्वेन प्रतीयते॥ अतो रूपभेदाद्व्रतभेदः। तथा शुद्धमिश्रत्वभेदादपि द्रष्टव्यः। अकरणे प्रत्यवायमात्रस्मरणा

CC-0. In Public Domain. Digitization by eGangotri

 त्त्मुक्तं नित्यं जन्माष्टमीव्रतं॥ करणे फलविशेषस्मरणात् अकरणे प्रत्यवायस्मरणाच्च नित्यत्वेन काम्यत्वेन च मि
 श्ररूपं जयंतीव्रतं॥ तत्र फलवाक्यानि पूर्वपक्ष एव प्रसंगादुदाहृतानि॥ अकरणे प्रत्यवायश्च जयंतीं प्रकृत्य क
स्मिंश्चित्पुराणे स्मर्यते॥ अकुर्वन्याति नरकं यावदिंद्राश्चतुर्दशेति॥ स्कंदपुराणेपि॥ शूद्रान्नेन तु यत्पापं शव
हस्तस्य भोजने। तत्पापं लभते कुंति जयंतीविमुखो नरः॥ ब्रह्मघ्नस्य सुरापस्य गोवधे स्त्रीवधेपि वा॥ न लोकोय
दि शार्दूल जयंतीविमुखस्य च॥ क्रियाहीनस्य मूर्खस्य परान्नं भुंजतोपि वा॥ न कृतघ्नस्य लोकोस्ति जयंतीवि
मुखस्य च॥ न करोति यदा विष्णोर्जयंतीसंभवं व्रतं॥ यमस्य वशमापन्नः सहते नारकीं व्यथां॥ जयंतीवासरे
प्राप्ते करोत्युदरपूरणं॥ संपीड्यते तिमात्रं तु यमदूतैः कलेवरं॥ यो भुंजीत विमूढात्मा जयंतीवासरे नृपेति॥
एतैरकरणप्रत्यवायवाक्यैर्नित्यत्वं च जयंत्याः॥ नन्वेवमुक्तैरकरणप्रत्यवायवाक्यैः केवलेनोपवासेनेति पा
पक्षयवाक्याच्च जन्माष्टमीव्रतमपि नित्यकाम्यं स्यात्॥ मैवं॥ पापक्षयफलकत्वमात्रेण काम्यत्वे संध्यावंद
नादेरपि काम्यत्वप्रसंगात्॥ अतः सत्यपि पापक्षये फलांतरास्मरणे न केवलनित्यत्वं जन्माष्टमीव्रतस्य युक्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततः शुद्धमिश्रत्वभेदाद्व्रतयोर्भेदः॥ तथानिर्देशभेदादपिव्रतभेदोद्रष्टव्यः॥ निर्देशभेदश्च भृगुवाक्येदृश्य
ते॥ जन्माष्टमीजयंतीचशिवरात्रिस्तथैवच॥ पूर्वविद्धैवकर्त्तव्यातिथिभांतेचपारणमिति॥ यत्रजन्माष्ट
मीरोहिणीचेतिपाठः॥ तत्रापिरोहिणीशब्देनतद्युक्तातिथिर्विवक्षिता॥ नकेवलंरोहिणी तस्मिन्वाक्येनिर्दिष्ट
योः पूर्वोत्तरयोर्जन्माष्टमीशिवरात्र्योस्तिथित्वाद्यद्येकमेवव्रतंस्यात्तर्हिनिर्देशभेदोनोपपद्येत॥ ननुव्रतभेदे
प्यस्तिदोषः॥ यदादिनद्वयेअष्टमीवर्त्ततेरोहिणीतूत्तरदिनएवतदापूर्वदिनेजन्माष्टम्युपवासः॥ परेद्युर्जयं
त्युपवासइतिनैरंतर्येणोपवासद्वयंप्रसज्येत॥ प्रसज्यतांनामप्रमाणवत्वादितिचेत्॥ परदिनेभोजनोपवा
सलक्षणविरुद्धधर्मप्रसंगात्॥ उपवासस्यांगंपारणमितिहिवक्ष्यते॥ तथाचजन्माष्टम्युपवासांगस्यपारणस्य
जयंत्युपवासस्यचैकत्रप्राप्तिःसोयमेकोदोषः॥ व्यतिरेकानुपलंभश्चापरोदोषः॥ तथाहि॥ यथाजयंतीव्य
तिरिक्ताजन्माष्टम्युपलभ्यतेतथाजन्माष्टमीव्यतिरिक्तापिजयंतीक्वापिवत्सरेउपलभ्येतनत्वेवमुपलभ्य
तेऽतोव्रतभेदोपिदुष्टएव॥ अत्रोच्यते॥ नतावत्पारणोपवाससांकर्यलक्षणदोषोस्ति॥ आघ्राणोदकपाना

दिनापारणे संपादितेप्युपवासभंगाभावात्॥ अन्यथा द्वादशीपारणात्रयोदशीनक्तयोः क्वचित्सांकार्य्यकेन
वार्येत॥ नाप्युपवासद्वयनैरंतर्य्यं॥ रोहिणीसंयोगसंभवे जन्माष्टम्या अपि तत्रैव कर्त्तव्यत्वात्॥ सर्वत्र तिथि
षु लभ्ययोगस्य केवलतिथेरुत्कृष्टत्वेन केवलायास्तिथेस्तत्रोपेक्षणीयत्वात्॥ अतएव व्यतिरेकानुपलंभो
प्यलंकारायनतु दोषाय॥ जन्माष्टम्या रोहिणीनिरपेक्षत्वेन व्यतिरेक उपलभ्यतां नाम॥ जयंत्यास्तु योगरूप
त्वेन रोहिण्यामिवाष्टम्यामपि सापेक्षत्वेन कथं व्यतिरेकशंकावकाशस्तस्माद्व्रतद्वयपक्षे न कोप्यस्ति दोषः॥
किंच॥ यदा रोहिणीयोगोस्ति तदा जन्माष्टमीजयंत्योः सहप्रयोगस्यावश्यंभावित्वेन जयंतीव्रत एव जन्मा
ष्टमीव्रतमंतर्भवति॥ तस्मादपि नोपवासद्वयप्रसंगः॥ तदेवं व्रतभेदे दोषाभावान्नत्साधकानां च नामभेदादीनां
पंचानां हेतूनां सद्भावाद्व्रतभेद एवावश्यमभ्युपेयः॥ व्रतैक्यभ्रमस्तु तयोरुक्तयुक्त्यनुसंधानाभावाद्दृष्ट्युप
वाससादृश्याच्च केषांचिदुदेति॥ सादृश्यं च गुणविकृतित्वादाश्रयाश्रयिभावाच्च संभाव्यते॥ यथा दर्शयागस्य गु
णविकृतिः साकंप्रस्थापीयकोयागः॥ तत्र दर्शयागे यावंतोंगांगिविषयाः प्रयोगास्ते सर्वेपि साकंप्रस्थायीये

CC-0. In Public Domain. Digitization by eGangotri

विद्यंते॥ भेदस्तु स्वल्प एव भवति॥ दर्शयागे सान्नाय्यहविषोर्दधिपयसोः पृथगवदानं॥ साकंप्रस्थायीये तु स
हैवप्रस्थानं॥ एतावता भेदेन गुणविकृतिरित्याभिधीयते॥ तथाग्निष्टोमस्य गुणविकृतिरुक्थ्यः अग्निष्टोमे ह्य
द्वादशस्तोत्राणि॥ उक्थ्ये त्वधिकानि त्रीणि॥ ततो गुणाधिक्याद्गुणविकृतित्वमेवमत्रापि जन्माष्टम्यामुपवा
सोऽनुष्ठेयः॥ जयंत्यां तु दानादिरधिको गुणः॥ अतः सा गुणविकृतिः॥ आश्रयाश्रयिभावश्च ज्योतिष्टोमे तद्
गावरुद्धोपासने दृष्टस्तत्र ज्योतिष्टोम आश्रयः॥ तस्यां गान्युक्थ्योद्गीथानि तत्रोक्थ्यं नाम बह्वृचाध्यायिना
होत्रा शस्यमानमाज्यमरूत्वतीयनिष्केवल्यादिनामकं शस्त्रं॥ तच्चोक्थमाश्रित्य बह्वृचब्राह्मणोपनिषद्यु
पासनानि विहितानि॥ तथा च श्रुतिः॥ उक्थमुक्थमिति वै प्रजा वदंति तदिदमेवोक्थ्यानियमेव पृथिवीति॥ अ
हमुक्थ्यमस्मीति विद्यादिति च॥ उद्गीथिनो नाम सामवेदिनो ज्ञात्रा यागे गीयमानः॥ साम्नो भागविशेषः॥ तं
चोद्गीथमाश्रित्य छांदोग्योपनिषद्युपासनानि विहितानि॥ ॐमित्येतदक्षरमुद्गीथमुपासीतेति। एवं प्रकृतेपि ज
न्माष्टमीव्रते येयं श्रावणकृष्णाष्टमी तामाश्रित्य रोहिणीयोगनिमित्तदानादिकं जयंतीव्रते विधीयते॥ अतो गुण

का॰मा दिकृतित्वेनाश्रयाश्रयिभावेनचसादृश्यसद्भावादनयोर्व्रतयोरैक्यभ्रमोमंदबुद्धेर्जायतां नामप्रमाणन्यायद
९७ र्शिभिस्तुसर्वथैवव्रतभेदोंगीकार्यइतिसिद्धं।यदेतद्विचारत्रयंपूर्वमुत्क्षिप्तंव्रतभेदेतिथिनिर्णयेवेधेचेतितत्रव्र
तभेदोनिर्णीतः॥ ॥अथतिथिर्निर्णेतव्या॥ ॥तन्निर्णयश्चवेधाधीनः॥अतोवेधःपूर्वमभिधीयते।तिथ्यंत
रेष्वन्हएवप्रायेणकर्मकालत्वादुदयास्तमयवेलायांत्रिमुहूर्त्तवेधःसामान्येननिरूपितः।पंचम्यांतुविशेषःष
ण्मुहूर्त्तवेधोदर्शितः॥जन्माष्टम्याजयंत्याश्चरात्रिप्रधानत्वाद्रात्रियोगःप्रशस्तः॥एतच्चजाबालिवृद्धगौत
माभ्यांदर्शितं।अहस्सुतिथयःपुण्याकर्मानुष्ठानतोदिवा॥नक्तादिव्रतयोगेषुरात्रियोगोविशिष्यतइति॥यद्य
प्युपवासव्रतत्वादहनिरात्रौचमुख्यत्वंयुक्तितःसामर्थ्यसिद्धंतथाप्यर्द्धरात्रस्यमुख्यकालत्वमुक्तंवसिष्ठ
संहितायां॥ अष्टमीरोहिणीयुक्तानिशार्द्धे दृश्यतेयदि॥मुख्यकालइतिख्यातस्तत्रजातोहरिःस्वयमिति॥
एवंसत्यर्द्धरात्रसद्भावएवात्रकर्मकालव्याप्तिरित्यभिधीयते॥तदेवाभिप्रेत्यविष्णुरहस्येदृश्यते।रोहिण्याम राम
र्द्धरात्रेतुयदाकृष्णाष्टमीभवेत्॥तस्यामभ्यर्चनंशौरेर्हंतिपापंत्रिजन्मजमिति॥तस्मिन्नर्द्धरात्रेकियत्परिमा ९७

CC-0. In Public Domain. Digitization by eGangotri

णमपेक्षितमित्यपेक्षायामादित्यपुराणे दर्शितं ॥ अर्द्धरात्रादधश्चोर्ध्वं कलयापि यदा भवेत् ॥ जयंती नाम सा
प्रोक्ता सर्वपापप्रणाशनीति ॥ वराहसंहितायामपि। सिंहेर्के रोहिणीयुक्ता नभः कृष्णाष्टमी यदि ॥ रात्र्यर्द्धे पू
र्वापरगा जयंती कलयापि चेति। रात्रेरर्द्धं रात्र्यर्द्धं पूर्वं चापरं च पूर्वापरे ॥ रात्र्यर्द्धं च ते पूर्वापरे च रात्र्यर्द्धपूर्वापरे ॥
तयोर्गच्छति वर्त्तत इति रात्र्यर्द्धपूर्वापरगा घटिकाया अशीत्यधिकशततमो भागः ॥ अष्टादश निमेषास्तु काष्ठा
त्रिंशत्तु ताः कलाः ताश्च त्रिंशत्क्षणस्ते तु मुहूर्त्तो द्वादशास्त्रियामित्यमरः ॥ तथा च पलतृतीयो भागः कला भव
ति ॥ तावता परिमाणेन पूर्वार्द्धावसाने उत्तरार्द्धादौ च वर्तमाना ग्रहीतव्या ॥ खंडतिथिरूपा कृष्णाष्टमी द्विविधा
॥ पूर्वेद्युः सप्तमीयुक्ता परेद्युर्नवमीयुक्ता चेति ॥ तत्र सप्तमीयुक्तायां रात्रिपूर्वार्द्धावसाने कलासद्भावो विधीयते ॥
उत्तरार्द्धादौ स्वतः सिद्धत्वेनाविधेयत्वात्तद्विपर्ययेण नवमीयुक्तायामुत्तरार्द्धादौ कलासद्भावो विधीयते ॥ पूर्वा
र्द्धावसानकलायाः सप्तमीयुतविषयत्वं विष्णुधर्मोत्तरे स्पष्टमभिहितम् ॥ रोहिणीसहिता कृष्णा मासि भाद्रपदे
ष्टमी ॥ सप्तम्यामर्द्धरात्राधः कलयापि यदा भवेत् ॥ तत्र जातो जगन्नाथः कौस्तुभी हरिरीश्वरः ॥ तमेवोपव

CC-0. In Public Domain. Digitization by eGangotri

सेत्कालं कुर्यात्तत्रैव जागरमिति॥ इयमष्टमीकृष्णपक्षादिमासविवक्षया भाद्रपदे भवति॥ सैवाष्टमी शुक्लप
क्षादिमासविवक्षया श्रावणे भवति॥ अत एव योगीश्वरः॥ रोहिणीसहिता कृष्णा मासे च श्रावणेऽष्टमी॥ अर्द्धरा
त्रादधश्चोर्ध्वं कलयापि यदा भवेत्॥ जयंती नाम सा प्रोक्ता सर्वपापप्रणाशिनीति॥ कलाया अतिसूक्ष्मत्वेन दु
र्लक्ष्यत्वात्स एव पक्षांतरमाह॥ अर्द्धरात्रादधश्चोर्ध्वं एकार्द्धघटिकान्विता॥ रोहिणी चाष्टमी ग्राह्या उपवासव्र
तादिष्विति॥ एका चार्द्धघटिका चैकार्द्धघटिके ताभ्यां समन्विता॥ कलामपेक्ष्यार्द्धघटिका स्थूला॥ तामपेक्ष्य घ
टिका स्थूला॥ तत्रायमर्थः संपद्यते॥ पूर्वभागावसान एका घटिका॥ उत्तरभागादौ चैका मिलित्वा तन्निशीथश
ब्द वाच्यं मुहूर्त्तं॥ तावत्परिमाणं सर्वैरपि सुलक्ष्यत्वान्मुख्यः कल्पः॥ तदसंभवेऽर्द्धघटिकान्वेष्टव्या तस्याप्य
संभवे कलेति॥ तत्र मुख्यं पक्षमभिप्रेत्य भविष्योत्तरे निशीथे कृष्णपक्षग इत्युक्तं॥ तच्च वचनं साकल्येन पूर्वमे
वोदाहृतं॥ अत्र जयंत्यां चंद्रार्घ्यस्यावश्यकर्त्तव्यत्वात्तस्य च चंद्रोदयकालीनत्वान्निशीथयोगः प्रशस्तः॥ एत राम·
देव विष्णुधर्मोत्तरे भिहितं॥ अर्द्धरात्रे तु योगोऽयं तारापत्युदये तथा॥ नियतात्मा शुचिस्नातः पूजां तत्र प्रवर्त्त ९८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येदिति॥सोयमर्द्धरात्रयोगोमुख्यः कल्पः॥यस्तुकृत्स्नाहोरात्रयोगःसोपंमुख्य तरः॥यश्चयदाकदाचिदी
षद्योगःसोनुकल्पः॥सचवसिष्ठसंहितायांदर्शितः॥अहोरात्रंतयोर्योगोह्यसंपूर्णोभवेद्यदि॥मुहूर्त्तमप्यहो
रात्रेयोगश्चेत्तामुपोषयेदिति॥पुराणांतरेपि॥रोहिणीचयदाकृष्णोपक्षेष्टम्यांद्विजोत्तम॥जयंतीनामसाप्रोक्ता
सर्वपापहरातिथिः।वासरेवानिशायांवायत्रस्वल्पापिरोहिणी॥विशेषेणनभोमासेसैवोपोष्यामनीषिभिरिति
॥योयंजयंतीव्रतेयोगनिर्णयः॥सएवजन्माष्टमीव्रतेपिद्रष्टव्यः।यस्मिन्वत्सरेयोगोनास्तितस्मिन्वत्सरेज
न्माष्टमीव्रतमेकमेवप्रवर्त्तते॥तत्रापिनेतराष्टमीवद्दिवसेवेधः किंत्वर्द्धरात्रवेधः॥तथाचतस्मिन्नेवपुराणांत
रे॥दिवावायदिवारात्रौनास्तिचेद्रोहिणीकला॥रात्रियुक्तांप्रकुर्वीतविशेषेणेंदुसंयुतां॥अन्यत्रापि॥अष्टमी
शिवरात्रिश्चह्यर्द्धरात्राद्धोयदि॥दृश्यतेघटिकायासापूर्वविद्धाप्रकीर्त्तितेति॥ ॥इतिवेधोनिरूपितः॥ ॥
अथयात्याज्यातिथिर्निरूप्यते॥ ॥साचवत्सरभेदेनद्विधाभवति।रोहिणीरहितारोहिणीयुक्ताचेति॥तत्रयारो
हिणीरहिताष्टमीसापिद्विविधा॥शुद्धासप्तमीविद्धाचेति॥सूर्योदयमारभ्यप्रवर्त्तमानाष्टमीशुद्धा॥निशी॰

CC-0. In Public Domain. Digitization by eGangotri

थादूर्ध्वंकृसप्तम्याकिंयस्यापियुक्ताविद्धा॥सुद्धापिपुनर्निशीथव्यासव्याप्तिभ्यांद्विविधा॥तत्रनिशीथव्यापि
नीजन्माष्टमीव्रतेमुख्या। विशेषेणंदुसंयुतामितिवचनात्॥निशीथव्याप्तिरहितापि।रात्रियुक्तांप्रकुर्वीतेति
वचनेनग्रहीतव्याभवति॥ननुपूर्वेद्युर्निशीथादूर्ध्वमारभ्यपरेद्युर्निशीथादर्वाग्व्यासमाप्यते। तस्याउभयत्ररा
त्रिसंबंधित्वात्कुत्रोपवासइतिचेत्। परेद्युरितिब्रूमः॥उभयत्रनिशीथव्याप्त्यभावस्यरात्रिसंबंधस्यचतुल्यत्वे
पिपरेद्युःप्रातःसंकल्पकालमारभ्यवर्त्तमानतयाप्राशस्त्यंद्रष्टव्यं॥सप्तमीविद्धापित्रिविधा॥पूर्वेद्युरेवनिशी
थव्यापिनी।परेद्युरेवनिशीथव्यापिनी।उभयत्रव्यापिनीचेति॥तत्रप्रथमद्वितीययोःपक्षयोःनिशीथव्याप्तेः
प्रयोजकत्वेनयानिशीथव्यापिनीसाविशेषेणंदुसंयुतामितिवचनेनग्रहीतव्याभवति॥यातुदिनद्वयेऽपिनिशी
थव्यापिनीतस्यामुभयत्रनिशीथयोगस्यरात्रियोगस्यचतुल्यत्वान्नानेनवचनेननिर्णयःसंभवति॥नापि
कृष्णपक्षेष्टमीचैवेत्यादिभिरष्टमीमात्रमुपजीव्यप्रवृत्तैर्निर्णेतुंशक्यते॥तेषामहर्वेधविषयत्वात्॥अन्य
थाव्रतांतरेष्वपिनिशीथवेधःप्रसज्येत॥तस्मान्न्यायःपरिशिष्यते॥न्यायश्चपरेद्युरुपवासंप्रापयति॥संकल्प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कालमारभ्यतिथिसद्भावात्॥ नचसाकल्याभिधायिवचनेन पूर्वेद्युरपिसंकल्पकालेतिथिरस्तीतिशंकनीयम्॥
तस्यामुख्यतिथित्वाभावात्॥ किंच॥ सातिथिः सकला ज्ञेयायस्यामस्तमितोरविरिति॥ वचनंनिशीथव्यापिनीम
ष्टमींनविषयीकरोति॥ तस्मात्परेद्युरेवोपवासः॥ तदेवंचतुर्विधारोहिणीरहिताष्टमीनिर्णीता॥ अथरोहिणीसहि
ताष्टमीनिर्णीयते॥ सापिचतुर्विधाशुद्धाविद्धाशुद्धाधिकाविद्धाधिकाचेति॥ तत्रशुद्धायांसंपूर्णयोगोनिशीथयो
गोयत्किंचिन्मूहूर्त्तयोगश्चेतित्रैविध्यंभवति॥ एवंविद्धायामपिद्रष्टव्यं॥ एतेषुषट्सुभेदेषुदिनांतरेयोगाभावादु
पवासेसंदेहोनास्ति॥ किंतुकेवलंयोगतारतम्यात्प्राशस्त्यतारतम्यंभवति॥ यत्किंचिन्मुहूर्त्तयोगः प्रशस्तः॥ अर्द्ध
रात्रयोगः प्रशस्ततरः॥ संपूर्णयोगः प्रशस्ततमः॥ सर्वेष्वपियोगेषुयोगमुपजीव्योपवासोविहितोविष्णुरहस्ये॥
प्राजापत्यर्क्षसंयुक्ताकृष्णानभसिचाष्टमी॥ मुहूर्त्तमपिलभ्येतसोपोष्यासुमहाफला॥ मुहूर्त्तमप्यहोरात्रेयस्मि
न्युक्तंहिदृश्यते॥ अष्टम्यारोहिणीऋक्षंतांसुपुण्यामुपावसेदिति॥ शुद्धाधिकातुसूर्योदयमारभ्यप्रवृत्ता॥ परे
द्युःसूर्योदयमतिक्रम्येषद्वर्त्तते॥ साचत्रिविधा॥ पूर्वेद्युरेवरोहिणीयुक्ता॥ परेद्युरेवरोहिणीयुक्ता॥ दिनद्वयेपिरोहि

CC-0. In Public Domain. Digitization by eGangotri

णीयुक्ता चेति॥ तत्राद्ययोर्द्वयोः पक्षयोर्नास्त्युपवाससंदेहः। रोहिणीयुक्ताया द्वितीयकोटेरभावात्॥ तृतीयपक्षे तु
रोहिणीयोगस्योभयत्र समानत्वेपि गुणाधिक्यात्पूर्वैवोपोष्या। गुणाधिक्यं च दर्शयिष्यते॥ ये यमत्रोपोष्यत्वेनोक्ता पू
र्वा तिथिः॥ सापि रोहिणीयोगभेदात्त्रिधाभिद्यते॥ अष्टमीवत्सूर्योदयमारभ्य प्रवृत्ता रोहिणी कदाचित्परेद्युरपि कि
यतीं वर्द्धते॥ कदाचित्पूर्वेद्युर्निशीथमारभ्य रोहिणी प्रवर्त्तते॥ कदाचिन्निशीथादूर्ध्वमारभ्य प्रवर्त्तते॥ तत्र प्रथमप
क्षे संपूर्णयोगत्वमेको गुणः॥ संकल्पकालमारभ्य कृत्स्नकर्मकालव्याप्तिरपरो गुणः॥ निशीथव्याप्तिस्तृतीयो
गुणः॥ न चैते त्रयो गुणाः परेद्युः संभवंति॥ द्वितीयपक्षे निशीथे जयंतीसंज्ञा वो गुणः। न च परेद्युः सोस्ति॥ तृतीयप
क्षे दिनद्वयेपि निशीथे योगो नास्ति॥ पूर्वेद्युः केवलाष्टमी॥ परेद्युः केवला रोहिणी॥ तत्राष्टम्याः प्राधान्यात्प्राबल्य
मभ्युपेयं। सर्वत्र हि जयंतीवाक्येषु रोहिणीसहिताष्टमीति व्यवहारोष्टमीसहिता रोहिणीति व्यवहाराभावाच्च ति
थिनक्षत्रयोः क्रमेण प्रधानोपसर्ज्जनभावोवगंतव्यः॥ अतो गुणाधिक्याच्छुद्धाधिका पूर्वैवोपोष्या। निशीथाद
र्वाक्सप्तम्या युक्ता परेद्युरपि विद्यमाना विद्धाधिका॥ नन्वत्र निशीथवेधो ग्राह्य इत्युक्तं॥ बाढं॥ वेध्याया अष्ट

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्यां निशीथे सद्भावोऽत्र निशीथवेधः॥ नतु वेधिकायाः सप्तम्याः सद्भावः विद्धाधिकायामपि पक्षत्रयं द्वयोः पक्षयोः सं
देहाभावश्च पूर्ववद्योजनीयः॥ तत्र या पूर्वेद्युरेव रोहिणीयुक्ता विद्धाधिका तस्यामुपवास आदित्यपुराणे स्मर्यते।
विनाऋक्षं न कर्त्तव्या नवमीसंयुताष्टमी॥ कार्या विद्धापि सप्तम्या रोहिणीसंयुताष्टमीति॥ विष्णुधर्मेपि॥ जयंती
शिवरात्रिश्च कार्ये भद्राजयान्विते। कृत्वोपवासं तिथ्यंते तथा कुर्वीत पारणमिति॥ गारुडपुराणेपि॥ जयंत्यां पूर्ववि
द्धायामुपवासं समाचरेत्॥ तिथ्यंते चोत्सवांते वा व्रती कुर्वीत पारणमिति॥ या परेद्युरेव रोहिणीयुक्ता विद्धाधिका
तत्रोपवासः॥ पूर्वतिथौ न युक्तः। रोहिणीयोगाभावात्॥ परेद्युस्तु तत्सद्भावात्सूर्योदयात्तेन प्राजापत्यादिना वि
ष्णुरहस्यवचनेनोपवासो विधीयते। या तूभयत्र रोहिणीयुक्ता विद्धाधिका सापि निशीथे जयंतीयोगमपेक्ष्य चतुर्द्धा
भिद्यते॥ पूर्वेद्युरेव निशीथे योगवती॥ परेद्युरेव तादृशी उभयत्र निशीथयोगरहिता चेति। तत्र या पूर्वेद्युरेव निशीथयो
गवती सा पूर्वा पोष्या॥ तदुक्तं पद्मपुराणे॥ कार्या विद्धापि सप्तम्या रोहिणीसहिताष्टमी॥ तत्रोपवासं कुर्वीत तिथिभां
ते च पारणमिति॥ अत्रावशिष्टेषु त्रिषु पक्षेषु परदिन एवोपवासः॥ तत्र दिनद्वये निशीथयोगमभिलष्य ब्रह्मवैव

त्तैपठ्यते॥ वर्जनीयाप्रयत्नेनसप्तमीसंयुताष्टमी॥ सासर्क्षापिनकर्त्तव्यासप्तमीसंयुताष्टमी॥अविद्धायांतुसर्क्षायां
जातोदेवकीनंदनइति॥ यदादिनद्वयेपिनिशीथयोगेपरत्रोपवासस्तदाकिमुवक्तव्यं॥ परेद्युरेवनिशीथयोगेदिनद्व
येपिनिशीथयोगराहित्यंबहुधाजायते॥तद्यथा॥पूर्वेद्युर्निशीथादूर्ध्वंतिथिनक्षत्रद्वयंप्रवृत्तं॥तच्चपरेद्युर्निशीथा
दर्वागेवसमाप्तमित्येकःप्रकारः॥पूर्वेद्युर्निशीथादर्वागेवनक्षत्रंप्रवृत्तं॥अष्टमीतुनिशीथादूर्ध्वंप्रवृत्तेत्यपरः॥अ
ष्टमीचनिशीथादर्वाक्प्रवृत्ताऋक्षंचनिशीथादूर्ध्वंप्रवृत्तंपरेद्युर्निशीथादर्वागेवसमाप्तमितितृतीयःपक्षः॥त्रिष्व
प्येतेषुप्रकारेषुपरैवोपोष्या॥दिनद्वयेप्यर्द्धरात्रियोगविषयेपूर्वमुदाहृतस्यवर्जनीयाप्रयत्नेनेतिवचनस्यात्रा
पिसंचारयितुंशक्यत्वात्। किंच। प्रथमप्रकारेन्यायोप्युपोद्बलकोस्ति॥संकल्पकालमारभ्यतिथिनक्षत्रयोगस्य
बहुकालव्यापित्वात्प्रशस्तत्वंद्रष्टव्यं॥द्वितीयप्रकारेपरेद्युरष्टमीबाहुल्येपिनक्षत्रयोगस्याल्पत्वादनुपादेयत्वमि
त्याशंकानकर्त्तव्या॥ अतएवस्कंदपुराणेपठ्यते॥सप्तमीसंयुताष्टम्यांभूत्वाऋक्षंद्विजोत्तम॥प्राजापत्यंद्विती
येन्हिमुहूर्त्तार्द्धंभवेद्यदि। तदाष्टयामिकंज्ञेयंप्रोक्तंव्यासादिभिःपुरेति। तृतीयप्रकारेपरेद्युर्नक्षत्रबाहुल्येप्यष्ट

CC-0. In Public Domain. Digitization by eGangotri

मीयोगस्याल्पत्वात्तदनुपादेयत्वमित्याशंका भवति ॥ साच पद्मपुराणे निवर्त्यते ॥ पूर्वविद्धाष्टमी यातु उदये नवमी
दिने ॥ मुहूर्तमपि संयुक्ता सम्पूर्णा साष्टमी भवेत् ॥ कलाकाष्ठामुहूर्त्तापि यदा कृष्णाष्टमी तिथिः । नवम्यां चै
व ग्राह्यास्यात्सप्तमीसंयुता नहीति ॥ तदेवं जन्माष्टमीभेदाज्जयंतीभेदाश्च निरूपिताः ॥ तत्र जयंतीभेदेषु पूर्वा
स दिने यदि सोमवारो बुधवासरो वा भवति ॥ तदा फलाधिक्यं भवति ॥ तदुक्तं पद्मपुराणे ॥ प्रेतयोनिगतानां तु प्रेत
त्वं नाशितं नरैः । यैः कृता श्रावणे मासि अष्टमी रोहिणीयुता ॥ किं पुनर्बुधवारेण सोमेनापि विशेषतः । किं पुनर्नवमी
युक्ता कुलकोट्यास्तु मुक्तिदेति ॥ स्कंदपुराणेपि ॥ उदये चाष्टमी किंचिन्नवमी सकला यदि ॥ भवेत्तु बुधसंयुक्ता प्राजा
पत्यर्क्षसंयुता ॥ अपि वर्षशतेनापि लभ्यते यदि वा न वेति ॥ विष्णुधर्मोत्तरेपि ॥ अष्टमी बुधवारेण रोहिणीसहिता य
दा ॥ भवेत्तु मुनिशार्दूल किं कृतैर्व्रतकोटिभिरिति ॥ यथोक्तरीत्या विहिततिथावुपवासं कृत्वा परेद्युः पारणेनोपवासं
समापयेत् ॥ पार तीर कर्मसमाप्ताविस्यस्माद्धातोर्निष्पन्नः ॥ पारणशब्दः ॥ यद्यप्यसौ समाप्तिमात्रमभिदधाति ॥ तथा
प्युपवाससमाप्तावेव लोकशास्त्रयोः प्रयोगात्पंकजादिशब्दवद्योगरूढो दृष्टव्यः ॥ तत्पाच योगरूढ्योपवासस्य चर

का·मा· सांगंभोजनमभिधत्ते।अंगत्वंचोपवासविधिवाक्येषुतिथिभांतेचपारणमितिविधानाद्वगंतव्यं।नचरागप्राप्तस्य
१०२ भोजनस्यानेनवचनेनोपवासांगतिथिनक्षत्रशेषयोर्निषेधःक्रियतेनतुपारणनामकंकिंचिदंगंविधीयतइतिशंक
नीयं।।तथासतिपारणशब्दप्रयोगानुपपत्तेः।।रागप्राप्तेहिअभ्यवहरणेभोजनशब्दः।।तत्रपारणशब्देनरागप्राप्त
भोजनविवक्षायांमुख्यार्थोबाधितःस्यात्।।किंचयदिपारणमंगंनस्यात्तदाप्रतिनिधिविधानंनोपपद्येत।तद्विधा
नंचब्रह्मदर्शीप्रस्तावेदेवलेनस्मर्यते।।संकटेविषमेप्राप्तेद्वादश्यांपारयेत्कथं।अद्भिस्तुपारणंकुर्यात्पुनर्भुक्तंनदोषकृ
दिति।।अतःपारणशब्दबलात्प्रतिनिधिबलाच्चपारणस्यांगत्वंद्रष्टव्यं।।अतएवादित्यपुराणे।।पारणांतंव्रतंज्ञेयं
व्रतांतेतद्धिभोजनं।।असमाप्तेव्रतेपूर्वैनैवकुर्याद्व्रतांतरमिति।।तच्चपारणमुपवासदिनात्परदिनेपूर्वाण्हेकर्त्त
व्यं।।उपवासेषुसर्वेषुपूर्वाण्हेपारणंभवेदितिदेवलस्मरणात्।।एवंसामान्यतःपूर्वाण्हेपारणप्राप्तौक्वचिदप
वादायतिथिभांतेचपारणमित्यभिधीयते।।शुद्धाधिकायांपूर्वेद्युरेवजयंतीयोगः उभयत्रापिजयंतीयोगइत्य राम
नयोःप्रसक्तयोः पूर्वेद्युरेवोपवासविधानात्परेद्युः केवलतिथेस्तिथिनक्षत्रयोर्वासद्भावात्तदंतेपारणविधिः।। ।। १०२

तथाशुद्धाधिकाविद्धाधिकयोरुभयोरपियदापरेद्युरेवजयंतीयोगस्तदापरतिथावुपवासविधानात्पारणदिने॰
तिथ्यभावेपिकदाचिन्नक्षत्रावशेषसंभवात्तदंतेपारणंविधीयते॥तिथेर्वानक्षत्रस्यवाशेषकालेपारणंब्रह्मवैव
र्त्तेप्रतिषिध्यते॥अष्टम्यामथरोहिण्यांनकुर्यात्पारणंक्वचित्॥हन्यात्पुराकृतंकर्मउपवासार्जितंफलं॥तिथिर्
ष्टगुणंहंतिनक्षत्रंचचतुर्गुणं॥तस्मात्प्रयत्नतःकुर्यात्तिथिभांतेचपारणमिति॥स्कंदपुराणेपि॥तिथिनक्षत्रनि
यमेतिथिभांतेचपारणं॥अतोन्यथापारणेतुव्रतभंगमवाप्नुयादिति॥तिथिभांतश्चद्विविधः।उभयांतएकत
रांतश्चेति॥दिनद्वयेजयंतीयोगवत्यांशुद्धाधिकायांपरदिनेअष्टमीमुहूर्त्तत्रयंनातिक्रामतिरोहिणीतु
पूर्वेद्युर्निशीथाद्वांग्यदाकदाचित्समवृत्तातदनुसारेणपरेद्युःसमाप्येत॥तत्रयदिदिवैवसमाप्येततदामति
क्रमेणैवपारणंकुर्यात्॥उभयांतस्यमुख्यत्वात्।यदिरात्रौसमाप्तिस्तदातत्समाप्तिर्नप्रतीक्षणीया॥रात्रि॰
पारणस्यनिषिद्धत्वात्॥तथाचब्रह्मवैवर्त्ते॥सर्वेष्वेवोपवासेषुदिवापारणमिष्यते॥अन्यथापुण्यहा
निःस्याद्दृतेधारणपारणमिति॥अन्यतिथ्यागमोरात्रौतामसस्तैजसोदिवा॥तामसेपारणंकुर्वंस्ताम

 सींगतिमश्नुतइति॥ दिवापारणंकुर्वन्नपिनाष्टमीवेलायांकुर्यात्॥ एकतरांतस्याप्यभावात्।। अष्टमीमतिवाह्य
 रोहिण्यांवर्तमानायामपिपारणंकुर्यात्॥ अतएवनारदीये॥ तिथिनक्षत्रसंयोगउपवासोयदाभवेत्॥ पारणंतु न
कर्तव्यंयावन्नैकस्यसंक्षयः॥ सांयोगिकेव्रतप्राप्ते यत्रैकोपिवियुज्यते॥ तत्रैवपारणंकुर्यादेवंवेदविदोविदुरिति
॥ पूर्वेद्युरेवनिशीथेजयंतीयोगवत्यांविद्धाधिकायांपारणदिनेतिथिभांतेबहुधासंभाव्यते। अहन्युभयांतएकत
रांतोवा॥ रात्रावेकतरांतउभयांतोवेति॥ तेषुचतुर्षुभेदेषुनिर्णयःस्मर्यते॥ तिथ्यृक्षयोर्यदाछेदोनक्षत्रांतमथापि
वा॥ अर्द्धरात्रेपिवाकुर्यात्पारणंचपरेहनीति॥ दिवसेयद्युभयांतस्तदापारणमितिमुख्यःकल्पः॥ नक्षत्रांत मित्यने
नैकतरांतत्वंविवक्षितं॥ सोयमनुकल्पः॥ यदिरात्रौनिशीथेउभयांतएकतरांतोवाभवति॥ तदादिवसेमुख्यानु
कल्पयोरुभयोरप्यसंभवाद्रात्रौचपारणस्यनिषिद्धत्वादर्थादुपवासप्राप्तौपारणस्यप्रतिप्रसवः क्रियते॥ अर्द्ध
रात्रेपिवाकुर्यादिति॥ ननुपारणेभ्यंतस्यप्रतीक्षणीयत्वेपिरोहिण्यंतोनप्रतीक्षणीयः॥ याःकाश्चित्तिथयःप्रोक्ताः
पुण्यनक्षत्रसंयुताः॥ ऋक्षांतेपारणंकुर्याद्विनाश्रवणरोहिणीमितिस्मरणात्॥ मैवं॥ नक्षत्रंतुचतुर्गुणमितिप्रसवा

CC-0. In Public Domain. Digitization by eGangotri

यस्योदात्तनत्वात्॥ तस्माद्धि नाश्रवणरोहिणीमिति वचनं केवलनक्षत्रोपवासविषयं।पूर्वोक्तानुकल्पविषयं वेत्य
वगंतव्यं॥अशक्तस्तु तिथिनक्षत्रयोरनुवर्तमानयोरपि प्रातर्देवं संपूज्य क्रियमाणं पारणं न दुष्यति।।तिथ्यंते वोत्सवां
ते वा व्रती कुर्वीत पारणमिति स्मरणात्॥ ॥इति जयंती निर्णयः॥ ॥अथ नवमी निर्णीयते॥ ॥सा च विधिनिषे
धरूपाभ्यामन्वयव्यतिरेकाभ्यां पूर्वविद्धैव ग्राह्या॥ तद्विधिश्च युग्मादि शास्त्रे वसुरंध्रयोरिति पठ्यते॥ पद्मपुराणेपि
॥अष्टम्या नवमी विद्धा नवम्या चाष्टमीयुता॥ अर्द्धनारीश्वरप्रायाउमामाहेश्वरी तिथिः॥ भविष्यत्पुराणे द्वादशीक
ल्पेपि।।नवम्या सह कार्या स्यादष्टमी नवमी तथेति॥निषेधस्तु पद्मपुराणेभिहितः।न कार्या नवमी तात दशम्यां तु
कदाचनेति॥ सेयं नवमी भविष्यत्पुराणोक्तदुर्गाव्रतादौ द्रष्टव्या।। ननु कृष्णनवम्याः पूर्वविद्धत्वेपि शुक्लनवमी प
रविद्धास्तु॥ शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविरिति वचनात्॥ मैवं॥ पूर्वोक्तेषु वचनेषु दशमीविद्धायाः सा
मान्निषेधात्॥ ननु तस्य निषेधस्य सामान्यरूपत्वात् कृष्णपक्षे संकोचोस्त्विति चेत्॥ न संकोचहेतोर्भवदुदाहृ
तस्यापि सामान्यरूपत्वात् पक्षयोरुभयोरपि पूर्वविद्धैव ग्राह्या।। रामनवमी तु चैत्रशुद्धा नवमी पुनर्वसुयुता य

CC-0. In Public Domain. Digitization by eGangotri

का·मा· दि॥ सैवमध्यान्हयोगेनमहापुण्यतमा भवेत्॥ नवमीचाष्टमी —— विद्धात्याज्या विष्णुपरायणैः॥ उपोषणंनव
१०४ म्यांवैदशम्यांपारणंभवेदिति वचनादष्टमीविद्धासनक्षत्रापिनोपोष्या॥ ॥इतिनवमीनिर्णयः॥ ॥अथदश
मीनिर्णीयते॥ ॥नस्यांचतिथ्यंतरवद्धेयोपादेयविभागोनास्ति॥ तिथ्यंतरेतु काचित्पूर्वविद्धाग्राह्या॥ काचिदुत्त
रविद्धा॥ नतुतथादशम्यांकिंचिन्नियामकमस्ति॥ एतदेवाभिप्रेत्यांगिराआह॥ संपूर्णादशमीग्राह्यापरयापूर्वयाथ
वा॥ युक्तानदूषितायस्मात्तिथिः सार्वतोमुखीति॥ यथासंपूर्णादोषरहितातथाविद्धापि॥ प्रतिपत्संमुखीकार्यैत्या
दौतिथेर्मुखंपूज्यमुक्तं॥ दशम्यास्तमूलाग्रयोर्द्वयोरपिमुखत्वात्पूज्यत्वमुभयत्रसमानं॥ एवंस्थितेसंस्त्रेदंचिंत्य
ते॥ किंपुरुषेच्छयापूर्वोत्तरविद्धयोरन्यतराग्राह्या॥ किंवानियामकंशास्त्रमस्तीति॥ तत्रनतावच्छास्त्रंकिंचित्पश्यामः
॥प्रस्तुतसर्वतोमुखत्वकथनात्पूर्वोत्तरविद्धयो रुभयोःसमबलत्वंशास्त्रेणप्रतीयते॥ अतोव्रीहिभिर्यजेत य
वैर्वेत्यादिवदैच्छिकोविकल्पोवगंतव्यः॥ नचाष्टदोषग्रस्तत्वाद्विकल्पोनयुक्तइतिशंकनीयं॥ गत्यंतराभावेनदोष राम
ग्रस्तस्याप्यवश्याश्रयणीयत्वात्॥ तदुक्तमाचार्यैः॥ एवमेषोष्टदोषोपियद्व्रीहियववाक्ययोः॥ विकल्पआश्रितस्तत्र १०४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गतिरन्या न विद्यत इति ॥ तस्माद्दैच्छिको विकल्प इति प्राप्ते ब्रूमः ॥ अस्त्यत्र वचनं व्यवस्थापकं ॥ तथा च मार्कंडेयः ॥
शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः ॥ कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविरिति ॥ नन्वनेन वचनेन पक्षभे
देन विकल्प आश्रितः ॥ तथा सति दोषाष्टकस्य तादवस्थ्याद्दैच्छिकविकल्प एव कुतो न स्वीक्रियत इति चेत् ॥ मैवं ॥ सं
ति व्यवस्थापके शास्त्रे पुरुषेच्छाया अप्रसरात् ॥ अत एव स्मर्यते ॥ उदासीने तु शास्त्रार्थे पुरुषेच्छा नियामिकेति ॥ ननु
पक्षभेदेन व्यवस्थानुपपन्ना स्कंदपुराणे पूर्वविद्धाया एव ग्राह्यत्वाभिधानात् ॥ दशमी चैव कर्त्तव्या सदुर्गा द्विजसत्
तमेति ॥ सदुर्गा नवमीमिश्रा ॥ मैवं ॥ पक्षद्वये पूर्वविद्धास्वीकारे पूर्वयापरया च वेति ॥ परविद्धाविधानस्य निरवकाश
त्वप्रसंगात् ॥ नवमीमिश्रत्ववचनं तु कृष्णपक्षे चरितार्थं ॥ ननु परविद्धानिषेधो ब्रह्मवैवर्त्ते पठ्यते ॥ प्रतिपत्सं च मी
भूता सावित्री वटपूर्णिमा ॥ नवमी दशमी चैव नोपोष्या परसंयुता इति ॥ कूर्मपुराणे ॥ नंदाविद्धा तु या पूर्णा द्वादशी
मकरे सिता ॥ भृगुणा नष्टचंद्रा च एता वै निष्फलाः स्मृताः ॥ अत्रैकादश्या नंदात्वात् दशम्याश्च पूर्णात्वादेकाद
शीविद्धा दशमी निष्फलेति गम्यते ॥ बाढं ॥ अयमपि निषेधः पूर्वोत्तरन्यायेन कृष्णपक्षविषयतया योजनीयः ॥ तस्मा

CC-0. In Public Domain. Digitization by eGangotri

 तत्रोत्तरविद्धयोर्दशम्योः पक्षभेदेन व्यवस्था द्रष्टव्या॥ ॥इति दशमीनिर्णयः॥ ॥अथैकादशीनिर्णीयते॥ ॥
 तत्रैकादश्यामुपवासोदानादिकं चोभयं विहितं॥उपवासो जयंतीवन्नित्यकाम्यरूपः॥द्वैविध्यं च तस्य द्विविध
प्रमाणबलादवसीयते॥उपवासविधिवाक्येषु नित्यशब्द सदाशब्दादीनां नित्यत्वसाधकानां स्मरणान्नित्यत्वसि
द्धिः॥तानि च साधकानि संग्रहकारेण संगृहीतानि॥नित्यं सदा यावदायुर्न कदाचिदतिक्रमेत्॥इत्युक्त्वातिक्रमे
दोषश्रुतेस्त्यागचोदनात्॥फलाश्रुतेर्वीप्सया च तन्नित्यमिति कीर्तितमिति॥अत्र च नित्यशब्दादीन्यष्टौ नि
त्यत्वसाधकानि॥नित्यशब्दउदाहृतो गारुडपुराणे॥उपोष्यैकादशी नित्यं पक्षयोरुभयोरपीति॥सदाशब्द
उक्तः॥सनत्कुमारसंहितायां॥एकादशी सदोपोष्या पक्षयोः शुक्लकृष्णयोरिति॥यावदायुःशब्दउक्तो विष्णु
रहस्ये॥द्वादशी न प्रमोक्तव्या यावदायुः सुवृत्तिभिरिति॥आग्नेयपुराणेपि॥उपोष्यैकादशी राजन्यावदायुः
सुवृत्तिभिरिति।अतिक्रमनिषेधः कण्वेन दर्शितः॥एकादश्यामुपवसेन्न कदाचिदतिक्रमेदिति॥विष्णुरपि
॥एकादश्यां न भुंजीत कदाचिदपि मानव इति॥अकरणे दोषमाह सनत्कुमारः॥नकरोति यदा मूढ एकाद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्यामुपोषणं।सनरोनरकंयातिरौरवंतमसावृतं॥एकादश्यां मुनिश्रेष्ठ यो भुंक्ते मूढचेतनः।प्रतिमासंसभुंक्तेतु
किल्बिषंश्वादिविट्समं॥निःकृतिर्मद्यपस्योक्ता धर्मशास्त्रेमनीषिभिः।एकादश्यन्नकामस्यनिष्कृतिःक्वापिनोदिता
॥मद्यपानान्मुनिश्रेष्ठ पातैवनरकंव्रजेत्॥एकादश्यन्नकामस्तु पितृभिः सहमज्जतीति॥नारदीये।यानिकानि
चपापानिब्रह्महत्यासमानिच॥अन्नमाश्रित्यतिष्ठंति संप्राप्तेहरिवासरे॥तानिपापान्युपाश्नाति भुंजानोहरिवा
सरइति॥स्कांदे॥मातृहापितृहावापि भ्रातृहागुरुहातथा॥एकादश्यांतु यो भुंक्ते पक्षयोरुभयोरपि।अकरण
इवासमापनेपि दोषउक्तो विष्णुरहस्ये॥समादाय विधानेन द्वादशीव्रतमुत्तमं॥तस्यभंगंनरःकृत्वारौरवंनर
कंव्रजेत्॥परिगृह्यव्रतंसम्यगेकादश्यादिकंनरः॥नसमापयतेतस्यगतिःपापीयसी भवेदिति।नारदीयेपि।
द्वादशीव्रतमादायव्रतभंगंकरोतियः॥द्वादशाब्दंव्रतंचीर्णंनिष्फलंतस्यजायतइति।अत्यागश्चोदनादर्शि
ताविष्णुरहस्ये॥परमापद्मापन्नोहर्षेवासमुपस्थिते।सूतकेमृतकेचैवनत्यजेद्द्वादशीव्रतमिति॥फलाश्र
वणंचकेषुचिद्वचनेषुविस्पष्टं॥तत्रकात्यायनः॥एकादश्यांनभुंजीतपक्षयोरुभयोरपीति।स्कांदे।उपोष्यैका

CC-0. In Public Domain. Digitization by eGangotri

दशी सम्यक् पक्षयोरुभयोरपीति ॥ वीप्साकूर्मपुराणेपि ॥ वदंतीह पुराणानि भूयोभूयो वरानने ॥ न भो
क्तव्यं न भोक्तव्यं संप्राप्ते हरिवासर इति ॥ वीप्सामाह सनत्कुमारः ॥ पक्षे पक्षे च कर्त्तव्यमेकादश्या मुपोषणमि
ति ॥ नारदोपि ॥ नित्यं भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः ॥ पक्षे पक्षे च कर्त्तव्यमेकादश्यामुपोषणमिति ॥ तदे
वं नित्यशब्दादिभिरुपवासस्य नित्यत्वं सिद्धं ॥ काम्यत्वं च सायुज्यादिफलश्रवणादवगम्यते ॥ तदुक्तं विष्णुरह
स्ये ॥ यदीच्छेद्विष्णुसायुज्यं सत्वात् संपदमात्मनः । एकादश्यां न भुंजीत पक्षयोरुभयोरपीति ॥ कूर्मपुराणे ॥ य
दीच्छेद्विष्णुसायुज्यं श्रियं संततिमात्मनः ॥ एकादश्यां न भुंजीत पक्षयोरुभयोरपीति ॥ कात्यायनः ॥ संसारसागरो
त्तारमिच्छन्विष्णुपरायणः । ऐश्वर्यं संततिं स्वर्गं मुक्तिं वा यद्यदिच्छति ॥ एकादश्यां न भुंजीत पक्षयोरुभयोरपी
ति ॥ स्कंदपुराणेपि ॥ यदीच्छेद्विपुलान्भोगान्मुक्तिं चात्यंतदुर्लभां ॥ एकादश्यामुपवसेत्पक्षयोरुभयोरपीति । ना
रदीयेपि । एकादशीसमं किंचित्पापत्राणं न विद्यते । स्वर्गमोक्षप्रदा ह्येषा राज्यपुत्रप्रदायिनी ॥ सुकलत्रप्रदा ह्येषा
शरीरारोग्यदायिनीति । तदेवं फलश्रवणात्काम्यत्वं सिद्धं । ननु काम्यत्वमनित्यत्वं असति कामे परित्यक्तुं शक्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वात्। तथासत्येकस्यकर्मणोनित्यत्वकाम्यत्वाभ्यांद्वैरूप्यांगीकारेनित्यानित्यसंयोगविरोधःप्राप्नोति। नायंदोषः। खा
दिरवत्प्रमाणद्वयेनद्वैरूप्योपपत्तेः। तथाहि। खादिरोयूपोभवतीतिक्रतौनित्यःखादिरोविहितः॥ खादिरंवीर्यकामस्ययू
पंकुर्वीतेतितस्मिन्नेवक्रतौकाम्यत्वेन नाःनित्यःखादिरोविहितः। तत्रयथाप्रमाणद्वयसंबंधादेकस्यापिखादिरस्यद्वै
रूप्यमंगीकृतंतद्वदत्रापिद्विविधप्रमाणसद्भावादुपवासस्यद्वैरूप्यंकिन्नस्यात्॥ ननुविषमोदृष्टांतः। नित्यःखादिरःक्रत्वर्थः
काम्यस्तुपुरुषार्थः। उपवासस्तुनित्योपिपुरुषार्थएव। तस्यखादिरवत्क्रत्वंगबोधकप्रमाणाभावात्॥ बाढं॥
अस्त्वेवंवैषम्यंप्रयोजकंनुद्वैरूप्येप्रमाणद्वयमस्त्येव। सूत्रकारेणप्रमाणद्वयस्यैवद्वैरूप्यसाधकत्वोपन्यासात्
॥ तथाचसूत्रं। एकस्यतूभयत्वेसंयोगपृथक्त्वमिति। अतःकेवलपुरुषार्थस्याप्युपवासस्यद्वैरूप्यमविरुद्धं। य
दिबुध्यादोहस्यसदृशोदृष्टांतोपेक्षितस्तर्ह्यग्निहोत्रादिर्दृष्टांतोस्तु॥ नहिअग्निहोत्रंक्रत्वर्थं। तस्यस्वयमेवक्रतु
त्वात्॥ तस्यचनित्यत्वकाम्यत्वेवाक्यद्वयादवगम्येते। यावज्जीवमग्निहोत्रंजुहोतीतिनित्यत्वावगमकंवाक्यं॥
अग्निहोत्रंजुहुयात्स्वर्गकामइतिचकाम्यत्वावगमकं। तस्यचक्रत्वर्थत्वाभावेनकेवलंपुरुषार्थत्वेव॥ अतोग्नि

CC-0. In Public Domain. Digitization by eGangotri

होत्रे नित्यत्वं काम्यत्वं चेति द्वैरूप्यमस्ति॥ तच्च शब्दांतराभ्यासादिकर्मभेदहेत्वभावे नैकस्यैव कर्मणः प्रयोग
भेदादवगंतव्यं॥ प्रयोगभेदश्च यावज्जीवाधिकरणे निर्णीतः॥ तस्य चाधिकरणस्य संग्राहकावेतौ श्लोकौ भ
वतः॥ यावज्जीवं जुहोतीति धर्मः कर्मणि पूंसि वा॥ कालत्वात्कर्मधर्मोतः काम्य एकः प्रयुज्यतां। न कालो जीवनं
तेन निमित्तं प्रविभागतः॥ काम्यप्रयोगो भिन्नः स्याद्यावज्जीवप्रयोगत इति॥ अयमर्थः। अग्निहोत्रं जुहुयात्स्वर्ग
काम इति काम्याग्निहोत्रं श्रूयते॥ तथा वाक्यांतरं पठ्यते। यावज्जीवमग्निहोत्रं जुहोतीति। तत्र संशयः। किं याव
ज्जीवमित्यनेनाधिकारांतरं बोध्यते॥ किं वा काम्याग्निहोत्रे गुणविधिरिति। तदर्थमर्थांतरचिंता॥ किं वा यावज्जी
वमित्यस्यार्थः कर्मधर्मः उत पुरुषधर्म इति॥ यावज्जीवशब्देन पुरुषायुषपरिमितः कालोभिधीयते। काम्येन चा
ग्निहोत्रेण कालविशेष आकांक्षितः। तस्य च कालस्यानेन समर्पणादयं कर्मधर्मः। तस्माद्गुणविधिः। तथा चाग्निहो
त्रस्य काम्यस्य प्रयोग एक एव न त्वन्यो नित्य इति प्राप्ते ब्रूमः। यावज्जीवशब्दो न कालस्य वाचकः किंतु लक्षकः। वा
च्यार्थस्तु कृत्स्नजीवनं। तच्च न कर्मधर्मत्वेन विधातुं शक्यं पुरुषधर्मत्वादिति। प्राणधारणमभिधत्ते। न तु कालं।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राणधारणंच पुरुषधर्मः कालस्यतदसंभवात्तेनस्वर्गकामेनेवजीवनमपिकिंचिन्निमित्तं॥ तस्मादधिकारांनर
चोदना। तथासतिजीवननिमित्तोनित्यःप्रयोगः। कामनिमित्तः। कादाचित्कःप्रयोगश्चपरस्परंभिद्यतइतिसिद्धं
तः। तेनाग्निहोत्रन्यायेनप्रकृतस्याप्युपवासस्यनिमित्तभेदेननित्यप्रयोगः काम्यप्रयोगश्चास्तु॥ नन्वेकस्यक
र्मणः। कालभेदेनकर्तृभेदेनवाविनाद्वौप्रयोगौनभवतः॥ नचात्रकालभेदःसंभवति॥ नित्यकाम्ययोरुपवासयो
रुभयोरप्येकादश्यामेवविधानान्नाप्यत्रकर्तृभेदोस्ति। यद्यपिकाम्यंपरित्यज्यकेवलंनित्यमनुष्ठातुंशक्यं त
थापिकाम्यमनुतिष्ठतामुनानित्यस्यपरित्यक्तुंअशक्यत्वात्। अतःकर्त्रैक्यात्कालैक्याच्चनित्यकामरूपौद्वौप्रयो
गौनघटेते। नायंदोषः॥ विविदिषाधिकरणन्यायेनसकृदेवानुष्ठितेप्रयोगद्वयसिद्धेः। तस्यचाधिकरणस्यसंग्रा
हकावेतौश्लोकौभवतः॥ विद्यार्थमाश्रमार्थं चद्विःप्रयोगोथवासकृत्॥ प्रयोजनविभेदेनप्रयोगोपिविभिद्यते॥
श्राद्धार्थभुक्तयात्तृप्तिस्याद्दिद्यार्थेनाश्रमस्तथा। अनित्यनित्यसंयोगउक्तिभ्यांखादिरेमतइति। अयमर्थः। तमेतं
वेदानुवचनेनब्राह्मणाविविदिषंति यज्ञेनदानेनतपसानाशकेनेतिश्रुतिस्मृतिषुप्रसिद्धं। श्रुतिवाक्येपरमात्मवि

का·मा· द्यायांयज्ञादयोविहिताः॥गृहस्थाद्याश्रमधर्मत्वंतुयज्ञादीनांसर्वश्रुतिस्मृतिषुप्रसिद्धं।तत्रसंशयः।किंयज्ञादीनां
१०८ द्विःप्रयोगउतसकृदितितत्रप्रयोजनभेदात्प्रयोगभेदइतिपूर्वःपक्षः॥निमंत्रितेनब्राह्मणेनक्रियमाणस्यभोजनस्य
द्वेप्रयोजने।अन्यकर्तृकश्राद्धनिष्पत्तिः।स्वतृप्तिश्च।नचद्विर्भुज्यते॥तद्वद्ब्रह्मविद्यार्थमनुष्ठितेनयज्ञादिकर्मणाप्र
योजनद्वयंसिद्ध्यति।नचनित्यानित्यसंयोगविरोधः।खादिरवद्वाक्यद्वयेनतच्चपूर्वमुपपादितं॥तस्मात्सकृदेवप्र
योगइति।एवमत्रापिसकृदेवोपवासंकुर्वतःकाम्यप्रयोगोनित्यप्रयोगश्चेत्युभयंसिद्ध्यति।ननुसकृदनुष्ठानेनानेकार्थसि
द्धिर्द्वेधाभवति।तंत्रेणवाप्रसंगेनवा।तद्यथादर्शपूर्णमासयोःषण्णांप्रधानयागानांमध्येत्रयाणांत्रयाणांसकृत्सकृदनुष्ठितेनप्र
याजाद्यंगेनोपकारःसिद्ध्यति।तदिदंतंत्रं।पश्वर्थमनुष्ठितेनप्रयाजादिनापशुतंत्रमध्यपातिनःपशुपुरोडाशस्याप्युपका
रःसिद्ध्यति।सोयंप्रसंगः।एवंसतिप्रकृतेपितंत्रप्रसंगयोःकतरस्योपादानमितिचेत्।प्रसंगस्येतिब्रूमः।काम्यप्रयोगेणैवनित्यप्र
योगस्यापिसिद्धत्वात्।तथाचस्मृतिः।काम्येपिनित्यसिद्धिःस्यात्प्रसंगेनोभयात्मकइति।तदेवमेकादश्युपवासस्यनित्यत्वकाम्यत्व रामः
लक्षणद्वैरूप्यविरोधाभावात्द्वैरूप्यमभ्युपेयमितिस्थितम्॥अत्रोपवासांगतिथिनिर्णयस्यवेधाधीनत्वात्प्रथमंदशमी १०८

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेधो निरूप्यते। स च वेधस्त्रिविधः। अरुणोदयवेधः। सूर्योदयवेधः पंचदश नाडीवेधश्चेति। तत्रारुणोदयवेधो
भविष्यत्पुराणे दर्शितः। अरुणोदयकाले तु दशमी यदि दृश्यते। सा विद्धैकादशी तत्र पापमूलमुपोषणमिति। अरु
णोदयवेलायां दशागंधो भवेद्यदि। दुष्टं तत्तु प्रयत्नेन वर्जनीयं नराधिपेति॥ गारुडपुराणेपि। दशमीवेधसंयुक्तो
यदि स्यादरुणोदयः॥ नैवोपोष्यं वैष्णवेन तद्दिनैकादशीव्रतमिति॥ अरुणोदयस्य प्रमाणं स्कंदनारदाभ्यामुक्तं।
उदयात्प्राक्चतस्रस्तु नाडिका अरुणोदय इति॥ तस्मिन्नरुणोदयवेधा बहुविधास्ते प्रश्नोत्तराभ्यां ब्रह्मवैवर्तेद
र्शिताः। कीदृशस्तु भवेद्वेधो योगो वि‍प्रेंद्र कीदृशः। योगवेधो ममाचक्ष्व याभ्यां दुष्टमुपोषणं। चतस्रो घटिकाः प्रा
तररुणोदयनिश्चयः॥ चतुष्टयविभागोत्र वेधादीनां किलोदितः। अरुणोदयवेधः स्यात्सार्द्धं तु घटिकात्रयं। अतिवे
धो द्विघटिकः प्रभासंदर्शनाद्रवेः। महावेधोपि तत्रैव दृश्यतेर्को न दृश्यते॥ तुरीयस्तत्र विहितो योगः सूर्योदये सती
ति। अयमर्थः॥ वेधातिवेधमहावेधयोगवेधाश्चत्वार उपवासस्य दूषकाः॥ तत्र रवेः प्रभासंदर्शनात्सार्द्धं घ
टिकात्रयमेकादश्या व्याप्तं ततः प्राचीने घटिकार्द्धे अरुणोदयसंबंधिनी दशमी स ह्यवेवेध इत्युच्यते। यदा सूर्यस्य

Sanskrit University, Varanasi. Collection... Karnataka

CC-0. In Public Domain. Digitization by eGangotri

का·मा· दर्शनात्पूर्वं घटिकाद्वयमुपरितनमेकादशी व्याप्तं पूर्वं तु घटिकाद्वयं दशमी व्याप्तं तदानीमतिवेध इत्युच्यते॥
१०९ यदा सूर्यस्य दर्शनादर्शनसंदेहकालमेकादशी प्राप्नोति॥ ततः प्राक्कृत्स्नोप्यरुणोदयकालो दशमीव्याप्तस्तदा
महावेधः॥ यदा सूर्योदये स्पष्टे सति पश्चादेकादशी प्रवृत्ता ततः॥ प्राच्यामुदयवेलायां दशमी विद्यते तदा योगः श
ब्देनाभिधेयो दोषो भवति॥ स च वेधाद्यपेक्षया तुरीयो भवतीति॥ नन्वरुणोदयात्पूर्वमर्द्धरात्रात्परतोपि दशमी क
ला विद्यते तदा नोपवासः कर्त्तव्यः॥ तदभावे तूपवासः कर्त्तव्यः। तथा च स्मृतिः। अर्द्धरात्रात्परा यत्र एकादश्युपल
भ्यते॥ तत्रोपवासः कर्त्तव्यो न तु चैव दशमी कलेति। अतो यथानिर्दिष्टेभ्यो न्योपि कश्चिद्वेधोस्तीति चेत्। मैवं॥ अर्द्धरा
त्रे वेधोपि यदा वर्ज्यस्तदा किमु वक्तव्यमरुणोदयवेध इति वक्तुमर्द्धरात्रवेध उपन्यस्तो न तु वेधाभिप्रायेण॥ तदेवं ब्रह्म
वैवर्त्ते शौनकेन स्पष्टीकृतं॥ अर्द्धरात्रे तु केषांचिद्दशम्या वेध इष्यते॥ अरुणोदयवेलायां नावकाशो विचारणे॥
कपालवेध इत्याहुराचार्या ये हरिप्रियाः॥ न तन्मम मतं यस्मात्त्रियामा रात्रिरिष्यत इति। य एते वेधातिवेधमहा राम
वेधयोगाः पूर्वमभिहितास्तेषु त्रयोरुणोदयवेधाश्चतुर्थ उदयवेधः॥ तच्चोदयवेधं कण्वो प्याह। उदयोपरिविद्धा। १०९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुदशम्यैकादशीयदा॥दानवेभ्यः प्रीणनार्थं दत्तवान्पाकशासनइति॥स्मृत्यंतरेपि। दशम्याः प्रांतमादायपदो
देतिदिवाकरः॥तेनस्पृष्टंहरेर्दिनंदत्तंजंभासुरायत्विति।पंचदशनाडीवेधस्तुस्कंदपुराणेदर्शितः॥नागोद्वाद
शनाडीभिर्दिक्पंचदशभिस्तथा॥भूतोष्टादशनाडीभिर्दूषयत्युत्तरांतिथिमिति॥तदेवंवेधत्रयंनिरूपितं॥तत्रपंच
दशनाडीवेधस्यवेधांतरस्यचविषयव्यवस्थानिगमेदर्शिता॥सर्वप्रकारवेधोयमुपवासस्यदूषकः॥सार्द्धसप्त
मुहूर्त्तस्तुवेधोयं बाधतेव्रतमिति॥सर्वप्रकारइत्यत्रप्रकारशब्देनकलाकाष्ठादयोपिवेधातिवेधादयोवागृह्यंते
॥नात्रतिथ्यंतरवत्त्रिमुहूर्त्तत्वंवेधेपेक्षितं॥किंतुलवकलाद्यादिकिमपिपर्याप्तं॥तदुक्तंनारदीये॥लववेधेपि
विप्रेंद्रदशम्येकादशींत्यजेत्॥सुरायाबिंदुना स्पृष्टंगंगांभइवनिर्मलमिति॥स्कंदपुराणेपि॥कलाकाष्ठादिग
त्यैवदृश्यतेदशमीविभो॥एकादश्यांनकर्त्तव्यंव्रतंराजन्कदाचनेति॥स्मृत्यंतरेपि। कलार्द्धेनापिविद्धास्याद्द
शम्यैकादशीयदि॥तदाप्येकादशींहित्वाद्वादशींसमुपोषयेदिति॥सोयंकलाकाष्ठादिवेधोऽरुणोदयेसूर्योद
येचसमानः॥तत्रारुणोदयवेधोवैष्णवविषयः॥तच्चगारुडपुराणेविस्पष्टमवगम्यते॥दशमीशेषसंयुक्तो

CC-0. In Public Domain. Digitization by eGangotri

यदि स्यादरुणोदयः॥ नैवोपोष्यं वैष्णवेन तद्दिने कादशीव्रतमिति॥ वैखानसपंचरात्रादिवैष्णवागमोक्त दी
क्षाप्राप्तो वैष्णवः॥ अतएव स्कंदपुराणे॥ वैष्णवस्वरूपमभिहितं॥ परमापदमापन्नो हर्षे वा समुपस्थिते॥
नैकादशीं त्यजेद्यस्तु यस्य दीक्षास्ति वैष्णवी॥ समात्मा सर्वजीवेषु निजाचारादविप्लुतः॥ विष्णर्पिताखिला
चारः सहि वैष्णव उच्यत इति॥ विष्णुपुराणेपि॥ नचलति निजवर्णधर्मतो यः सममतिरात्मसुहृद्विपक्षपक्षे॥
नहरति न च हंति किंचिदुच्चैः सितमनसं तमवेहि विष्णुभक्तमिति॥ यथोक्तगुणसंपन्नो वैष्णवदीक्षां प्राप्तो य
स्तं प्रति तिथिरेवं निर्णेतव्या॥ एकादशी द्विधा॥ अरुणोदयवेधवती॥ शुद्धा चेति॥ तत्र वेधवती सर्वथा त्याज्या
॥ तद्धि नैकादशीव्रतमिति गारुडपुराणे सामान्येन प्रतिषेधात्॥ विशेषस्तु संपृक्तादिभेदेन प्रतिषेधो द्रष्टव्यः॥
य एते वेधातिवेधमहावेधयोगाख्या दोषाः पूर्वमुक्ताः तेषु सत्स्वेकादशी संपृक्त संदिग्ध संयुक्त संकीर्ण नाम
भिर्व्यवह्रियते॥ अरुणोदयस्य प्रथमघटिकायां दशमीसद्भावो वेध इत्युक्तः॥ स च द्विविधः॥ घटिकाप्रारंभे
कृत्स्नघटिकायां च दशमीवृत्तिभेदात्॥ तत्र प्रारंभमात्रे दशमी उक्ते कादशी संपृक्तेत्युच्यते॥ कृत्स्नघटिका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृत्ति दशमीयुक्तैकादशीसंदिग्धा॥अरुणोदयप्रथममुहूर्त्ते दशमीव्याप्तिरतिवेधः॥तदुपेतैकादशी संयुक्ते॰
त्युच्यते॥सूर्यमंडलदर्शनसंदेहवेलायां दशमीसङ्गाबोमहावेधस्तद्युक्तैकादशीसंकीर्णेत्युच्यते॥ताएताः
संपृक्ता दयश्चतस्रोपित्याज्याः॥ तथा च गोभिलः॥ अरुणोदयवेलायां दशमी यदि संगता॥संपृक्तैकादशीं तां
तु मोहिन्यै दत्तवान्प्रभुरिति॥गारुडपुराणे॥उदयात्प्राक्त्रिघटिकाव्यापिन्येकादशी यदा॥संदिग्धैकादशी ना॰
म वर्ज्यैयं धर्मकांक्षिभिः॥उदया — त्प्राक्मुहूर्त्तेन व्यापिन्येकादशी यदा॥संयुक्तैकादशी नाम वर्ज्ये हर्म रद्द
ये॥आदित्योदयवेलायां आरभ्य षष्टी नाडिका॥संकीर्णैकादशी नाम त्याज्या धर्मफलेप्सुभिः॥पुत्रपौत्रप्रवृध्य
र्थं द्वादश्यामुपवासयेत्॥ तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणमिति॥यद्यपि पूर्वत्र वेधवाक्ये सार्द्धं तु घटिकात्रय
मित्युक्तं॥अत्र तु संदिग्धैकादशीवाक्ये त्रिघटिकेत्युक्तं॥तथापि नैतावता वैषम्येण विरोधः शंकनीयः॥ शास्त्र
द्वयस्यापि दशमीवेधत्यागपरत्वात्॥तदेवं सामान्यविशेषाभ्यां प्रतिषिद्धत्वादरुणोदयविद्धैकादशी वैष्णवेन प
रित्याज्या।यस्तु योगसंज्ञकश्चतुर्थो वेधस्तस्य त्याज्यत्वमर्थात्सिद्धं। अरुणोदयवेधोपि यदा त्यज्यते तदा किमु व

Sanskrit University, Balmeeki Campus, Kathmandu

क्तव्यंसूर्योदयवेधइति। वचनंतत्र कण्वप्रोक्तंपूर्वमेवोदाहृतं॥ यातुचतुर्विधवेधरहितासुद्धैकादशीसाद्विविधा आ

धिक्येनयुक्तानद्रहिता॥ आधिक्यंचत्रिविधं॥एकादश्याधिक्यंद्वादश्याधिक्यंउभयाधिक्यंचेति॥त्रिष्वप्येतेषुपक्षेष्वरु
णोदयमारभ्यप्रवृत्तांसुद्धामप्येकादशींपरित्यज्यपरेद्युरुपवासःकर्त्तव्यः॥ ॥तत्रैकादश्याधिक्येनारद आ
ह॥ संपूर्णैकादशीयत्रद्वादश्यांवृद्धिगामिनी॥द्वादश्यांलंघनंकार्यंत्रयोदश्यांतुपारणमिति। स्मृत्यंतरेपि।एकादशीयदापूर्णा
परतःपुनरेवसा।पुण्यंक्रतुशतस्योक्तंत्रयोदश्यांतुपारणमिति। विष्णुरहस्येपि।एकादशीकलाप्राप्तायेनद्वादश्युपोषिता
।तुल्यंक्रतुशतस्योक्तंत्रयोदश्यांतुपारणमिति॥ द्वादश्याधिक्येव्यासआह॥एकादशीयदालुप्तापरतोद्वादशीभवेत्।उपो
ष्याद्वादशीतत्रयदीच्छेत्परमांगतिमिति।उभयाधिक्येभृगुराह।संपूर्णैकादशीयत्रप्रभातेपुनरेवसा। तत्रोपोष्याद्वितीयातुपर
तोद्वादशीयदि।।नारदोपि॥ संपूर्णैकादशीयत्रप्रभातेपुनरेवसा॥ सर्वैरेवोत्तराकार्यापरतोद्वादशीयदीति॥ ॥स्मृ
त्यंतरेपि॥एकादशीभवेत्पूर्णापरतोद्वादशीयदि॥एकादशींपरित्यज्यद्वादशींसमुपोषयेदिति॥उभयाधिक्य
रहितायांतुशुद्धायांनकोपिसंदेहोस्ति॥इतिवैष्णवदीक्षायुक्तानामेकादशीनिर्णीता॥अथश्रौतस्मार्त्तपर्यवसि
CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तानां पंचरात्रादिदीक्षारहितानामेकादशी निर्णीयते॥ अरुणोदयवेधस्य वैष्णवविषयत्वे व्यवस्थिते सत्युदयेवे
धःस्मार्त्तानुष्ठायिविषयत्वेन परिशिष्यते॥ अतएव स्मर्यते। अतिवेधा महावेधा ये वेधास्तिथिषु स्मृताः॥ सर्वे व्य
वेधा विज्ञेया वेधः सूर्योदये मत इति॥ एवं च सूर्योदयवेधमपेक्ष्यैकादशी द्विधा भिद्यते॥ शुद्धा विद्धा चेति। तत्र शु
द्धायां पूर्ववच्चत्वारो भेदा भवंति॥ एकादश्याधिक्यं द्वादश्याधिक्यमुभयाधिक्यमनुभयाधिक्यं चेति। एवं वि
द्धायामपि चत्वारो भेदा उन्नेयाः॥ शुद्धास्वेकादश्याधिक्ये द्वयोस्तिथ्योरुपवासयोग्यतामाह वृद्धवशिष्ठः॥ सं
पूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ लुप्यते द्वादशी तस्मिन्नुपवासः कथं भवेत्॥ उपोष्ये द्वे तिथी तत्र विष्णुप्री
णनतत्परैरिति॥ उभयोरधिकारिभेदेन व्यवस्था स्कंदपुराणे दर्शिता॥ प्रथमेहनि संपूर्णा व्याप्याहोरात्रसंयुता॥
द्वादश्यां च तथा तात दृश्यते पुनरेव च॥ पूर्वा कार्या गृहस्थैस्तु यतिभिश्चोत्तरा विभो इति। एतच्च परे शुद्धद्वादश्यभा
वविषयं॥ तथा च स्मृत्यंतरे॥ पुनः प्रभातसमये घटिकैका यदा भवेत्॥ अत्रोपवासो विहितश्चतुर्थाश्रमवासिनां॥
विधवायाश्च तत्रैव परतो द्वादशी न चेदिति॥ गारुडपुराणेपि॥ पुनः प्रभातसमये घटिकैका यदा भवेत्॥ अत्रोप

का.मा. वासोविहितोवनस्थस्ययतेस्तथा॥विधवायास्तथैवपरतोद्वादशीनचेदिति॥पुराणांतरेपि॥एकादशीयदापू
११२ र्णापरतःपुनरेवसा॥पुण्यंक्रतुशतस्योक्तंत्रयोदश्यांतुपारणमिति॥एकादश्याधिक्यपक्षेगृहियत्योर्व्यवस्थाभि
हिता॥द्वादश्याधिक्येपूर्वेद्युरुपवासमाह नारदः॥ नचेदेकादशीविष्णौद्वादशीपरतःस्थिता॥उपोष्यैकादशीत
त्रयदीच्छेत्परमंपदमिति॥स्कांदेपि॥शुद्धायदासमाहीनासमक्षीणाधिकोत्तरा। एकादश्यामुपवसेन्नशुद्धांवै
ष्णवीमपीति॥ दशमीवेधरहिताशुद्धैकादशीपरेद्युरुदयादूर्ध्वंनास्ति किंतूदयेसमासातनोन्यूनावा॥ द्वयोरपिपक्ष
योर्द्वादशीपरेद्युरुदयेसमान्यूनाऽधिकावाभवति तत्रसर्वैरशुद्धैकादशीपोष्यानत्वविद्धांवैष्णवींद्वादशीमुपव
सेदित्यर्थः॥एवंचसतिप्रकृतेद्वादश्याधिक्येपिएकादशीसमन्यूनयोरन्यतरत्वात् प्रथमैवोपोष्ये त्युक्तंभव
ति॥ उभयाधिक्येपरेद्युरुपवासोगारुडपुराणेदर्शितः॥संपूर्णैकादशीयत्रप्रभातेपुनरेवसा॥तत्रोपोष्यापरापु
ण्यापरतोद्वादशीयदीति॥वाराहपुराणेपि॥एकादशीविष्णुनाचेद्द्वादशीपरतःस्थिता॥उपोष्याद्वादशीतत्रय राम.
दीच्छेत्परमंपदमिति॥ स्मृत्यंतरेपि॥संपूर्णैकादशीयत्रप्रभातेपुनरेवसा॥वैष्णवीचत्रयोदश्यांघटिकैकापि ११२

CC-0. In Public Domain. Digitization by eGangotri

दृश्यते॥ गृहस्थोपि परां कुर्यात्पूर्वान्नोपवसेत्तदा॥ पूर्णाप्येकादशी त्याज्या वर्द्धते द्विनयं यदीति॥ एवमेकैकस्या
धिक्ये द्वितीयाधिक्येपि निर्णयो दर्शितः॥ अनुभयाधिक्ये तु नास्ति संदेहः॥ इति शुद्धायां चत्वारो भेदा व्यव॰
स्थिताः॥ अथ विद्धायां चत्वारो भेदा व्यवस्थाप्यंते॥ तत्राप्येकादश्याधिक्ये पूर्ववद्गृहियत्योर्व्यवस्था द्रष्ट॰
व्या॥ तदाह मचेताः॥ एकादशी विवृद्धा चेच्छुक्ले कृष्णे विशेषतः॥ उत्तरां तु यतिः कुर्यात्पूर्वामुपवसेद्गृहीति॥ न
चैतद्वाक्यं शुद्धाधिक्ये चरितार्थमिति शंकनीयम्॥ बाधकाभावेन विद्धाधिक्येपि तद्वचनप्रवृत्तेर्निवारयितुमश॰
क्यत्वात्॥ द्वादश्याधिक्ये परेद्युरुपवासः॥ तदाह व्यासः॥ एकादशी यदा लुप्ता परतो द्वादशी भवेत्॥ उपोष्या द्वा
दशी तत्र यदीच्छेत्परमां गतिमिति लुप्ता आदौ दशमीमिश्रत्वात्परतो वृद्ध्यभावाच्च क्षयं गतेति यावत्॥ उभयाधि
क्येपि परेद्युरुपवासः॥ तदुक्तं भविष्यत्पुराणे॥ एकादशीं दशायुक्तां वर्द्धमाने विवर्जयेत्॥ क्षयमार्गस्थिते॰
सोमे कुर्वीत दशमीयुतामिति॥ उभयानाधिक्ये तु नैवास्ति संदेहः। कोट्यंतराभावात्॥ न च विद्धत्वादस्ति संदेह
इति वाच्यं। असति कोट्यंतरे विद्धाया अप्युपादेयत्वात्॥ तथा च विष्णुरहस्ये। एकादशी भवेत्काचिद्दशम्या दूषिता

CC-0. In Public Domain. Digitization by eGangotri

तिथिः॥ वृद्धिपक्षे भवेद्दोषः क्षयपक्षे तु पुण्यद इति॥ इति विद्धाभेदा व्यवस्थापिताः॥ अत्र शुद्धाविद्धयोरुभयोरप्ये
षनिर्णयसंग्रहः॥ एकादशीद्वादश्योरुभयोरपि वृद्धौ परेद्युरुपवासः द्वयोरप्यवृद्धौ पूर्वेद्युः एकादशीमात्रवृद्धौ शुद्धि
यत्योर्व्यवस्था। द्वादशीमात्रवृद्धौ शुद्धायां सर्वेषां पूर्वेद्युर्विद्धायां परेद्युरिति॥ तदेवं शास्त्रार्थव्यवस्थिते यानि यावंति शु
निवाक्यानि विधायकानि निषेधकानि वा तानि सर्वाणि यथोक्तनिर्णयाविरोधेन व्यवस्थापनीयानि तत्र व्यवस्थापन
प्रकारं दर्शयामः॥ स्कांदे॥ प्रतिपत्प्रभृतयः सर्वा उदयादोदयाद्रवेः॥ संपूर्णा इति विख्याता हरिवासरवर्जिता इति॥
हरिवासरे तु संपूर्णत्वं प्रकारांतरेणोक्तं॥ गारुडे॥ उदयात्प्राग्यदा विप्र मुहूर्त्तद्वयसंयुता। संपूर्णैकादशी ज्ञेया तत्रैवो
पवसेद्गृही ति॥ भविष्यत्पुराणेपि॥ आदित्योदयवेलायां प्राङ्मुहूर्त्तद्वयान्विता॥ एकादशी तु संपूर्णा विद्धान्याप॰
रिकल्पितेति॥ तदेतद्वचनद्वयमरुणोदयवेधोपजीवनेन प्रवृत्तत्वाद्वैष्णवविषयं॥ दशमीवेधनिंदकानि तु वचना
नि द्विविधान्युपलभ्यंते॥ कानिचिदरुणोदयानुवादेन प्रवृत्तानि कानिचित्तदननुवादेनेति॥ तथा भविष्ये॥ अरुणो
दयकाले च दशमी यदि दृश्यते॥ तत्रैकादशी कार्या धर्मकार्यार्थनाशनीति॥ कौत्सः॥ अरुणोदयवेलायां विद्धा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कश्चिदुपोषिता। तस्याः पुत्रशतं नष्टं तस्मात्तां परिवर्जयेत्॥ एतादृशानि सर्वाणि वैष्णवविषयाणि द्रष्टव्यानि॥ अ
रुणोदयानुवादमंतरेण दशमीविद्धानि दूषकानि वचनान्युपलभ्यंते॥ तद्यथा॥ नारदः॥ दशम्यनुगता यत्र तिथिरे
कादशी भवेत्॥ तत्रापत्यविनाशश्च परेत्य नरकं व्रजेदिति॥ ब्रह्मवैवर्त्तेपि। दशमीशेषसंयुक्तां यः करोति विमूढधीः
॥ एकादशीफलं तस्य न स्याद्द्वादशवार्षिकमिति॥ विष्णुरहस्ये॥ दशमीशेषसंयुक्तामुपोष्यैकादशीं किल॥ संवत्सर
कृतेनेह नरो धर्मेण मुच्यत इति॥ ईदृशानि सर्वाणि अरुणोदयवेधद्वयसामान्येन प्रवृत्तत्वाद्वैष्णवस्मार्त्तोभयवि
षयाणि॥ तत्र वैष्णवविषये निरंकुशं प्रवर्त्तते॥ स्मार्त्तविषये तूभयाधिक्ये द्वादश्याधिक्ये च सर्वपुरुषविषयाणि द्रष्ट
व्यानि। दशमीविद्धाभ्यनुज्ञापकानि कानिचिद्वचनान्युपलभ्यंते। तद्यथा स्कंदपुराणेपि॥ त्रयोदश्यां न लभ्येत द्वाद
शी यदि किंचन। उपोष्यैकादशी तत्र दशमीमिश्रितापि चेति॥ स्मृत्यंतरेपि। उपोष्यैकादशी तत्र द्वादशी न भवेद्यदि॥ द
शम्या हि विमिश्रैव एकादश्येव धर्मकृदिति॥ वृहद्वसिष्ठः॥ द्वादशी स्वल्पमप्यापि यदि न स्यात्परेहनि॥ दशमी
मिश्रिता कार्या महापातकनाशनीति॥ ऋष्यशृंगः॥ एकादशी न लभ्येत द्वादशी सकला भवेत्। उपोष्यैकादशी वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वाऋषिरुद्दालकोब्रवीदिति। हारीतोपि। त्रयोदश्यां यदा नष्टा द्वादशी घटिकाद्वयं॥ दशम्येकादशी विद्धा सैवोपोष्या सदा तिथिरि
ति। एतादृशानि वाक्यानि सर्वाण्यनुभयाधिक्ये सर्वविषयाण्येकादश्याधिक्ये तु स्मार्तगृहस्थमात्रविषयाणि द्रष्टव्यानि न त्वेता
नि वैष्णवविषयाणि। वैष्णवप्रकरणेषु विद्धाभ्यनुज्ञाया अदर्शनात्। संपूर्णैकादशी परित्यागविषयाणि कानिचिद्वचनान्युप
लभ्यंते। तद्यथा स्कंदपुराणे। एकादशी भवेत्पूर्णा परतो द्वादशी यदि॥ तदा ह्येकादशीं त्यक्त्वा द्वादशीं समुपोषयेदिति। तथा च
कालिकापुराणे। एकादशी यदा पूर्णा परतो द्वादशी भवेत्। उपोष्या द्वादशी तत्र तिथिवृद्धिः प्रशस्यत इति। गारुडपुराणे। पूर्णा भ
वेद्यदा नंदा भद्रा चैव विवर्द्धते। तदोपोष्या तु भद्रा स्यात्तिथिवृद्धिः प्रशस्यत इति। तादृशानि सर्वाणि वैष्णवविषयाणि॥ दिनत्र
यविषयकाणि कानिचिद्वचनान्युपलभ्यंते॥ नारदः॥ यदि दैवात्तु संसिध्येदेकादश्यां दिनत्रयं॥ तत्र क्रतुशतैः पु
ण्यं द्वादशी पारणं भवेदिति॥ कूर्मपुराणेपि॥ द्विस्पृगेकादशी यत्र तत्र सन्निहितो हरिः॥ तामेवोपवसेत्कामं
अकामो विष्णुतत्परइति॥ अत्रायं तयोर्दशमीद्वादश्योर्मध्ये एकादशी स्येतद्दिनत्रयं यदाप्नोति तदा परतो द्वादशी राम
वृद्धिरवृद्धिश्चेत्युभयं संभवति॥ तत्रयद्यवृद्धिस्तदा यथोक्तं दिनत्रयमुपोष्यं॥ तदुक्तं स्कंदपुराणे। दिनत्रयमू ११८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेदेविनोपोष्यादशमीयुता॥ सैवोपोष्यासदापुण्यापरतश्चेत्त्रयोदशीति॥ द्वादशीवृद्धावेकादशीयदात्तुसे
त्स्यनेनव्यासवचनेनपरेद्युरुपवासइतिपूर्वमेवनिर्णीतं॥ यदात्वाद्यंतयोरेकादशीत्रयोदश्योर्मध्येद्वादशीस्येता
दृशंदिनत्रयंतदानारदेनस्मर्यते॥ एकादशीद्वादशीचरात्रिशेषेत्रयोदशी॥ त्रिस्पृशानामसाप्रोक्ताब्रह्महत्यांव्य
पोहतीति॥ तदेतद्वैष्णवविषयंयतिविषयंवाद्रष्टव्यं॥ गृहस्थेतुतन्निषिद्धं॥ तथाचकूर्मपुराणे॥ एकादशीद्वा
दशीचरात्रिशेषेत्रयोदशी॥ उपवासंनकुर्वीतपुत्रपौत्रसमन्वितइति॥ पद्मपुराणेपि॥ एकादशीद्वादशीचरात्रि
शेषेत्रयोदशी॥ त्र्यहस्पृक्स्यदहोरात्रं नोपोष्यंतत्सुतार्थिभिरिति॥ यत्तुऋष्यशृंगेणोक्तं॥ अविद्धानिनिषिद्धे
श्चेन्नलभ्यंतेदिनानितु॥ मुहूर्तैःपंचभिर्विद्धाग्राह्यैवैकादशीतिथिः॥ तदूर्द्ध्वंविद्धान्यन्यानिदिनान्युपवसेद्बुधः
॥ पूर्वविद्धानकर्त्तव्याषष्ठ्येकादश्यथाष्टमी॥ एकादशींतुकुर्वीतक्षीयतेद्वादशीयदीति॥ अत्रनिषिधोयतिविष
यः॥ विधिर्गृहस्थविषयः॥ वेधबाहुल्येनहेयत्वशंकामाभूदितिपंचभिर्मुहूर्तैरित्युक्तम्॥ तदेवंनानाविधवचन
व्यवस्थापनप्रकारोव्युत्पादितः॥ अनयाव्युत्पत्त्यामंदबुद्धिरपिव्यवस्थापयितुंशक्नोत्येव॥ इत्युपवासतिथिनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

का·मा· रूपिता॥ अथाधिकारीनिरूप्यते॥ तत्रनारदः॥ अष्टाब्दादधिकोमर्त्योह्यपूर्णाशीतिहायनः॥ भुंक्तेयोमानवो
११५ मोहादेकादश्यांसपापकृदिति॥ कात्यायनोपि॥ अष्टवर्षाधिकोमर्त्योह्यशीतिन्यूनवत्सरः॥ एकादश्यामुपव-
सेत्पक्षयोरुभयोरपीति॥ गृहस्थस्यतुशुक्लैकादश्यामेवनित्योपवासः॥ तथाचकूर्मपुराणे॥ एकादश्यांनभुंजी
तपक्षयोरुभयोरपि॥ वानप्रस्थोयतिश्चैवशुक्लामेवसदागृहीति॥ भविष्योत्तरेपि॥ एकादश्यांनभुंजीतपक्षयो
रुभयोरपि॥ ब्रह्मचारीचनारीचशुक्लामेवसदागृही॥ नारीविधवा॥ तस्याएवयतिधर्मत्वात्॥ पतिमत्यास्तूप
वासंनिषेधति॥ विष्णुः॥ पत्यौजीवतियानारीउपोष्यव्रतमाचरेत्॥ आयुष्यंहरतेभर्त्तुर्नरकंचैवगच्छतीति॥ म
नुः॥ नास्तिस्त्रीणांपृथग्यज्ञोनव्रतंनाप्युपोषणमिति॥ मार्कंडेयः॥ नारीखल्वननुज्ञाताभर्त्रापित्रासुतेनवा
निष्फलंतुभवेत्तस्यायत्करोतिव्रतादिकमिति॥ आदिशब्दाद्वस्त्रालंकारगंधधूपांजनानांउपसंग्रहः॥ तदाह
मनुः॥ पुष्पालंकारवस्त्राणिगंधधूपानुलेपनमिति॥ पत्युरनुमत्यातुपत्नीव्रतादिष्वधिकारिणीभवति॥ त राम
दाहकात्यायनः॥ भार्यापत्युर्मतेनैवव्रतादीनाचरेत्सदेति॥ शुक्लामेवेत्येवकारःकृष्णैकादश्यामुपवासनिषे ११५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धपरः॥ तथाचकूर्मपुराणे॥ संक्रांत्यांकृष्णपक्षेचरविशुक्रदिनेतथा॥ एकादश्यांनकुर्वीतउपवासंचपारणमि-
ति॥ गौतमोपि॥ आदित्येहनिसंक्रांत्यामसितैकादशीषुच॥ व्यतीपातेकृतेश्राद्धेपुत्रीनोपवसेद्गृहीति॥ अत्रपुत्री
तिविशेषणंपुत्रवतोदोषविशेषप्रदर्शनार्थं॥ तथाचपद्मपुराणे॥ संक्रांत्यामुपवासेनपारणेनयुधिष्ठिर॥ एका
दश्यांचकृष्णायांज्येष्ठः पुत्रोविनश्यति॥ नारदीयेपि॥ इंदुक्षयार्कसंक्रांत्योरेकादश्यांसितेतरे॥ उपवासंनकु
र्वीतयदीच्छेत्संततिंध्रुवमिति॥ अत्रसंक्रांत्यादिषूपवासस्यनिषेधः॥ संक्रांत्यादिनिमित्तकस्य॥ तथाचका-
त्यायनः॥ एकादशीषुकृष्णासुरविसंक्रमणेतथा॥ चंद्रसूर्योपरागेचनकुर्यात्पुत्रवान्गृही॥ तत्प्रयुक्तोपवास
स्यनिषेधोयमुदाहृतः॥ प्रयुक्तंयतरमुक्तस्यनविधिर्ननिषेधनमिति॥ जैमिनिरपि॥ तन्निमित्तोपवासस्यनिषेधो
यमुदाहृतः॥ नानुषंगकृतोग्राह्यो यतोनित्यमुपोषणमिति॥ अयमर्थः॥ एकादश्युपवासस्यनित्यत्वात्संक्रांत्या
द्युपवासस्यचकाम्यत्वात्काम्योपवासनिषेधेननित्योपवासनिषेधः सिध्यतीति॥ संक्रांत्यादिनिमित्तकोपवासः
संवर्त्ते नोक्तः॥ अमावास्याद्वादशीचसंक्रांतिश्चविशेषतः॥ एताःप्रशस्तास्तिथयोभानुवारस्तथैव॥ अत्रस्नानं

CC-0. In Public Domain. Digitization by eGangotri

जपोहोमोदेवतानांच पूजनं॥ उपवासस्तथादानमेकैकंपावनंस्मृतमिति॥ ग्रहस्थस्यतुशुक्लायामेवनित्योपवा
सइत्युक्तं॥ नैमित्तिककाम्योपवासौतुकृष्णायामपिकर्त्तव्यौ॥ तत्रनैमित्तिकःस्मृत्यंतरेपठ्यते॥ शयनीबोधिनी
मध्येयाकृष्णैकादशीभवेत्॥ सैवोपोष्यागृहस्थेननान्याकृष्णाकदाचनेति॥ काम्यस्तुस्कंदपुराणे॥ पितॄणांग
तिमन्विच्छन् कृष्णायांसमुपोषयेदिति॥ सनत्कुमारः॥ भानुवारेणसंयुक्ताकृष्णासंक्रांतिसंयुता॥ एकादशीस
दोपोष्यासर्वसंपत्करीतिथिरिति॥ मत्स्यपुराणेपि॥ एकादश्यांतुकृष्णायामुपोष्यविधिवन्नरः॥ पुत्रानायुःसमृ
द्धिंचसायुज्यंचसगच्छतीति॥ दिनक्षयेपुत्रवतोगृहस्थस्योपवासोनिषिद्धः॥ तथाचपितामहः॥ एकादश्यां
दिनक्षयेउपवासंकरोतियः॥ तस्यपुत्राविनश्यंतिमघायांपिंडतोयथेति॥ मत्स्यपुराणे॥ दिनक्षयेर्कसंक्रांतौग्रहणे
चंद्रसूर्ययोः॥ उपवासंनकुर्वीतपुत्रपौत्रसमन्वितइति॥ वसिष्ठोपि॥ एकस्मिन्सावनेत्वह्नितिथीनांत्रितयंयदा॥
तदादिनक्षयःप्रोक्तःतत्रसाहस्रिकंफलमिति॥ फलमत्रोपवासव्यतिरिक्तदानादिजन्यंद्रष्टव्यं॥ उपवासस्य
निषिद्धत्वात्॥ ईदृशेविषयेकिंकर्त्तव्यमित्याकांक्षायांवायुपुराणेपठ्यते॥ उपवासेनिषिद्धेतुभक्ष्यंकिंचित्प्रक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ल्पयेत्॥ नदुष्यत्युपवासेनउपवासफलंलभेत्॥ नक्तंहविष्यान्नमनोदनंवाफलंतिलाःक्षीरमथांबुचाज्यं॥ य
त्पंचगव्यंयदिवापिवायुःप्रशस्तमत्रोत्तरमुत्तरंचेति॥उपवासासमर्थस्तुएकभक्तादीनिकुर्यात्॥तथाचस्मृ
तिः॥उपवासेत्वशक्तानामश्नीतेह्यूर्ध्वजीविनां॥एकभक्तादिकंकार्यंआहबौधायनोमुनिरिति॥ मार्कंडेयपुराणे
एकभक्तेननक्तेनतथैवायाचितेनच॥ उपवासेनदानेननर्निर्द्वादशिकोभवेदिति॥कूर्मपुराणेपि॥ एकभक्तेननक्ते
नक्षीणवृद्धातुरःक्षिपेत्॥ नातिक्रमेद्द्वादशींतुउपवासव्रतेनचेति॥स्मृत्यंतरेपि॥ एकभक्तेननक्तेनबालवृद्धा
तुरःक्षिपेत्॥ पयोमूलंफलंवापिननिर्द्वादशिकोभवेदिति॥ भविष्यत्पुराणे॥ एकादश्यामुपवसेन्नक्तेवापिसमाचरे
दिति॥ नित्यकाम्ययोरशक्तास्तुप्रतिनिधिभिर्व्रतंकारयेयुः॥तथाचविष्णुरहस्ये॥ असामर्थ्येशरीरस्यव्रतेचसमुप ९
स्थिते॥ कारयेद्धर्मपत्नींवापुत्रंवाविनयान्वितंइति॥पैठीनसिः॥ भार्यापत्युर्व्रतंकुर्याद्भार्यायाश्चपतिर्व्रतं॥असाम
र्थ्येपरस्ताभ्यांव्रतभंगोनजायतइति॥स्कंदपुराणे॥ पुत्रंवाविनयोपेतंभगिनींभ्रातरंतथा॥ एषामभावएवान्यंब्रा
ह्मणंविनियोजयेत्॥ भ्रातरंभगिनींशिष्यंकारयेद्ब्राह्मणादिभिरिति॥स्मृत्यंतरेपि॥ पितृमातृपतिभ्रातृश्वश्रूगु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वींद्भूभुजां॥ अदृष्टार्थमुपोषित्वात्त्वयंच फलभाग्भवेदिति॥कात्यायनः॥पितृमातृस्वसृभ्रातृगुर्व्वर्थेचविशे
षतः॥उपवासंप्रकुर्वाणः पुण्यंशतगुणंलभेत्॥दक्षिणानाञ्चदातव्याशुश्रूषाविहिताचसा॥नारीचपतिमुद्दि
श्यएकादश्यामुपोषिता॥पुण्यंशतगुणंप्राहुर्मुनयः पारदर्शिनः॥ उपवासफलंतस्याःपतिःप्राप्नोत्यसंशयं ॥
राज्यस्यक्षत्रियार्थेचएकादश्यामुपोषितः॥ पुरोधाःक्षत्रियस्यार्द्धंफलंप्राप्नोत्यनिश्चितं॥पितामहादीनुद्दिश्यए
कादश्यामुपोषणे॥ कृतेतुतत्फलंविप्रास्समग्रंफलमाप्नुयुः॥कर्त्तादशगुणंपुण्यंप्राप्नोत्यत्रनसंशयः॥यमुद्दिश्य
कृतंसोपिसंपूर्णफलमाप्नुयादिति॥प्रतिनिधौचकश्चिद्विशेषःस्मर्यते॥काम्येप्रतिनिधिर्नास्तिनित्यनैमित्तिके
चसः॥काम्येष्वुपक्रमादूर्ध्वंकेचित्प्रतिनिधिंविदुरिति॥अयमर्थः॥नित्यंनैमित्तिकंचप्रतिनिधिनाप्युपक्रम्यका
रयेत्॥ काम्यंतुस्वसामर्थ्यंपरीक्ष्यस्वयमेवोपक्रम्यकुर्यात्॥ असामर्थ्येउपक्रमादूर्ध्वंप्रतिनिधिनापितत्कारयेत्
॥उपवासाकरणेप्रायश्चित्तंस्मर्यते॥ अष्टम्यांचचतुर्दश्यांदिवाभुक्तेंदवंचरेत्॥एकादश्यांदिवारात्रौनक्तंचैव
तुपर्वणीति॥स्मृत्यंतरे॥अर्केपर्वद्वयेरात्रौचतुर्दश्यष्टमीदिवा॥एकादश्यामहोरात्रंभुक्त्वाचांद्रायणंचरेत्॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

अथ काम्योपवासक्रमः ॥ तत्रांगिराः ॥ सायमाद्यंतयोरन्होः सायंप्रातश्चमध्यमे ॥ उपवासफलंप्रेप्सुर्जह्याद्भक्त
चतुष्टयमिति ॥ देवलः ॥ दशम्यामेकभक्तस्तुमांसमैथुनवर्जितः ॥ एकादशीमुपवसेत्पक्षयोरुभयोरपि ॥ देवतां
स्तस्यतुष्यंतिकामितंतस्यसिद्ध्यतीति ॥ बृहस्पतिरपि ॥ दिवानिद्रापरान्नंचपुनर्भोजनमैथुने ॥ क्षौद्रंकांस्यामिषं
तैलंद्वादश्यामष्टवर्जयेदिति ॥ कूर्मपुराणे ॥ कांस्यंमांसंमसूरान्नंचणकान्कोरदूषकान् ॥ शाकंमधुपरान्नंचत्यः
जेदुपवसंस्त्रियमिति ॥ स्मृत्यंतरेपि ॥ शाकंमांसंमसूरांश्चपुनर्भोजनमैथुने ॥ द्यूतमत्यंबुपानंचदशम्यांवैष्ण
वस्त्यजेत् ॥ विष्णुधर्मे ॥ असंभाष्यान्हिसंभाष्यतुलस्यनसिकादलं ॥ आमलक्याःफलंवापिपारणेप्राश्यशु
द्ध्यति ॥ असकृज्जलपानेचदिवास्वापंचमैथुनं ॥ तांबूलचर्वणंमांसंवर्जयेद्व्रतवासरइति ॥ वसिष्ठः ॥ उपवासे
तथाश्राद्धेनखादेद्दंतधावनं ॥ दंतानांकाष्ठसंयोगोहंतिसप्तकुलानिचेति ॥ दंतधावनेप्रायश्चित्तंविष्णुरहस्ये
॥ श्राद्धोपवासदिवसेखादित्वादंतधावनं ॥ गायत्र्याःशतसंपूतमंबुप्राश्यविशुध्यतीति ॥ हारीतः ॥ पतितपा
खंडिनास्तिकसंभाषणमनृताश्लीलादिकमुपवासादिषुवर्जयेदिति ॥ कूर्मपुराणे ॥ बहिर्ग्रामांत्यजात्सूतिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पतितंचरजस्वलां॥ नस्पृशेन्नाभिभाषेतनेक्षेतव्रतवासरइति॥ विष्णुरहस्ये॥ स्मृत्यालोकनगंधादिस्वादनं
परिकीर्त्तनं॥ अन्नस्यवर्जयेत्सर्वंग्रासानांचाभिकांक्षणं॥ गात्राभ्यंगंशिरोभ्यंगंताम्बूलंचानुलेपनं॥ व्रतस्थो
वर्ज्जयेत्सर्वंयच्चान्यन्निराकृतिमिति॥ ब्रह्मांडपुराणेपि॥ कांस्यंमांसंसुरांक्षौद्रंलोभंवितथभाषणं॥ व्याया
मंचप्रवासंचदिवास्वप्नंतथांजनं॥ तिलपिष्टंमसूरांश्चद्वादशैतानिवैष्णवः॥ द्वादश्यांवर्ज्जयेन्नित्यंसर्वपा
पैःप्रमुच्यतइति॥ एकादश्यांश्राद्धंकृत्वापिनभोक्तव्यम्॥ तदाहकात्यायनः॥ उपवासोयदानित्यःश्राद्धंनै
मित्तिकंभवेत्॥ उपवासंतदाकुर्यादाघ्रायपितृसेवितंइति॥ यत्तुवचनं॥ श्राद्धंकृत्वातुयोविप्रोनभुंक्तेपितृसेवि
तं॥ हविर्ह्दैवानगृण्हंतिकव्यंचपितरस्तथेति॥ तदेकादशीव्यतिरिक्तविषयं॥ आघ्राणेनापिभोजनकार्यंसि
द्ध्यति॥ तस्यभोजनकार्यविधानात्॥ अयमिहव्रतानुष्ठानक्रमः॥ प्रथमंदशम्यांएकभक्तंकृत्वानंतरंदंतधा
वनंकुर्यात्॥ तथाचस्मर्यते॥ दशम्यामेकभुग्भूत्वाखादयेद्दंतधावनमिति॥ तदनंतरंदशम्यांरात्रौनियम
ग्रहणंकुर्यात्॥ तदुक्तंब्रह्मवैवर्त्ते॥ प्राप्तेहरिदिनेसम्यग्विधायनियमंनिशि॥ दशम्यामुपवासस्यप्रकुर्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वैष्णवंव्रतमिति॥ नियमोनारदीयेस्मर्यते॥ अक्षारलवणाःसर्वेहविष्यान्ननिषेविणः॥ अवनीतल्पशयनाप्रियासं
गविवर्जिताइति॥ ततःस्नानकृत्वायैकादश्यांबाह्याभ्यंतरशुद्धिंविदध्यात्॥ तत्प्रकारस्तु॥ शरीरमंतःकरणोपघा
तंवाचश्चविष्णुर्भगवानशेषं॥ शमंनयत्वस्तु ममेहशर्मपापादनंतेहृदिसन्निविष्ट॥ अंतःशुद्धिंबहिःशुद्धिंशुद्धो
धर्ममयोच्युतः॥ सकरोतु ममैतस्मिन्शुचिरेवास्तु सर्वदा॥ बाह्योपघातानन घो बौद्धांश्च भगवानजः॥ शमंनय
त्वनंतात्माविष्णुश्चेतसिसंस्थितः॥ अनंतरंप्रातःसंकल्पंकुर्यात्॥ तदुक्तंवाराहपुराणे॥ गृहीत्वौदुंबरं पात्रंवा
रिपूर्णमुदङ्मुखः॥ उपवासंतुगृण्हीयात् यद्वावार्थैवधारयेदिति॥ औदुंबरंताम्रपात्रं॥ संकल्पमाहविष्णुः॥ ए
कादश्यांनिराहारःस्थित्वाहमपरेहनि॥ भोक्ष्यामिपुंडरीकाक्षशरणंमेभवाच्युत॥ इत्युच्चार्यततोविद्वान्पुष्पांज
लिमथार्पयेत्इति॥ अनंतरंतत्पात्रगतंजलंपिबेत्॥ तदाहकात्यायनः॥ अष्टाक्षरेणमंत्रेणत्रिर्जप्तेनाभिमंत्रितं॥
उपवासफलंप्रेप्सुः पिबेत्पात्रगतंजलमिति॥ विद्धैकादश्युपवासेरात्रौसंकल्पः॥ तथाचनारदीये॥ विद्धोपवासे
सकलंदिनंत्यक्त्वासमाहितः॥ रात्रौसंपूजयेद्विष्णुंसंकल्पंचतदाचरेदिति॥ मध्यरात्रादुपरिदशमीयुक्तात्वेदेकाद

CC-0. In Public Domain. Digitization by eGangotri

शीतस्यां मध्यान्हस्योपरि संकल्पः॥ तथाच स्मृतिः॥ दशम्याः संगदोषेण मध्यरात्रात्परेणतु॥ वर्जयेच्चतुरो यामान्
संकल्पार्चनयोः सदेति॥ एकादश्यां देवस्योपरि पुष्पमंडपं कारयेत्॥ तदुक्तं ब्रह्मपुराणे॥ एकादश्यां शुभे पक्षे नि
राहारः समाहितः॥ नानापुष्पैर्मुनिश्रेष्ठ विचित्रं पुष्पमंडपं॥ कृत्वा चावरणं पश्चात् जागरं कारयेन्निशीति॥ तस्मि
न्मंडपे देवमर्चयेत्॥ तदुक्तं ब्रह्मपुराणे॥ एकादश्यां शुभे पक्षे निराहारः समाहितः॥ पुष्पैर्गंधैस्तथा धूपैर्दीपैर्नैवे
द्यकैः परैः॥ उपचारैर्बहुविधैर्जपहोमैः प्रदक्षिणैः॥ स्तोत्रैर्नानाविधैर्दिव्यैर्गीतवाद्यैर्मनोहरैः॥ दंडवत्प्रणिपातैश्च
जयशब्दैस्तथोत्तमैः॥ एवं संपूज्य विधिवद्रात्रौ कृत्वा प्रजागरं॥ याति विष्णोः परं स्थानं नरो नास्त्यत्र संशयः॥ द्वा
दश्यां कर्त्तव्यमाह कात्यायनः॥ प्रातः स्नात्वा हरिं पूज्य उपवासं समर्पयेत्॥ अज्ञानतिमिरांधस्य व्रतेनानेन केश
व॥ प्रसादसुमुखो नाथ ज्ञानदृष्टिप्रदो भव॥ मंत्रं जपित्वा हरये निवेद्योपोषणं व्रती॥ द्वादश्यां पारणं कुर्याद्गूर्जे चिं
त्वाह्युपोदकीमिति॥ सूतकादौ दानार्चनरहितउपवासमात्रं कुर्यात्॥ तदुक्तं कूर्मपुराणे॥ काम्योपवासे प्रक्रांते
त्वंतरा मृतसूतके॥ तत्र काम्यव्रतं कुर्याद्दानार्चनविवर्जितमिति॥ वाराहपुराणे॥ सूतके च नरः स्नात्वा प्रणम्य म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नसा हरिं ॥ एकादश्यां न भुंजीत व्रतमेवं न लुप्यते ॥ मृतके पि न भुंजीत एकादश्यां सदा नरः ॥ द्वादश्यां तु समश्नीयात्
स्नात्वा विष्णुं प्रणम्य चेति ॥ तत्र परित्यक्ते देवार्चनं सूतकांते कुर्यात् ॥ तदुक्तं मत्स्यपुराणे ॥ सूतकांते नरः स्नात्वा पू
जयित्वा जनार्दनं ॥ दानं दत्वा विधानेन व्रतस्य फलमश्नुत इति ॥ स्त्रीणां रजोदर्शने पि न व्रतत्यागः ॥ किंतु देवार्चनादि
रहितं सूतकादाविवोपवासमात्रं कार्यं ॥ तदाह पौलस्त्यः ॥ एकादश्यां न भुंजीत नारी दृष्टे रजस्यपि ॥ ऋष्यशृंगो
पि ॥ संप्रवृत्ते पि रजसि न त्याज्यं द्वादशीव्रतमिति ॥ सत्यव्रतो पि ॥ प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत् ॥ न तत्रापि
व्रतस्य स्यादुपरोधः कदाचनेति ॥ शुद्ध्यनंतरं देवतार्चनादिकं कुर्यात् ॥ तथा च स्मृतिः ॥ स्नात्वा भर्तुश्चतुर्थे न्हि शुद्धा
स्यात्सरिचारेण ॥ पैत्र्ये मेहनि शुद्धा स्यादैवे पित्र्ये च कर्मणीति ॥ नित्योपवासो विष्णुरहस्ये भिहितः ॥ अथ नित्योपवा
सी चेत्सायंप्रातर्भुजिक्रियां ॥ वर्जयेन्मतिमान् विप्रः संप्राप्ते हरिवासर इति ॥ ब्रह्मवैवर्ते पि ॥ इति विज्ञाय कुर्वीत व
श्यमेकादशीव्रतं ॥ विशेषनियमासक्तो ऽहोरात्रं भुक्तिवर्जितः ॥ निगृहीतेंद्रियः श्रद्धासहायो विष्णुतत्परः ॥ उपो
ष्यैकादशीं पापान्मुच्यते नात्र संशयः ॥ शक्तो सत्यां नियमानाचरेत् ॥ तथा च कात्यायनः ॥ शक्तिमांस्तु पुनः कुर्यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्नियमंसविशेषणमिति॥ यदाद्वादश्यांश्रवणनक्षत्रंभवेत्तदाशुद्धैकादशीमपिपरित्यज्यद्वादश्यामेवोपवसेत्॥
तथाचनारदीये॥शुक्लावायदिवाकृष्णाद्वादशीश्रवणान्विता॥तयोरेवोपवासश्चत्रयोदश्यांतुपारणमिति॥ तथा॥
एकादश्यांतुविद्धायांसंप्राप्तेश्रवणेतदा॥ उपोष्याद्वादशीशुद्धासर्वपापक्षयावहेति॥ यदात्रयोदश्यांद्वादश्याः क-
लाद्वयंचाप्युदयेसंभवतितदाद्वादशीकालएवपारणंकार्यं॥ तदुक्तंनारदीये॥ भवेद्यत्रत्रयोदश्यांद्वादश्यास्त्वकला-
द्वयं॥ द्वादशद्वादशीर्हंतित्रयोदश्यांतुपारणं॥कलाद्वयंत्रयंवापिद्वादशींनत्वतिक्रमेत्॥पारणेमरणेनृणांतिथिस्ता-
त्कालिकीस्मृतेति॥ नन्वद्वादश्यातिक्रमेपिनास्तिदोषः॥सातिथिः सकलाज्ञेयेतिवचनेनसाकल्याभिधानादिति चे-
त्॥मैवं॥ साकल्यस्यस्नानादिविषयत्वात्॥ वाक्यशेषेस्नानदानजपादिष्वित्यभिधानात्॥ पारणेतिनसाकल्य-
वचनंप्रवर्त्तते ॥तिथिस्तात्कालिकीस्मृतेतिवचनात्॥ द्वादशीकालेयदापारणंतदाततःप्रागेवसर्वाःक्रियाः
कर्त्तव्याः॥ तदुक्तंनारदीये॥अल्पायामथविप्रेंद्रद्वादश्यामरुणोदये॥ स्नानार्चनक्रियाःकार्यादानहोमादिसं-
युताः॥ एतस्मात्का——रणाद्विप्रःप्रत्यूषेस्नानमाचरेत्॥ पितृतर्पणसंयुक्तंस्वल्पांदृष्ट्वाचद्वादशीं॥ महाहानि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करा ह्येषा द्वादशी लंघिता नृणां ॥ करोति धर्महरणं अस्नातेव सरस्वतीति ॥ गारुडपुराणेपि ॥ यदा स्वल्पा द्वादशी स्
स्यादपकर्षो भुजे र्भवेत् ॥ प्रातर्माध्यान्हिकस्यापि तत्र स्यादपकर्षणमिति ॥ स्कंदपुराणेपि ॥ यदा भवेदतीवाल्पा द्वा
दशी पारणादिने ॥ उषःकाले द्वयं कुर्यात्प्रातर्माध्यान्हिकं तदेति ॥ तत्र पारणासंभवे अद्भिः पारणं कुर्यात् ॥ तदाह कात्याय
नः ॥ संध्यादिकं भवेन्नित्यं पारणं तु निमित्ततः ॥ अद्भिस्तु पारयित्वाथ नैत्यकांते भुजिर्भवेदिति ॥ देवलोपि ॥ संकटे विष
मे प्राप्ते द्वादश्यां पारयेत्कथं ॥ अद्भिस्तु पारणं कुर्यात्पुनर्भुक्तं न दोषकृदिति ॥ यदा कलयापि द्वादशी नास्ति तदा त्रयोदश्यामपि पार
णं कुर्यात् ॥ तदुक्तं नारदीये ॥ त्रयोदश्यां तु शुद्धायां पारणं पृथिवीफलं ॥ शतयज्ञादिकं वापि नरः प्राप्नोत्यसंशयमिति ॥ पा
रणं च नैवेद्यतुलसीमिश्रितं कुर्यात् ॥ तदुक्तं स्कंदपुराणे ॥ कृत्वा चैवोपवासं तु योऽश्नाति द्वादशीदिने ॥ नैवेद्यं तुलसीमि
श्रं हत्याकोटिविनाशनमिति ॥ ॥ अथैकादशीमहिमा ॥ ॥ तत्र वसिष्ठः ॥ एकादशीसमुत्थेन वन्हिना पातकेंधनं ॥
भस्मतां याति राजेंद्र अपि जन्मशतोद्भवं ॥ नेदृशं पावनं किंचिन्नराणां भुवि विद्यते ॥ यादृशं पद्मनाभस्य दिनं पातकहा
निदं ॥ तावत्पापानि देहेस्मिंस्तिष्ठंति मनुजाधिप ॥ यावन्नोपवसेज्जंतुः पद्मनाभदिनं शुभं ॥ अश्वमेधसहस्राणि वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जपेयशतानिच॥ एकादश्युपवासस्य कलांनार्हंतिषोडशीं॥ एकादशें द्विपैः पापंयत्कृतंभवतिप्रभो॥ एकादश्यु
पवासेनतत्सर्वंविलयंव्रजेत्॥ एकादशीसमंकिंचित्पापत्राणंनविद्यते॥ स्वर्गमोक्षप्रदाह्येषाराज्यपुत्रप्रदायिनी
॥ सुकलत्रप्रदाह्येषाशरीरारोग्यदायिनी॥ नगंगानगयाभूपनकाशीनचपुष्करं॥ नचापिकौरवंक्षेत्रंनरेवानरदेवि
का॥ यमुनाचंद्रभागाचतुल्याभूपहरेर्दिनात्॥ अनायासेनराजेंद्रप्राप्यतेवैष्णवंपदं॥ चिंतामणिसमाह्येषाह्य
थवापिनिधेःसमा॥ सांकल्पपादपप्रख्यावेदवेदोपमातथेति॥ अस्यामेकादश्यांयान्युपवासप्रतिनिधिरूपा
णिएकभक्तनक्तायाचितादीनितेषांप्रतिपदुपक्तन्यायेनोपवासतिथावनुष्ठानं॥ यानितुस्वतंत्राण्येकभक्तनक्ता
दीनितेषांपूर्वोक्तन्यायेनमध्यान्हादिव्यापितिथिग्रहणप्राप्तौदशमीविद्धाप्रतिषिध्यतेद्वादशीकल्पे॥ पूर्णविद्धां
दिनार्द्धेननंदांपूर्णामपित्यजेत्॥ यदीच्छेदात्मसंतानंनियमेषुचतुर्ष्वपि॥ नोपोषितंचनक्तंचनैकभक्तमयाचितं
॥ नंदायांपूर्णविद्धायांकुर्यादैश्वर्यमोहितः॥ एकादशीयुताशस्ताद्वादश्यासमुपोषणे॥ नक्तेचायाचितेनित्यमेकभ
क्तेतथानघ। नक्तंवायाचितंतातनैकभक्तमथाहरेत्॥ दशमीसहितंदानमनर्थंहरिवासरइति॥ दिनार्द्धेनसार्द्धस

CC-0. In Public Domain. Digitization by eGangotri

सप्तमुहूर्त्तैरित्यर्थः॥एतदेवाभिप्रेत्य दिक्पंचदशभिस्तथेत्युदाहृतं॥ तथासार्द्धसप्तमुहूर्त्तैस्तुवेधोयंबाधते व्रतमि
तिच॥इतोन्यूनवेधेतुतिथ्यंतरवन्मध्यान्हादिव्याप्तिर्गृहीतव्या॥ ॥इत्येकादशीनिर्णयः॥ ॥अथद्वादशीनिर्णी
यते॥ ॥साचयुग्मादिशास्त्रेणपूर्वविद्धाग्राह्या॥स्कंदपुराणेपि॥द्वादशीचप्रकर्त्तव्याएकादश्यायुताविभो॥सदा
कार्याचविद्वद्भिर्विष्णुभक्तैश्चमानवैरिति॥उत्तरविद्धांप्रतिषेधति बृहद्वसिष्ठः॥द्वितीयापंचमीवेधाद्दशमीचत्र
योदशी॥चतुर्द्दशीचोपवासे हन्युःपूर्वोत्तरेतिथीइति। नन्वेवंसत्येकादश्युपवासोद्वादश्युपवासश्चेत्युभयमेकस्मि
न्दिनेप्राप्नोति॥ सत्यं॥ तथापिचोभयस्यान्योन्यंविरोधाभावात्सहैवानुष्ठानंभविष्यति॥नन्वेकंव्रतमसमाप्यव्रतां
तरमनुष्ठातुमशक्यं॥ असमाप्तेव्रतेपूर्वेनैवकुर्याद्व्रतांतरमितिशास्त्रात्॥मैवं॥ इदंहिशास्त्रमेकव्रतस्यमध्ये
व्रतांतरोपक्रमंनिषेधतिप्रकृतेतुव्रतद्वयस्यापिसहैवोपक्रमइतितंत्रेणानुष्ठानंभविष्यति॥ नन्वस्त्वेवंखं
डतिथौसंपूर्णतिथौत्वेकादशीद्वादश्युपवासौद्वौनैरंतर्येणप्राप्नुतः॥तत्रपारणमंतरेणप्रथमोपवासस्यास
माप्तत्वात्॥ द्वितीयोपवासस्यप्रक्रमोनसंभवतीतिचेत्॥मैवं॥ अद्भिःपारणंकृत्वाद्वितीयोपवासस्यप्रक्र

मपितुंशक्यत्वात्॥ तादृशंतु पारणमशितानशितोभयात्मकं॥ तत्राशितरूपत्वात् पूर्वोपवासं परिसमापयति॥ अनशि
तरूपत्वेनोत्तरोपवासंनविहंति॥ एतच्चद्व्यात्मकत्वंदर्शपूर्णमासप्रकरणे याजमानब्राह्मणेश्रूयते॥ यदानाश्यानुपवसे
त्क्षोधुकःस्याद्यदश्नीयात्रुद्रोस्यपशूनभिमन्येतापोश्नाति तन्नैवाशितंनक्षोधुको भवतिनास्यरुद्रः पशूनभिमन्यत
इति॥ तस्मादुदकपारणे नोपवासद्वयनिर्वाहः॥ एतच्चसर्वतिथिसाधारणं॥ प्रकृते त्वेकादशीद्वादश्योर्द्वैवतैक्यादु
दकपारणमंतरेणापि नकश्चिद्दोषः॥ अतएवस्मर्यते॥ एकादशीमुपोष्यैवद्वादशींसमुपोषयेत्॥ नतत्रविधिलोपः
स्यादुभयोर्दैवतंहरिरिति॥ उपवासद्वयाशक्तौकेवलद्वादश्युपवासेनोभयोःफलंसिद्ध्यति॥ तथाचस्मृतिः॥ ए
कामेकादशींभुक्त्वाद्वादशींसमुपोषयेत्॥ पूर्वोपवासजंपुण्यंसर्वंप्राप्नोत्यसंशयमिति॥ द्वादश्यांतुकाम्योप
वासोमार्कंडेयेनदर्शितः। द्वादश्यामुपवासेनसिद्धार्थोभूपसर्वशः॥ चक्रवर्त्तित्वमतुलंसंप्राप्ताअतुलाःश्रियइति
॥ ॥ इतिद्वादशीनिर्णयः॥ ॥ अथत्रयोदशीनिर्णीयते॥ ॥ साचशुक्लकृष्णापक्षभेदेनव्यवतिष्ठते॥ तत्रशुक्लत्र
योदशीपूर्वविद्धाग्राह्या॥ तदुक्तंब्रह्मवैवर्त्ते॥ त्रयोदशीप्रकर्त्तव्याद्वादशीसहितामुने॥ भूतविद्धानकर्त्तव्यादर्शःपूर्णाक

द्राचन॥ वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तममिति॥ यद्यप्यत्र शुक्लपक्षशब्दो नास्ति तथापि कृष्णत्रयोदश्याः पर
विद्धायाः प्राचनिकत्वात्पूर्वविद्धतायाः शुक्लपक्षविषयत्वं परिशिष्यते॥ सायंकालत्रिमुहूर्त्तमात्रव्यापित्वे न पूर्ववि
द्धतायां आमायां प्रतिपद्द्वापराण्हसंबंधोपेक्षित इति द्रष्टव्यं॥ तदुक्तं स्कंदपुराणे॥ त्रयोदशी प्रकर्त्तव्या याभवेद्
पराण्हिकीति॥ कृष्णत्रयोदश्याः परविद्धत्वमुक्तं निगमे॥ षष्ठ्यष्टमी अमावास्या कृष्णपक्षे त्रयोदशी॥ एताः परयुः
ताः पूज्याः पराः पूर्वयुतास्तथेति॥ यत्तु बृहद्वसिष्ठः॥ द्वितीया पंचमी वेधाद्दशमी च त्रयोदशी॥ चतुर्दशी चोपवा
सेहन्युः पूर्वोत्तरातिथी इति॥ तच्छुक्लपक्षविषयं॥ यदा तु कृष्णपक्षे परविद्धा न लभ्यते॥ तदा पूर्वविद्धा ग्राह्या॥ तदा
ह वसिष्ठः॥ एकादशी तृतीया च षष्ठी चैव त्रयोदशी॥ पूर्वविद्धापि कर्त्तव्या यदि न स्यात्परेहनीति॥ अनंगत्रयोदशी
पूर्वविद्धा॥ तदाह संवर्त्तः॥ कृष्णाष्टमी बृहत्तपा सावित्री वटपैतृकी॥ अनंगत्रयोदशी रंभा उपोष्याः पूर्वसंयुता इति
॥ अनंगत्रयोदशी भविष्यत्पुराणे दर्शिता॥ मार्गशीर्षे मले पक्षे इत्युपक्रम्य व्रतं विधाय अनंगेन कृता ह्येषा तेनानंगत्रयो
दशीत्युपसंहारात् नन्वमले पक्ष इति शुक्लपक्ष एव तद्व्रतं विहितं॥ तथा च त्रयोदशी प्रकर्त्तव्या द्वादशीसहिते त्यनेन

सामान्यशास्त्रेणैवानंगत्रयोदश्याः पूर्वविद्धत्वंप्राप्तं॥ बाढं॥ तदेवानेनविशेषशास्त्रेण विस्पष्टीक्रियते॥ ॥इति
त्रयोदशीनिर्णयः॥ ॥अथचतुर्दशीनिर्णीयते॥ ॥ अत्रापिशुक्लकृष्णपक्षभेदेनव्यवस्थाभवति॥ तत्र युग्मशा
स्त्रेणशुक्लचतुर्दशीपरविद्धाग्राह्या॥ तथाव्यासोपि॥ शुक्लाचतुर्दशी ग्राह्यापरविद्धासदाव्रतइति॥ पूर्वविद्धाप्रतिषेध
उत्तरविद्धाविधिश्चेत्युभयंभविष्यत्पुराणेपठ्यते॥ सदाकार्यात्रयोदश्यानतु युक्ता चतुर्दशी॥ पौर्णमासीयुतासास्याच्च
तुर्दश्याचपूर्णिमेति॥ नारदीयेपि॥ तृतीयैकादशीषष्ठी शुक्लपक्षेचतुर्दशी॥ पूर्वविद्धानकर्त्तव्याकर्त्तव्यापरसंयुतेति॥ यत्तुभा
द्रशुक्लचतुर्दश्यामनंतव्रतंभविष्योत्तरेभिहितं॥ तत्रपूर्वविद्धापरविद्धावामध्यान्हव्यापिनीग्राह्येतिकेचिदाहुः॥ लिं
गंचतत्रप्रमाणत्वेनोदाहरंति॥ मध्यान्हेभोज्यवेलायांसमुत्तीर्यसरित्तटे॥ ददर्शशीलासास्त्रीणांसमूहंरक्तवाससां॥
चतुर्दश्यामर्चयंतंभक्त्यादेवंपृथक्पृथगिति॥ अत्रमध्यान्हेभोज्यवेलायामित्यनेनमध्यान्हस्यकर्मकालत्वंप्रतीय
ते॥ अतस्तद्व्यापिनीतिथिर्ग्राह्या॥ नैतत्सारं॥ यथाविनायकव्रतेमध्यान्हेपूजयेन्नृपेतिमध्यान्हःकर्मकालत्वेनवि
हितः॥ नात्रतथाविधिरस्ति॥ उदाहृतंतुलिंगमर्थवादगतत्वान्नस्वातंत्र्येणकस्यचिदर्थस्यप्रमापकं किंतुसतिप्र

माणांतरेनस्योपोद्बलकंभवति॥ नचात्रप्रमाणांतरंपश्यामः॥अतोनमध्यान्हःकर्मकालः॥ तथासतिह्यौदयिकीग्राह्येतिवचनेनयुग्मशास्त्रादिभिश्चोदयव्यापिनीग्राह्या॥ साचतिथ्यंतरवत्त्रिमुहूर्त्तेति मुख्यःकल्पः द्विमुहूर्त्तेत्यनुकल्पः एवंसतिशिष्टाचारोप्यनुगृहीतोभवति॥ चैत्रश्रावणचतुर्दश्यो शुक्लपक्षेअपिरात्रियोगिन्यौग्राह्येति॥ तथाचबौधायनः॥ मधोःश्रावणमासस्यशुक्लायातुचतुर्दशी॥सारात्रिव्यापिनीग्राह्या परापूर्वाण्हगामिनीति॥परामासांतवर्त्तिनीशुक्लचतुर्दशी॥कृष्णाचतुर्दशीतुपूर्वविद्धैवग्राह्या॥तथाचापस्तंबः॥कृष्णपक्षेष्टमीचैवकृष्णपक्षेचतुर्दशी॥ पूर्वविद्धातुकर्त्तव्यापरविद्धानकस्यचिदिति॥अपराण्हव्यापित्वेतुशुक्लचतुर्दश्यपिपूर्वविद्धाग्राह्यातथा॥स्कंदपुराणे॥ चतुर्दशीचकर्त्तव्यात्रयोदश्यायुताविभो॥ममभक्तैर्महाबाहोभवेद्याचापराण्हिकी॥ दर्शविद्धानकर्त्तव्याराकाविद्धाकदाचनेति॥अत्रममभक्तैरितीश्वरोक्तिलिंगाच्छिवचतुर्दशीविषयत्वंद्रष्टव्यम्॥ तदेवंप्रतांतरेषुचतुर्दशीनिर्णीता॥ ॥अथशिवरात्रिव्रतंनिर्णीयते॥ ॥तत्रेदंचिंत्यते॥ ॥किमयंशिवरात्रिशब्दोरूढः॥किंवायौगिकः॥उतलाक्षणिकः॥ अथवायोगरूढइति॥ किंतावत्प्राप्तं॥रूढइति॥तिथिविशेषेशिवरात्रिशब्द

स्य संज्ञारूपेण स्मरणात्॥ तथा च नागरखंडे॥ माघमासस्य शेषे या प्रथमा फाल्गुनस्य च॥ कृष्णा चतुर्दशी सा तु शिव
रात्रिः प्रकीर्त्तितेति॥ कामिके॥ माघमासे सिते पक्षे विद्यते या चतुर्दशी॥ तद्रात्रिः शिवरात्रिः स्यात्सर्वपुण्यशुभावहेति।
यद्यप्यत्र शिवस्य रात्रिः शिवरात्रिरित्यवयवार्थः प्रतीयते तथापि योगात् रूढेर्बलवत्त्वाद्योगोऽत्र न ग्राह्यः॥ प्राबल्यं
चाश्वकर्णादिशब्देष्ववगम्यते॥ अश्वस्य कर्ण इत्यवयवार्थप्रतीतावपि तमुपेक्ष्य रूढ्या वृक्षविशेषवाचित्वस्वीका
रात्॥ ननु काकदंतपरीक्षासमानोऽयं विचारः॥ यद्ययं शिवरात्रिशब्दो रूढः यदि वा यौगिकः उभयथाप्यनुष्ठाने वि
शेषाभावात्॥ मैवं॥ अस्त्येवमहान् विशेषः॥ यौगिकत्वे शिवसंबंधिव्रतजातं सर्वस्यां रात्रावनुष्ठीयते सा सर्
वा शिवरात्रिः स्यात्॥ माघमासादिपदं च तदानीमुपलक्षणं भवेत्॥ रूढिपक्षे तु माघमासादेर्विशेषणत्वात्॥ त
हि शिष्टाया एकस्या एव तिथेः शिवरात्रित्वं॥ अतः कर्त्तव्य एव विचारः॥ तत्राहीनन्यायेन रूढिमेवाद्रियामहे॥ त
स्य च न्यायस्य संग्राहकावेतौ श्लोकौ भवतः॥ अहीनस्य द्वादशेति प्रकृतौ विकृतावुत॥ नहीन इति योगेन प्रकृतौ
तद्विकल्प्यतां॥ शीघ्रधीहेतुतो रूढेरहीने विकृताविदं॥ उत्कृष्य तां द्वादशत्वं सान्हास्यकृतकर्मणः॥ अयमर्थः॥

CC-0. In Public Domain. Digitization by eGangotri

ज्योतिष्टोमेश्रूयते॥तिस्रएवसान्हस्योपसदोद्वादशाहीनस्ययज्ञस्यसवीर्यत्वायेति॥अन्हासहवर्ततइतिसान्हः॥
एकदिननिष्पाद्योज्योतिष्टोमः॥तस्यप्राचीनेषुत्रिषुदिनेष्वंगत्वेनानुष्ठेयाहोमाउपसच्छब्दवाच्याः॥तास्तिस्रउपस
दोविधायपुनरहीनशब्दवाच्यस्यकर्मणोद्वादशोपसदोविधीयंते॥तत्रसंशयः॥किमिदंद्वादशोपसत्त्वंद्विरात्राद्य
हीनप्रकृतिभूतेसान्हशब्दवाच्येप्रकृतेज्योतिष्टोमेनिविशते॥आहोस्विदहीनशब्दवाच्येविकृतिरूपेद्विरात्राद
वुत्कृष्यतइति॥तदर्थमिदंचिंत्यते॥अहीनशब्दोयौगिकोरूढोवेति॥तत्रनहीनइतिव्युत्पत्तेर्विस्पष्टंप्रतिभासाद्योगि
कएवायं॥तदर्थश्चप्रकृतावुपपन्नः॥सांगप्रधानस्यसर्वस्यसाक्षाद्वाचकशब्देरेवोपदिष्टत्वेनहीनत्वाभावाद्विकृतौ
तुविशेषएववाचकशब्देरुपदिश्यते॥इतरत्सर्वमतिदेशात्प्राप्यते॥अतउक्तिसंकोचात्॥विकृतेहीनत्वं॥एवंचस
त्यहीनशब्दस्यज्योतिष्टोमेप्रवृत्तिसंभवात्प्रकरणानुग्रहणाच्चतत्रैवद्वादशत्वंनिविशते॥नचपूर्ववाक्यविहितेन
त्रित्वेनबाधःशंकनीयः॥वाक्ययोःसमानबलत्वेनव्रीहियववद्विकल्पोपपत्तेः॥तस्माज्ज्योतिष्टोमएवद्वादशत्व
विधिरितिप्राप्तेब्रूमः॥विकृतिरूपेद्विरात्रादाविदंद्वादशत्वंविधीयते॥कुतः अहीनशब्दस्यश्रौतप्रयोगबाहुल्ये

का॰मा॰ नतत्रैवरूढत्वात्॥ रूढिश्च शीघ्रबुद्धिहेतुत्वेन योगाद्बलीयसी योगेत्ववयवार्थं प्रथमतो निश्चित्य पश्चात्समु
१२५ दायार्थो निश्चेतव्य इति विलंबः॥ न चात्र प्रकरणविरोधः शंकनीयः॥ बलीयसा वाक्येन प्रकरणस्य —— बाधितत्वा
त्॥ तस्मादिदं द्वादशलं प्रकृतज्योतिष्टोमादुत्कृष्य विकृतिषु द्विरात्रादिषु निवेशनीयमिति॥ अत्र यथा रूढो हीन श॰
ब्दस्तथा शिवरात्रिशब्दोपि रूढ इति प्रथमः पक्षः॥ अपर आह॥ यौगिक एवायं शिवरात्रिशब्दः॥ कुतः॥ शिवसंबं
धमुपजीव्य तच्छब्दस्य प्रवृत्तत्वात्॥ तथा च स्कंदपुराणे॥ माघस्य कृष्णपक्षे या तिथिश्चैव चतुर्दशी॥ शिवरात्रि
स्तु सा ख्याता सर्वपापनिषूदनी॥ तस्य रात्रिः समाख्याता शिवरात्रिः शिवप्रिया॥ तस्यां सर्वेषु लिंगेषु सदा संक्रम॰
ते हरः॥ यानि कानि च लिंगानि चराणि स्थावराणि च॥ तेषु संक्रमते देवि तस्यां रात्रौ यतो हरः॥ शिवरात्रिस्ततः प्रो॰
क्ता तेन सा हरवल्लभेति॥ शिवरहस्ये॥ तत्प्रभृत्येव देवर्षे माघकृष्णचतुर्दशी॥ शिवरात्रिः समाख्याता प्रिये यं॰
त्रिपुरद्विष इति॥ अवंतिखंडे॥ माघफाल्गुनयोर्मध्ये असिता या चतुर्दशी॥ शिवरात्रिस्तु सा ख्याता सर्वपाप राम॰
निषूदनी॥ तस्माच्छिवसंबंधिनी रात्रिः शिवरात्रिरिति यौगिकोर्थः॥ प्रोक्षणीन्यायेन ग्रहीतव्यः॥ तस्य च न्यायस्य १२५

CC-0. In Public Domain. Digitization by eGangotri

संग्राहकावेतौ श्लोकौ ॥ संस्कारजातियोगेषु कं ब्रूते प्रोक्षणीरिति ॥ संस्कारं सार्वभौमत्वाज्जातिमुद्वेजनोक्तितः ॥
अन्योन्याश्रयतो नाद्यो न जातिः कल्प्यशक्तितः ॥ यौगिकं क्लृप्तशक्तित्वात्क्लृप्तिर्व्याकरणे स्थिता ॥ अयमर्थः ॥ दर्शपू-
र्णमासांगतया श्रूयते प्रोक्षणीरासादयतीति ॥ तत्र संशयः ॥ किमयं प्रोक्षणीशब्दोभिमंत्रणासादनाद्युदकसंस्कारं
ब्रूते ॥ किंवा जलावांतरजातिविशेषं आहोस्विद्योस्यं ते पात्राण्याभिरिति योगं ॥ तत्र संस्कारं ब्रूत इति तावत्प्राप्तं
कुतः ॥ सार्वभौमत्वात् ॥ सर्वेषु हि संस्कारविधिवाक्यादिप्रदेशेषु प्रोक्षणीशब्दः श्रूयते ॥ प्रोक्षणीरासादयेध्मा-
बर्हिरुपसादयेति प्रैषवाक्यप्रयोगः ॥ प्रोक्षणीरासादयतीति विधिवाक्यं ॥ एवमभिमंत्रणादिवाक्यान्यप्युदाहरणी-
यानि ॥ तस्मात्संस्कारं ब्रूत इत्येकः पक्षः ॥ जातिं ब्रूत इति पक्षांतरं ॥ लोके हि जलक्रीडासु प्रोक्षणीभिरुद्वेजिताः स्म
इत्युदकजातौ प्रयोगो दृश्यते ॥ तत्र न तावत्संस्कारं ब्रूत इत्याद्यः पक्ष उपपद्यते ॥ कुतः ॥ अन्योन्याश्रयत्वात् ॥ ना-
पि जातिं ब्रूत इति द्वितीयः पक्षो युक्तः ॥ उदकजातौ प्रोक्षणीशब्दशक्तेर्व्यवहारे पूर्वमक्लृप्तत्वेनातः परं शक्तेः कल्प-
नीयत्वप्रसंगात् ॥ न च योगेपि शक्तिः कल्पनीया व्याकरणेनैव क्लृप्तत्वात् व्याकरणे हि उक्षसेचन इत्यस्माद्धातोः

करणेल्युट्प्रत्ययेनशब्दोव्युत्पादितः॥ तथासतिप्रकर्षेणोक्ष्यते अनेनेति योगेनसेचनसाधनमुदकादिकंसर्वं
प्रोक्षणशब्दवाच्यंसंपद्यते॥ प्रकृतेतुस्त्रीशब्दवाच्यानामपांसेचनसाधनत्वात्तद्वचनस्यप्रोक्षणशब्दस्यङीप्
प्रत्ययांतत्वेनप्रोक्षणीरितिद्वितीयाबहुवचनांतःशब्दोनिष्पद्यते॥ नन्वहीनाधिकरणेरूढेःप्राबल्यमुक्तं॥ प्रोक्ष
ण्यधिकरणेचयोगस्यप्राबल्यमुच्यते॥ अतःपरस्परंविरोधः॥ मैवं॥ लब्धात्मिकाहिरूढिर्योगमपहरतीति॥ न
चप्रोक्षणीशब्देरूढिर्लभ्यते॥ वृद्धव्यवहारेणजातावव्युत्पादितत्वात्॥ अहीनशब्दोपिद्विरात्रादिषुनरूढेर्व्युत्पा
दितइतिचेत् न॥ व्याकरणेव्युत्पादितत्वात्॥ अह्नःखःक्रतावित्यनेन वाररुचेनवार्तिकेनाहन्शब्दात्खप्रत्यय
मुत्पाद्यतस्येनादेशंकृत्वाक्रतुविषयतयाव्युत्पादितोअहीनशब्दः॥ नन्वेवंसतिघट्टकुटीप्रभातन्यायस्तवप्रसः
ज्येत यतोहीनशब्देयोगंपरिहर्तुकामेनभवताव्याकरणमुपजीव्ययोगेपर्यवसानंकृतं॥ नायंदोषः॥ पूर्वपक्षिणोभि
मतेसमासलक्षणेयोगेपर्यवसानस्यानभिधानात्॥ नचनञ्समासोपिव्याकरणेषुव्युत्पादितइतिशंकनीयं॥
नञ्समासस्वीकारेसतिअयज्ञोवाएषइत्यादाविवाहीनशब्दस्याद्युदात्तत्वप्रसंगात्॥ मध्योदात्तोह्ययंश॰

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्द आम्नायते ।। तस्मात्सत्स्वपि योगसाम्येपि समासरूपयोगं पूर्वपक्ष्यभिमतं निराकृत्य श्रौतरूढिः सिद्धान्तिनास
माश्रिता ।। तामेव रूढिं प्रकटयितुं वररुचिना वार्त्तिकं कृतं अतः सत्यपि प्रकृतिप्रत्ययविभागे यौगिकत्वं न शंकितुं श
क्यते ।। तथा गोत्वजातौ रूढस्यापि गोशब्दस्यौणादिकसूत्रेषु गमेर्डो इति प्रकृतिप्रत्ययविभागं कृत्वा गच्छ नी
ति गौरिति व्युत्पत्तिः प्रदर्शिता ।। तद्वदत्राप्यवगंतव्यं ।। प्रोक्षणीशब्दे तु न रूढिज्ञापनाय किंचित्सूत्रं त्वत्तंत्रे विहित
मस्ति ।। किंतर्हि सर्वधातुसाधारणेनावयवार्थव्युत्पादकेन ल्युट्प्रत्ययेन व्युत्पादितत्वात् ।। यौगिक एवायं प्रोक्ष
णीशब्दः ।। तस्मात्प्रोक्षणीशब्दवच्छिवरात्रिशब्दो यौगिक इति द्वितीयः पक्षः ।। अन्ये तु पुनर्मन्यंते ।। लाक्षणिकोयं
शिवरात्रिशब्दः ।। तिथिवाचकेन तेन शब्देन तत्तिथौ क्रियमाणस्य व्रतविशेषस्य लक्ष्यमाणत्वात् ।। अत एवेशान
संहितायामुक्तं ।। शिवरात्रिव्रतं नाम सर्वपापप्रणाशनं ।। आचांडालमनुष्याणां भुक्तिमुक्तिप्रदायकं ।। अर्द्धरात्रा
दधश्चोर्ध्वं युक्ता यत्र चतुर्दशी ।। तत्तिथावेव कुर्वीत शिवरात्रिव्रतं व्रती ।। शिवरात्रिव्रते कार्यं भूतान्वितमहानिशि ।।
शिवरात्रिव्रतं देव करिष्ये शिवसन्निधौ ।। निर्विघ्नं कुरु मे देव भक्त्या ह्यमहेश्वरेति ।। नारदीयसंहितायां ।। अर्द्धरात्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युक्तायत्रमाघकृष्णचतुर्द्दशी ॥ शिवरात्रिव्रतंतत्रकुर्याज्जागरणंतथेति ॥ पद्मपुराणेपि ॥ अर्द्धरात्रादधश्चोर्ध्वं-
यदियुक्ताचतुर्द्दशी ॥ तत्तिथावेवकुर्वीतशिवरात्रिव्रतंव्रती ॥ स्कंदपुराणे ॥ शिवरात्रिव्रतंदेवकथयस्वमहेश्व
रेति ॥ नचकालवाचकस्यशब्दस्यलक्षकत्वमदृष्टचरमितिशंकनीयं ॥ कालवाचकाभ्याममावास्यापौर्णमा
सीशब्दाभ्यांयागत्रयरूपयोरिष्ट्योस्तत्कालसंबंधिन्योरुपलक्षितत्वात् ॥ अतएवश्रूयते ॥ यएवंविद्वान्पौ
र्णमासीयजतेयएवंविद्वानमावास्यांयजतइति ॥ स्मृतिष्वपिसर्वत्रतिथिवाचकैःशब्दैस्तत्संबंधिनोव्रतविशे
षालक्ष्यंते ॥ स्कंदपुराणे ॥ जन्माष्टमीनैवकृताकदाचित्कल्पायुतंपच्यतेरौरवेष्विति ॥ ऋष्यशृंगोपि ॥ एका
दशींतुकुर्वीतक्षीयतेद्वादशीयदेति ॥ एवमन्यत्राप्युदाहार्यं ॥ तस्माल्लाक्षणिकोयंशिवरात्रिशब्दइतितृतीयः
पक्षः ॥ अथसिद्धांतंब्रूमः ॥ योगरूढएवायंशिवरात्रिशब्दः ॥ योगोद्वितीयपक्षोपन्यासेनदर्शितः ॥ रूढिश्च
प्रथमोपन्यासेन ॥ तत्रैकस्यस्वीकारेसत्यन्यविषयंशास्त्रंतदनुग्राहकउदात्हतोन्यायश्चबाध्येत ॥ नचयौ
गिकत्वेसतिशिवव्रतोपेतेष्वन्येष्वपितिथ्यंतरेषुशिवरात्रित्वंप्रसज्ज्येतेतिवाच्यं ॥ तस्मातिप्रसंगस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूढ्यानिवारणात्॥ यथापंकजशब्दे पंकाज्जायत इतियोगंस्वीकृत्य भेकादिष्वतिप्रसंगो रूढिस्वीकारेण नि
वार्यते॥ तद्वदत्रापियोगरूढतायांनकोप्यतिप्रसंगः॥ नचमुख्येसंभवतिलक्षणाश्रयणमुचितं॥ अथोच्यते॥
लक्षणाया अभावे व्रतविषत्वं नस्यादिति॥ तन्न॥ बहुव्रीहिस्वीकारे योगेनैवतत्सिद्धेः॥ शिवस्यप्रियारात्रिर्यस्मि
न्व्रतेंगत्वेनविहिता॥ तद्व्रतंशिवरात्र्याख्यंतस्मान्निर्मथ्यन्यायेनात्रयोगरूढः शिवरात्रिशब्दः॥ तस्यात्रन्या
यस्यसंग्राहकः श्लोकः॥ निर्मथ्योयौगिकोयोगरूढोवायोगभासनात्॥ यौगिकोऽचिरजातेग्नौ नियतेयोग
रूढिभाक्॥ अस्यायमर्थः॥ इष्टकाचयनेश्रूयते॥ निर्मथ्येनेष्टकाः पचंतीति॥ तत्रसंशयः॥ किमयं निर्मथ्य
शब्दो यौगिकः किंवायोगरूढइति॥ निःशेषेण मथ्यत इतियोगस्यप्रतीयमानत्वात्प्रोक्षणीन्यायेन योग इ
ति पूर्वः पक्षः॥ अत्रद्वावग्नी विद्येते चिरनिर्मथितोऽचिरनिर्मथितः॥ चयनंप्रक्रम्योखांनिर्मापयतस्यामुखा
यांकेंचित्कालंधारणायपयोग्निर्निर्मथ्यते सोचिरनिर्मथितः॥ तेनेष्टकाः पच्यंते॥ तस्यैवप्रत्यासन्नत्वात्॥ त
थाचमथनस्याग्निहितयसाधारण्येप्यचिरनिर्मथितमग्निंनियंतुंरूढिराश्रयणीया॥ यथावानावनीतंघृ

CC-0. In Public Domain. Digitization by eGangotri

तमित्यत्रनवनीतजन्यत्वयोगस्यचिराचिरयोरुभयोः साधारण्येपिनूतनएवघृतेनावनीतशब्दोलोकेप्रसि
द्धेर्नियम्यते॥तद्वदत्राप्यवगंतव्यं॥तथाचसतिप्रतीयमानयोगस्यापरित्यक्तत्वान्नियत्यैरूढिस्वीकाराच्चयोग
रूढोयंनिर्मथ्यइतिराद्धांतः॥ अनेनैवन्यायेनशिवरात्रिशब्देपियोगरूढिराश्रीयते॥तत्रशिवस्यरात्रिःशिवरा
त्रिरितितत्पुरुषसमासेनयोगेनप्रवर्त्तमानःशब्दोरूढ्यामाघकृष्णचतुर्द्दशीरूपेकालविशेषेनियम्यते॥शिवस्य
रात्रिर्यस्मिन्व्रतेइतिबहुव्रीहिसमासेनयोगेनप्रवृत्तःशब्दोरूढ्याव्रतविशेषेनियम्यते॥तच्चशिवरात्रिव्रतमेका
दशीजयंतीव्रतवत्संयोगपृथक्त्वन्यायेननित्यंकाम्यंचेत्युभयविधं॥तत्रनित्यत्वमकारणप्रत्यवायवीप्सानित्य
निश्चलशब्दैरवगंतव्यं॥तत्राकरणेप्रत्यवायः स्कंदपुराणेपठ्यते॥परात्परतरंनास्तिशिवरात्रिःपरात्परं॥ न
पूजयतिभक्त्येशंरुद्रंत्रिभुवनेश्वरं॥ जंतुर्जन्मसहस्रेषुभ्रमतेनात्रसंशयः॥वीप्सापितत्रपठिता॥वर्षेवर्षेम
हादेविनरोनारीपतिव्रता॥शिवरात्रौमहादेवंकामंभक्त्याप्रपूजयेदिति॥ नित्यनिश्चलशब्दौचतत्रैव॥माघ
कृष्णचतुर्दश्यांयः शिवंशंसितव्रतः॥मुमुक्षुःपूजयेन्नित्यंसलभेदीप्सितंफलमिति॥ अर्णवोयदिवाशुष्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्सीयतेहिमवानपि॥ मेरुमंदरलेकाश्च श्रीशैलोविंध्यएवच॥ चलंत्येतेकदाचिद्वै निश्चलंहि शिवव्रतमिति॥
काम्यत्वंचफलश्रवणादवगंतव्यं॥ तच्च स्कंदपुराणे॥ शिवंचपूजयित्वायोजागर्त्तिचचतुर्दशीं॥ मातुःपयोधरर
संनपिबेत्सकदाचन॥ यदीच्छेद्वांछितान्भोगान् दिविदेवमनोरमान्॥ आगमोक्तविधिंकृत्वाप्राप्नोतिपरमंपदं॥
ममभक्तस्तुयोदेविशिवरात्रिमुपोषकः॥ गणत्वमक्षयंदिव्यंअक्षयंशिवशासनं॥ सर्वान्भुक्त्वामहाभोगान्मृतो
भूयोनजायतइति॥ काम्यव्रतस्येशानसंहितायांवर्षसंख्यापठ्यते॥ एवमेतद्व्रतंकुर्यात्प्रतिसंवत्सरंव्रती॥ द्वा
दशाब्दिकमेतत्स्याच्चतुर्विंशाब्दिकंतुवा॥ सर्वान्कामानवाप्नोतिप्रेत्यचेहचमानवइति॥ नित्यकाम्यरूपस्यास्य
व्रतस्यसर्वाधिकारित्वमीशानसंहितायामुक्तं॥ शिवरात्रिव्रतंनामसर्वपापप्रणाशनं॥ आचांडालमनुष्याणां
भुक्तिमुक्तिप्रदायकमिति॥ अधिकारिनियमाः स्कंदपुराणे दर्शिताः॥ माघमासेतुकृष्णायाफाल्गुनादौचतुर्द
शी॥ साचपुण्यातिथिर्ज्ञेयासर्वपातकनाशिनी॥ अहिंसासत्यमक्रोधोब्रह्मचर्यंदयाक्षमा॥ शांतात्माक्रोधहीन
श्चतपस्वीत्यनसूयकः॥ तस्मैदेयमिदंदेविगुरुपादानुगोयदि॥ अन्यथायोददातीदं सतदानरकंव्रजेदिति॥ उक्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धिकारिणानुष्ठेयंव्रतस्वरूपंत्रिविधं॥ उपवासोजागरणंपूजाच॥ तदुक्तंनागरखंडे॥ उपवासप्रभावेनबलादपिच
जागरात्॥ शिवरात्रेस्तथा तस्यलिंगस्यापिचपूजया॥ अक्षयान्लभतेभोगान् शिवसायुज्यमाप्नुयादिति॥ स
त्यखंडे॥ स्वयंचलिंगमभ्यर्च्यसोपवासः सजागरः॥ अजानन्नपिनिष्पापोनिषादोगणतांगतः॥ अत्रेदंचिंत्यते॥
किमेताउपवासजागरपूजाव्रतस्यस्वरूपेस्वेच्छयाविकल्प्यंते। उतसमुच्चिताएवेति॥ तत्रविकल्प्यंतइतितावत्प्राप्तं
॥ कुतः॥ एकैकस्येतरनिरपेक्षतयाविधानात्॥ तथाहिस्कंदपुराणे॥ केवलोपवासविधिः पठ्यते॥ अखंडितव्र
तोयोहिशिवरात्रिमुपोषयेत्॥ सर्वान्कामानवाप्नोतिशिवेनसहमोदतइति॥ तथाकेवलजागरणंपठ्यते॥ कश्चि
त्पुण्यविशेषेणव्रतहीनोपियःपुमान्॥ जागरंकुरुतेतत्रसरुद्रसमतांव्रजेत्॥ तथाकेवलपूजापठ्यते॥ यःपूजय
तिभक्त्येशमनेकफलतांव्रजेदिति॥ तस्मादुपवासादयस्त्रयोपिविकल्प्यंते॥ यदिनागरखंडसत्यखंडयोःसमुच्च
यविधिरस्तीत्युच्यते॥ तर्हिप्रत्येकंवासमुदायोवायथेष्टमनुष्ठीयतामितिप्राप्तेब्रूमः॥ वैश्वानरविद्योपासनन्याये
नसमुदायएवात्रानुष्ठेयः॥ तस्यचन्यायस्यसंग्राहकावेतौश्लोकौ॥ वैश्वानरमुपास्तेत्रप्रत्येकसमुदायतः॥ विकल्पः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

समुदायोवानियतोद्विविधाद्विधेः॥ विकल्पइतिचेन्नैवंसमुदायप्रशस्तितः॥ अवयुत्यानुवादेनप्रत्येकोक्त्युपपत्ति
तइति॥ अयमर्थः॥ छंदोगेराम्नायते॥ वैश्वानरउपास्तइति॥ विद्युल्लोकादित्यवाय्वाकाशोदकपृथिवीरूपैःषड्भि
रवयवैरुपेतोवयवीसर्वात्मकोविराट्॥ पुरुषोवैश्वानरशब्दवाच्यः॥ तत्रसंशयः॥ किंविद्युल्लोकाद्यवयवाअवय
वीचप्रत्येकंविकल्पेनोपास्याउतावयव्येवनियमेनोपास्यइति॥ विकल्पइतितावत्प्राप्तं॥ कुतः द्विविधस्यविधेः
श्रूयमाणत्वात्॥ प्राचीनशालसत्ययज्ञेंद्रप्रद्युम्नेडिविडोद्दालकनामभिः षड्भिर्महर्षिभिः क्रमेणविद्युल्लोकादयः
षडवयवाः प्रत्येकमुपासिताः॥ तद्वृत्तांतकथनपरेषुवाक्येषुषण्णामवयवानांप्रत्येकमुपास्तिविधयोनियमाश्च
फलसहिताउपलभ्यंते॥ पुनश्चांतेषड्भ्यस्तेभ्योमहर्षिभ्योश्वपतीराजासमुदायोपास्तिमवोचत॥ अतोद्विविधवि
धिबलेनयथेच्छंविकल्पइतिप्राप्तेब्रूमः॥ समुदायएवात्रनियमेनोपासितव्यः॥ कुतः। प्रस्तुतत्वात्॥ अवयवोपा
स्तिवाक्यान्यवयुत्यानुवादरूपत्वेनाप्युपपद्यंते॥ तस्मात्समुदायोपास्यइतिराद्धांतः॥ अनेनन्यायेनप्रकृतेप्युप
वासादीनांत्रयाणांसमुदायस्यैवव्रतरूपत्वं॥ ननुक्वचिदुपवासादित्रयंविधायपुनःपक्षांतररूपेणोपवासव्यति

CC-0. In Public Domain. Digitization by eGangotri

 रित्कंहूयंपठ्यते॥अथवाशिवरात्रिंच पूजाजागरणैर्नयेदिति॥नायंदोषः॥अथवेत्यनुकल्पोपक्रमेणाशक्तविषय
 त्वोपपत्तेः॥अत्रव्रतेविहितानांत्रयाणांपरस्परमंगांगि भाव बोधकप्रमाणाभावाद्याग्नेयादिवद्यागवत्प्रत्येक
कालसंबंधविधानात्फलवि धानाच्चसमप्राधान्यंद्रष्टव्यं॥अस्यैवोपोद्बलकंलिंगमभिधीयते॥लुब्धकस्य भ
द्रास्य जन्मप्राप्तवतोदुर्वाससा सह संवादे पठ्यते॥कृष्णपक्षेचतुर्दश्यांन किंचिन्मृगमाप्तवान्॥अण्वपिप्राणर
क्षार्थंक्षुधासंपीडितोवसदित्युपक्रम्यधनुःकोट्याहतान्येव बिल्वपत्राणि मानद।पतितानिमहाराजशंभोः शिर
सि भूतले॥तत्रैवतस्थौराजेंद्रसर्वरात्रमतंद्रितः॥रात्रिशेषंस्थितोव्याधः स्तब्धदृष्टिरनामिषः॥प्रभातेविमलेजाते
दृष्ट्वातत्रैवशंकरं॥बिल्वपत्रैर्नरश्रेष्ठकंदमूलैश्चपारितइति॥एतस्मिन्यथोक्ततिथिंनिर्णेतुंइदंविचार्यते॥किंव्र
तांतरेष्विवात्राप्युदयास्तमयवेध आदर्तव्यः किंवाप्रदोषवेधः आहोस्विन्निशीथवेधइति॥तत्रपूर्वेद्युरुदयेत्र
योदशीवेधः परेद्युरस्तमयेदर्शवेधइत्युदयास्तमयवेधोयुक्तः॥तस्यव्रतांतरेषुक्लृप्तत्वात्॥क्लृप्तस्यक्लृप्त्याद्बली
यस्त्वात्॥मैवं॥सामान्याद्विशेषस्य बलीयस्त्वात्॥सामान्यरूपोह्युदयास्तमयवेधः॥सर्वतिथिषुसमानत्वात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशेषरूपौ प्रदोषनिशीथवेधौ॥ कृष्णचतुर्द्दशीलक्षणे तिथिविशेषे शिवरात्र्याख्यं व्रतविशेषमुपजीव्य प्रवृत्तत्वा
त्॥ एतदेवाभिप्रेत्य ईशानसंहितायामुक्तं॥ उदयेन्विताः क्वचिद्ग्राह्याः क्वचिदस्तमयेन्विताः॥ व्रतिभिस्तिथयो य
स्मात्तद्वर्जयित्वा व्रतं त्विदमिति॥ अस्मिंस्तु व्रते प्रदोषवेधो वायुपुराणे दर्शितः॥ त्रयोदश्यस्तगे सूर्ये चतसृष्वेव ना
डिषु॥ भूतविद्धा तु या तत्र शिवरात्रिव्रतं चरेदिति॥ स्मृत्यंतरेपि॥ प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुर्द्दशी॥ रात्रौ
जागरणं यस्मात्तस्मात्तां समुपोषयेदिति॥ कामिके॥ आदित्यास्तमये काले अस्ति चेद्या चतुर्द्दशी॥ तद्रात्रिः शिवरा
त्रिः स्यात्सा भवेदुत्तमोत्तमेति॥ निशीथवेधो नारदीयसंहितायां दर्शितः॥ अर्द्धरात्रयुता यत्र माघकृष्णचतुर्द्दशी
॥ शिवरात्रिव्रतं तत्र सोश्वमेधफलं लभेदिति॥ स्मृत्यंतरेपि॥ भवेद्यत्र त्रयोदश्यां भूतव्याप्ता महानिशा॥ शिवरा
त्रिव्रतं तत्र कुर्याज्जागरणं तथेति॥ ईशानसंहितायां॥ माघकृष्णचतुर्द्दश्यामादिदेवो महानिशि॥ शिवलिंगत
योद्भूतः कोटिसूर्यसमप्रभः॥ तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रते तिथिः॥ अर्द्धरात्रादधश्चोर्ध्वं युक्ता यत्र चतु
र्द्दशी॥ तत्तिथावेव कुर्वीत शिवरात्रिव्रतं व्रती॥ नार्द्धरात्रादधश्चोर्ध्वं युक्ता यत्र चतुर्द्दशी॥ नैव तत्र व्रतं कुर्यादायुरैश्वर्य

ह्यानि देति॥ व्याप्यार्द्धरात्रं यस्यां तु लभ्यते या चतुर्द्दशी॥ तस्यामेव व्रतं कार्यं मत्प्रसादार्थिभिर्नरैः। पूर्वेद्युर्वा परेद्युर्वा महा
निशि चतुर्द्दशी॥ व्याप्ता सा दृश्यते यस्यां तस्यां कुर्याद्व्रतं नरः॥ लिंगाविर्भावकाले तु व्याप्ता ग्राह्या चतुर्द्दशी॥ तदूर्ध्वाधो
न्विता भूता सा कार्या व्रतिभिः सदा॥ मम प्रियकरी ह्येषा माघकृष्णा चतुर्द्दशी॥ महानिशान्विता यास्तु तत्र कुर्याद्दिदं
व्रतमिति॥ एवं सति पूर्वेद्युरेव यत्र प्रदोषनिशीथोभयव्याप्तिस्तत्र माचरणीयं॥ पूर्वेद्युरेवोभयव्याप्तौ स्कंदपुराणे प
ठ्यते॥ त्रयोदशी यदा देवी दिनभुक्तिप्रमाणतः॥ जागरे शिवरात्रिस्यान्नि शिपूर्णा चतुर्द्दशी॥ दिनभुक्तिरस्तमयः
परेद्युरेवोभयव्याप्तौ कामिके पठ्यते॥ निशाद्वये चतुर्द्दश्यां पूर्वा त्याज्या परा शुभेति॥ दिनद्वये प्युभयव्याप्तिस्तु न संभ
व्यते॥ यामद्वये वृद्धेरभावात्॥ -- ॥ दिनद्वये प्युभ
यव्याप्त्यभावोपि न संभाव्यते॥ यामद्वयक्षयस्याभावात्॥ एकैकस्मिन् दिन एकैकव्याप्तौ तु कथमिति चेत्॥ सा॰
ह्येवं प्रसज्यते॥ पूर्वेद्युर्निशीथव्याप्तिः परेद्युः प्रदोषव्याप्तिरिति। तत्रैकव्याप्तेर्द्दिनद्वये समानत्वेपि जयायोगस्य प्र
शस्तत्वाद्दशीयोगस्य निंदितत्वाच्च पूर्वेद्युरेवोपवासः॥ जयायोगप्राशस्त्यं चानेकवचनैरादृतत्वादवगम्यते॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा च स्कंदपुराणे पठ्यते ॥ कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिचतुर्द्दशी ॥ एताः पूर्वयुताः कार्यास्तिथ्यंते पारणं भवेत्
जन्माष्टमी रोहिणी च शिवरात्रिस्तथैव च ॥ पूर्वविद्धैव कर्त्तव्या तिथिभांते च पारणं ॥ श्रावणी दुर्गनवमी तथा दुर्वाष्टमी
च या ॥ पूर्वविद्धा तु कर्त्तव्या शिवरात्रिर्बलेर्दिनमिति ॥ जयं
ती शिवरात्रिश्च कार्ये भद्राजयान्विते इति ॥ नागरखंडे ॥ माघफाल्गुनयोर्मध्ये असिता या चतुर्द्दशी ॥ अनंगेन समा
युक्ता कर्त्तव्या सा सदा तिथिरिति ॥ पद्मपुराणे ॥ अर्द्धरात्रात्पुरस्ताच्चेज्जयायोगो यदा भवेत् ॥ पूर्वविद्धैव कर्त्तव्या शिवरा
त्रिः शिवप्रियैरिति ॥ ब्रह्मवैवर्त्ते ॥ रुद्रव्रतेषु सर्वेषु कर्त्तव्या संमुखी तिथिः ॥ अन्येषु व्रतकल्पेषु परयुक्ता मुपावसेदि
ति ॥ दर्शयोगनिंदा च स्कंदपुराणे दर्शिता ॥ महतामपि पापानां दृष्टा वै निःकृतिः पुरा ॥ न दृष्टा कुर्वतां पुंसां कुहूयुक्तां
तिथिं शिवामिति ॥ अन्यान्य ¯ पियानि कानि चिद्दर्शयोगनिंदावचनानि तत्र तत्र स्मर्यंते ॥ तानि सर्वाण्यस्मिन्विषये ५
योजनीयानि ॥ यदा पूर्वेद्युर्निशीथादूर्ध्वं प्रवृत्ता चतुर्द्दशी परेद्युः क्षयवशान्निशीथादर्वागेव समाप्ता तदा पूर्वेद्युः प्र
दोषनिशीथव्याप्तेरुभयोरप्यसंभवात्परेद्युः प्रदोषव्याप्तेरेकस्याः सद्भावाच्च परविद्धैव ग्राह्या ॥ एतदेवाभिप्रेत्य स्म

CC-0. In Public Domain. Digitization by eGangotri

का॰मा॰ र्यते ॥ माघासिते भूतदिनं कदाचिदुपैति योगं यदि पंचदश्या ॥ जयाप्रयुक्तां न तु जातु कुर्याच्छिवस्य रात्रिं प्रियकृ
१३२ च्छिवस्येति ॥ यदा पूर्वेद्युः प्रदोषादूर्ध्वं प्रवृत्ता चतुर्दशी परेद्युः क्षयवशात्प्रदोषादर्वागेव समाप्ता तदा परेद्युर्व्याप्ति
द्वयाभावात्पूर्वेद्युर्निशीथव्याप्तेः सद्भावाज्जयायोगाच्च पूर्वेद्युरेवोपवासः ॥ अत्रायं विवेकः संपन्नः ॥ दिनद्वये निशी
थव्याप्तौ तदव्याप्तौ च प्रदोषव्याप्तिर्नियामिका ॥ तथा दिनद्वयेपि प्रदोषव्याप्तौ तदव्याप्तौ च निशीथव्याप्तिर्नियामि
का ॥ एकैकस्मिन् दिन एकैकव्याप्तौ जयायोगो नियामक इति ॥ अस्य शिवरात्रिव्रतस्याहोरात्रसाध्यत्वेनाह्नि रा
त्रौ च संबंधे साधारणे सति अहर्वैधमुपेक्ष्य प्रदोषनिशीथयोरेव कुतः शास्त्राणां पक्षपात इति चेत् ॥ रात्रेरत्र प्रधान
त्वादिति ब्रूमः ॥ तत्प्राधान्येन चोपपत्तिः स्कंदपुराणे पठ्यते ॥ निशि भ्रमंति भूतानि शक्तयः शूलभृद्यतः ॥ अतस्त
स्यां त्रयोदश्यां सत्यां तत्पूजनं भवेदिति ॥ तस्यां त्रयोदश्यामिति व्यधिकरणे सप्तम्यौ ॥ तथा चायमर्थः संपद्यते ॥
त्रयोदशीनिशीथे तस्यां चतुर्दश्यां विद्यमानायां शिवपूजनं भवेदिति ॥ नागरखंडेपि ॥ माघमासस्य कृष्णायां चतु राम॰
र्दश्यां सुरेश्वर ॥ अहं यास्यामि भूपृष्ठे रात्रौ नैव - दिवा कलौ ॥ लिंगेषु च समस्तेषु चरेषु स्थावरेषु च ॥ संक्रमिष्या १३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्यसंदिग्धंवर्षपाप विशुद्धये॥ रात्रौतस्यांहि मेपूजां यः करिष्यतिमानवः॥ मंत्रैरेतैः सुरश्रेष्ठ विपापः सभविष्यतीति॥
साचशिवरात्रिचतुर्दशी त्रिधाभवति॥ एकतिथ्यात्मिका। तिथिद्वयात्मिका॥ तिथित्रयात्मिका चेति॥ तत्र सूर्यो
दयमारभ्यप्रवृत्तापरदिनोदयपर्यंतैकतिथ्यात्मिका॥ सावेधदोषाभावात्प्रशस्ता॥ तिथिद्वयात्मकत्वंचद्वेधाभवति
॥जयायोगेनदर्शयोगेनच॥ तत्रयोगद्वयमेकैकस्मिन्विषयेप्रशस्तं॥ सच विषयविशेषः पूर्वमेवोदाहृतः॥ तिथित्रया॰
त्मकत्वंत्वतिप्रशस्तं॥ एतदेवाभिप्रेत्य पुराणे पठ्यते॥ त्रयोदशीकलाप्येका मध्येचैवचतुर्दशी॥ अंतेचैवसिनी
वालीत्रिस्पृश्यांशिवमर्चयेत्॥ यथात्रिस्पृशीप्रशस्तातथावारविशेषेणयोग विशेषेणच प्रशस्ताभवति॥ तथा
चस्कंदपुराणे पठ्यते॥ माघकृष्णचतुर्दश्यां रविवारोयदा भवेत्॥ भौमोवाथभवेद्देवि कर्त्तव्यंव्रतमुत्तमं॥ शिव
योगस्ययोगे वै तद्भवेदुत्तमोत्तमं॥ शिवरात्रिव्रतंत्वेतत्तद्भवेदुत्तमोत्तममिति॥ ननुयदापूर्वविद्धायामुपवास॰
स्तदापरेद्युः किंतिथ्यंते पारणंभवति किंवातिथिमध्ये। शास्त्रंतु पक्षद्वयेपि समानं॥ तत्रतिथ्यंतपारणवचनानिपू
र्वमुदाहृतानि॥ तिथिमध्यपारणवचनंतु स्कंदपुराणे पठ्यते॥ उपोषणंचतुर्दश्यांचतुर्दश्यांतु पारणम्॥ कृतैःसु॰

CC-0. In Public Domain. Digitization by eGangotri

कृतलक्षैश्चलभ्यते वाश्ववानवा॥ ब्रह्मा स्वयं पंचतुर्वक्त्रैः पंचवक्त्रैस्तथाप्यहं॥ सिक्थे सिक्थे फलं तस्य शक्तो
वक्तुं न पार्वति॥ ब्रह्मांडोदरमध्ये तु यानि तीर्थानि संति वै॥ संस्थितानि भवं तीह भूतायां पारणे कृते॥ तिथीना
मेव सर्वासामुपवासव्रतादिषु॥ तिथ्यंते पारणं कुर्याद्विना शिवचतुर्दशीमिति॥ बाढं॥ अस्ति हि द्विविधं शास्त्रं
॥ तस्य च द्विविधस्य शास्त्रस्य प्रतिपत्तिकरणोक्तन्यायेन व्यवस्था द्रष्टव्या॥ यदा यामत्रयादर्वागेव चतुर्दशी परि
समाप्यते॥ तदा तिथ्यंते पारणं॥ यदा तु चतुर्दशी याम त्रयमतिक्रमति तदा चतुर्दशीमध्ये पूर्वाण्हे पारणं कुर्यात्
॥ ॥ इति चतुर्दशीनिर्णयः॥ ॥अथ पंचदशी निर्णीयते॥ ॥सा द्विविधा॥ पौर्णमास्यमावास्या च॥ तत्र पौ
र्णमास्यां परस्परं विरुद्धानि वाक्यान्युपलभ्यंते॥ तत्र परविद्धाया ग्राह्यत्वं विष्णुधर्मोत्तरे॥ एकादश्यष्टमी षष्ठी
पौर्णमासी चतुर्दशी॥ अमावास्या तृतीया च उपोष्याः स्युः परान्विताः॥ परविद्धानिषेधः पूर्वविद्धाविधिश्च ब्रह्म
पुराण पद्मपुराणयोः॥ षष्ठ्येकादश्यमावास्या पूर्वविद्धा तथाष्टमी॥ पूर्णिमा परविद्धा च नोपोष्यं तिथिपंचकं॥ पूर्व
विद्धा तु कर्त्तव्या सप्तमी व्रतिभिर्नरैः॥ पौर्णमासी महीपाल परा या नियमां गतेति॥ पूर्वविद्धा ग्राह्यत्वं च युग्मवाक्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ चतुर्द्दश्या च पूर्णिमेति ॥ एवं परस्परविरोधे सति या व्यवस्था सा ब्रह्मवैवर्त्ते दर्शिता ॥ ॥ पूर्वविद्धा न क
र्त्तव्या अमावास्या च पौर्णिमा ॥ वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तममिति ॥ सावित्री राजकन्या तयाचीर्णं व्रतं
सावित्रीव्रतं ॥ तच्च भविष्योत्तरपुराणे दर्शितं ॥ कथयामि कुलस्त्रीणां महिम्नो वर्द्धनं परं ॥ यथा चीर्णं व्रतं पूर्वं
सावित्र्या राजकन्ययेति ॥ एतच्च पौर्णमास्याममावास्यायां च विहितं ॥ तस्मिन्व्रते पूर्वविद्धा ग्राह्या ॥ व्रतान्तरे पू
र्वविद्धा न कर्त्तव्या किंतु परविद्धैव कर्त्तव्येति परस्परविरुद्धस्य शास्त्रद्वयस्य व्यवस्था ॥ यदा तु चतुर्द्दश्य ष्टाद
श नाडिका भवति तदा सावित्रीव्रतमपि तत्र परित्याज्यं ॥ भूतोष्टादशनाडीभिर्दूषयत्युत्तरां तिथिमिति स्मृतेः ॥
योयं पौर्णमासीनिर्णयः स एवामावा स्यायाम प्यवगंतव्यः ॥ तत्रापि सावित्रीव्रतं पूर्वदिने कर्त्तव्यं व्रतांत
राण्युत्तरदिने ॥ अस्यां च व्यवस्थायां ब्रह्मवैवर्त्तवचनं पूर्वमुदाहृतं ॥ स्कंदपुराणेपि ॥ भूतविद्धा सिनीवाली न तु
तत्र व्रतं चरेत् ॥ वर्जयित्वा तु सावित्रीव्रतं तु शिखिवाहनेति ॥ एवं च सति युग्मशास्त्रं सावित्रीव्रतव्यतिरिक्तेषु
व्रतेषु द्रष्टव्यं ॥ अन्ये तु अपि ॥ नागविद्धा तु या षष्ठी सप्तम्या च युताष्टमी ॥ दशम्येकादशी विद्धा त्रयोदश्या चतुर्द्दशी

का॰मा॰ ।।भूतविद्धाप्यमावास्या नग्राह्या मुनिपुंगवैः।।उत्तरोत्तरविद्धास्ताः कर्त्तव्याःकाठकीश्रुतिरिति।। पद्मपुराणेपि
१२४ ।।षष्ठ्यष्टमीतथादर्शःकृष्णपक्षेत्रयोदशी।।एताःपरयुताःकार्याःपराःपूर्वेणसंयुताइति।।यत्तुनारदीयपुराणे ।।
दर्शंचपौर्णमासंचपितुःसांवत्सरंदिनं।।पूर्वविद्धमकुर्वाणोनरकंप्रतिपद्यतइति तत्सावित्रीव्रतविषयंश्राद्धविषयं
वा।।अमावास्यायामिवपौर्णमास्यामपिश्राद्धंविहितं।। तथाचपितामहः।। अमावास्याव्यतीपातपौर्णमास्यष्ट
कासुच।।विद्वान्श्राद्धमकुर्वाणः प्रायश्चित्तीयतेहिसइति।।अमावास्याश्राद्धस्यचपार्वणरूपत्वमपराण्हस्य
तत्कर्मकालत्वंकुतपस्यप्रारंभकालत्वमित्येतत्त्रितयंप्रतिपत्करणेप्रत्याब्दिकनिर्णयेप्रपंचितं।।तथासति अपरा
ण्हस्यकर्मकालत्वात्पूर्वेद्युरेववापरेद्युरेववापराण्हव्यापिन्यमावास्याग्रहीतव्या।।तत्रापराण्हव्यापिन्याःपूर्वति
थेर्ग्राह्यतामाहहारीतः।।यस्यांसंध्यागतःसोमोमृणालमिवदृश्यते।। अपराण्हेतुयातस्यांपिंडानांकरणंध्रुवं
मिति।। यत्तुकार्ष्णाजिनिनोक्तं।।भूतविद्धममावास्यांमोहादज्ञानतोपिवा।।श्राद्धकर्मणियेकुर्युस्तेषामायुःप्र राम॰
हीयतइति।।तदपराण्हव्याप्त्यभावविषयंद्रष्टव्यं।।अपराण्हव्यापिन्याउत्तरतिथेर्ग्राह्यतामाहहारीतः।।अपरा १३४

CC-0. In Public Domain. Digitization by eGangotri

ण्हः पितृणां तु या परापह्णानुयायिनी॥ साग्राह्यापितृकार्येतुनपूर्वास्त्वानुयायिनीति॥ उभयत्रापराण्हव्यापित्वंद्वे
धाभिद्यते॥ एकदेशेनकार्त्स्न्येनचेति॥ एकदेशव्याप्तिश्चद्वेधाभिद्यते॥ वैषम्येणसाम्येनचेतितत्रवैषम्येणैकदेश
व्याप्तौमहत्त्वेननिर्णेतव्यं॥ तथाचस्मृतिः॥ अपराण्हद्वयव्यापिन्यमावास्यायदाभवेत्॥ तत्राल्पत्वमहत्त्वाभ्यां
निर्णयःपितृकर्मणीति॥ महत्त्वेनग्राह्येत्यभिप्रायः॥ तत्रशिवराघवसंवादेस्पष्टमभिहितः॥ अल्पापराण्हेत्याज्या
माग्राह्यास्याद्यधिकाभवेदिति॥ साम्येनैकदेशव्याप्तौखर्वादिशास्त्रेणनिर्णयः॥ साम्येनोभयत्रैकदेशव्याप्तिश्चत
त्तिथेर्वृद्धिक्षयसाम्यैस्त्रेधाभिद्यते॥ तथाहि॥ पूर्वेद्युरपराण्हस्यद्वितीयघटिकामारभ्यपरेद्युरपराण्हस्यपं
चघटिकापर्यंतंयदातिथिर्वर्त्ततेतदापूर्वापराण्हस्यप्रथमघटिकांद्वितीयापराण्हस्यचरमघटिकांविहायशिष्टा
सुपंचसुवर्त्तमानत्वात्साम्येनैकदेशव्याप्तिर्भवति॥ तिथिश्चतदाघटिकाचतुष्टयेनवर्द्धते॥ यदाचपूर्वापराण्ह
स्यचरमघटिकायामुत्तरापराण्हस्यचप्रथमघटिकायांतिथिर्वर्त्ततेतदापिसाम्येनैकदेशव्याप्तिर्भवति॥ घटिकाचतु
ष्टयेनतिथिःक्षीयते॥ यदापूर्वापराण्हस्यचरमघटिकात्रयेद्वितीयापराण्हस्यचप्रथमघटिकात्रयेतिथिर्वर्त्ततेतदासा

CC-0. In Public Domain. Digitization by eGangotri

म्येनैकदेशव्याप्तिस्तद्वस्था॥ तिथिस्तु नवर्द्धते नापिक्षीयते किंतु समैव॥ ईदृशे विषये खर्वदर्पवाक्यान्निर्णयः॥ त
च्चखर्वादिवाक्यं सर्वतिथिसाधारण्येन प्रवृत्तत्वादमावास्यायामपि प्रवर्त्तते॥ तथामावास्यायामेव विशेषेण शिव
राघवसंवादे स एवार्थो दर्शितः॥ अमावास्या तु या हि स्यादपराण्हद्वयेपि सा॥ क्षये पूर्वापरा वृद्धौ साम्येपि च परा स्मृ
तेति॥ स्मृत्यंतरेपि॥ तिथिक्षये सिनीवालीतिथिवृद्धौ कुहूर्मता॥ साम्येपि च कुहूर्ज्ञेया वेदवेदांगवेदिभिरिति॥ चतु
र्द्दशीमिश्रा सिनीवाली प्रतिपन्मिश्रा कुहूः॥ तथा च व्यासः॥ दृष्टचंद्रा सिनीवाली नष्टचंद्रा कुहूर्मतेति॥ कार्त्स्न्येनो
भयत्रापराण्हव्याप्तावपि तिथिवृद्धित्वात्कुहूरेव ग्राह्या॥ यदा दिनद्वयेप्यपराण्हं न स्पृशति तदा साग्न्यनग्निकभे
देन व्यवस्था द्रष्टव्या॥ तदाह जाबालिः॥ अपराण्हद्वयव्यापी यदि दर्शस्तिथिक्षये॥ आहिताग्नेः सिनीवाली
निरग्न्यादेः कुहूर्मतेति॥ आदिशब्दात्स्त्रीशूद्रयोरपि ग्रहणं॥ तदाह लौगाक्षिः॥ सिनीवाली द्विजैः कार्या साग्नि
कैः पितृकर्मणि॥ स्त्रीभिः शूद्रैः कुहूः कार्या तथा चानग्निकैर्द्विजैरिति॥ एवं शास्त्रार्थे व्यवस्थिते सति यानि बहुविधा
निवाक्यानि तानि सर्वाणि प्रोक्तेष्वमावास्याभेदेष्वन्यतमविषयत्वेन यथायोगं योजनीयानि॥ तथा हि॥ तत्र ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृद्धबौधायन आह॥ मध्यान्हात्परतो यत्र चतुर्दश्यनुवर्त्तते॥ सिनीवाली तु सा ज्ञेया पितृकार्ये तु निष्फलेति॥ बृह-
स्पतिरपि॥ मध्यान्हाद्यात्वमावास्या परस्तात्संप्रवर्त्तते॥ भूतविद्धा तु सा ज्ञेया न सा पंचदशी भवेदिति॥ मध्यान्हा
दूर्ध्वमपराण्हमतिक्रम्य परस्तादमावास्या प्रवर्त्तत इति व्याख्येयम्॥ तदेतद्वचनद्वयं परेद्युरेवापराण्हव्याप्तौ यो
जनीयं॥ यत्तु कात्यायनवचने पिंडान्वाहार्यकं श्राद्धं क्षीणे राजनि शस्यते॥ वासरस्य तृतीयेंशे नातिसंध्यासमी
पत इति पिंडानां पिंडपितृयज्ञांगभूतानामनुपश्चादाह्रियते क्रियत इति पिंडान्वाहार्यकं श्राद्धममावास्यं तत्क्षीणे
राजनीं द्रौ कर्त्तव्यं॥ वासरस्य तृतीयेंश इति अनेनैषन्न्यूनोपराण्हः सायान्हसहितोभिधीयते॥ तत्र नातिसंध्यास
मीपत इति सायान्हस्य प्रतिषेधे सत्यपराण्हः कर्मकालत्वेन परिशिष्यते॥ तथा च कर्मकालव्यापिनी तिथिर्ग्राह्ये
त्युक्तं॥ तत्रेंदुक्षयस्य चतुर्दश्याष्टमे प्रहरे प्रारंभः॥ अमावास्यायाः सप्तमे प्रहरे समाप्तिः॥ तदेतदुभयं कात्याय
न एवाह॥ अष्टमेंशे चतुर्दश्याः क्षीणो भवति चंद्रमाः॥ अमावास्याष्टमांशे च पुनः किल भवेदणुरिति॥ यत्तु जाबा
लिनोक्तं॥ प्रतिपत्स्वप्यमावास्या पूर्वाण्हव्यापिनी यदि। भूतविद्धैव सा कार्या पित्र्ये कर्मणि सर्वदेति। अत्र पूर्वाण्हव्या

CC-0. In Public Domain. Digitization by eGangotri

पिनीतिथिरिति विशेषकथनादपराण्हव्यापित्वं नास्तीत्यवगम्यते॥ तादृशीच द्विविधा॥ पूर्वेद्युरपराण्हव्यापिनी
तद्दहिनाच॥आद्यपक्षेसर्वैरपि भूतविद्धैवकार्या॥ द्वितीयपक्षेसाग्निकैरेव भूतविद्धा कार्या॥ यत्तुहारीतेनोक्तं॥पूर्वा
ण्हे चेदमावास्या अपराण्हेनचेत्तु सा॥प्रतिपद्यपिकर्त्तव्यं श्राद्धं श्राद्धविदो विदुरिति॥तद्दिवसद्वयेप्यपराण्हव्यापि
त्वाभावेसतिनिरग्निकविषयं॥ यदपिहारीतेनोक्तं॥ भूतविद्धाप्यमावास्याप्रतिपन्मिश्रितापिच॥पित्र्ये कर्मणि वि
द्वद्भिर्ग्राह्या कुतपकालिकीति तदेकोद्दिष्टविषयं॥ एकोद्दिष्टस्य कुतपप्राधान्यं प्रतिपत्प्रकरणे प्रपंचितं॥ यद्वा॥प्रतिप
न्मिश्रायाअप्यपराण्हव्यापित्वाभावे निरग्निकैरपि हेयत्वशंकायांग्राह्यत्वे कुतपव्याप्तिरनुकल्पत्वेनाभिधीयते
॥अपराण्हव्याप्तिः पार्वणे मुख्यःकल्पः॥कुतपव्याप्तिरनुकल्पः॥ तथाच मुख्यासंभवेनुकल्पस्योपादेयत्वा
न्निरग्निकैः प्रतिपन्मिश्रिताग्रहीतुंशक्यते॥ भूतविद्धायां कुतुपकालिकत्वे सत्यापराण्हिकत्वमर्थसिद्धं॥ तथा
सति मुख्यानुकल्पयोरुभयोरपि सद्भावात्कुतपस्य प्रारंभकालत्वाच्च प्रत्याब्दिकप्रकरणोदाहृतदेवस्वामि
वचनानुसारेणोपक्रमोपसंहारे कालव्याप्तिर्दर्शिता भवति।तच्चात्र दृष्टांतेनोपन्यस्यते॥ यथा कुतपव्यापिनी भूतवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्धोपादेया॥ तथाप्रतिपद्विद्धापि कुतपव्याप्तोपादेया भवति॥ तच्च बौधायन आह॥ घटिकैकाप्यमावास्याप्रतिपत्सु न चेत्तदा॥ भूतविद्धे वसा ग्राह्या दैवे पित्र्ये च कर्मणीति॥ प्रतिपत्तु घटिकैकापि कर्मकालसंबंधिनी यदि न स्यादित्यर्थः॥ तदेतद्वचनं पूर्वेद्युरेवापराण्हव्याप्तौ द्रष्टव्यं॥ अस्मिन्नेव विषये जाबालिराह॥ प्रतिपत्स्वप्यमावास्या पूर्वाण्हव्यापिनी यदि॥ भूतविद्धैव सा ग्राह्या पित्र्ये कर्मणि सर्वदेति॥ यत्तु हारीतवचनं॥ कन्यामकरमीनेषु तुलायां मिथुने तथा॥ भूतविद्धैव सर्वेषां पूज्या भवति यत्नत इति तद्व्रतविषयं॥ तथा च जाबालिः॥ तुलायां मिथुने मीने कन्यायां मकरेप्यमा॥ भूतविद्धा व्रते ग्राह्या शेषे तु प्रतिपद्युतेति॥ ॥ इति पंचदशीनिर्णयः॥ ॥ अथेष्टिकालो निर्णीयते॥ ॥ न चेष्टेः प्रतिपदि कर्तव्यतया पूर्वप्रकरण एव कुतोयं नाभिहित इति शंकनीयं॥ पर्वचतुर्थांशस्यापि प्रतिपदइवेष्टिकालत्वात्॥ पर्वप्रतिपत्संधिसापेक्षत्वाच्च॥ अतः पर्वनिर्णयानंतरमस्य निर्णयस्यावसर इतीदानीं निर्णीयते॥ अत्रेदं चिंत्यते॥ किं पर्वप्रतिपदोः संधिरिष्टिकालः॥ किं वा संधेरुभौ पार्श्वाविति॥ तदर्थं प्रथमं संधिस्वरूपं निरूपणीयं॥ तन्निरूपणं च पर्वभेदाधीनं॥ अतः पर्वभेदो निरूप्यते॥ पर्वं च द्विविधं॥ पौर्णमास्यमावास्या चेति॥ ननु प्रतिपदमार

CC-0. In Public Domain. Digitization by eGangotri

भ्यचतुर्दश्यंतानांतिथीनांशुक्लकृष्णपक्षयोर्नास्तिनामभेदः॥ पंचदश्यांतुकिमर्थोयंनामभेदइतिचेत्॥ तयोर्विशेष
स्वभावज्ञापनायेतिब्रूमः॥ प्रथमद्वितीयादीनांचंद्रकलानांमध्येयत्संख्याकाकलावर्द्धतेतत्संख्याकाशुक्लपक्षे
तिथिः व्यवह्रियते॥ कृष्णपक्षेपिक्षीयमाणायास्तस्याः कलायानाम्नातत्तिथिव्यवहारः॥ तेनन्यायेनोत्यतिथेरपि
पक्षद्वयेपंचदशीत्येवव्यवहारः॥ तत्रशुक्लायांपंचदश्यांचंद्रमंडलंस्वकलाभिः सर्वात्मनापूर्यतेसेयंमंडलपरिपू
र्त्तिः पूर्णिमेत्यनेननाम्नाज्ञायते॥ तदुक्तंब्रह्मांडमत्स्यपुराणयोः॥ कलाक्षयेव्यतिक्रांतेदिवापूर्णौपरस्परं॥ चंद्रादि
त्यौपराण्हेतुपूर्णत्वात्पूर्णिमास्मृतेति॥ अन्हः परोभागः पराण्हः सूर्यास्तमयकालइत्यर्थः॥ तत्रयथादित्यः संपूर्ण
मंडलः सन्नस्तमेति तथोत्तरक्षणेचंद्रः संपूर्णमंडलः सन्नुदेतीति॥ दृष्टांतदार्ष्टांतिकभावंविवक्षितत्वाद्द्वयोरादि
त्यचंद्रयोरुपन्यासः॥ यथामंडलपूर्णत्वविवक्षयापूर्णिमाशब्दः प्रयुज्यते॥ तथामासपूर्णत्वविवक्षयापौर्णमा
सीशब्दः प्रयुज्यते॥ तदुक्तंभविष्योत्तरे॥ पौर्णमासीमहाराजसोमस्यदयितातिथिः॥ पूर्णोमासोभवेद्यस्मात्पौर्ण राम
मासीततः स्मृतेति॥ पूर्णिमामावास्ययोर्विकल्पेनमासांतत्वंमासप्रस्तावे दर्शितं॥ अमावास्येत्यनेननाम्नाबहू १३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वोर्थाः कथ्यंते॥ तत्रामाशब्दस्यचत्वारोर्थाः सहभावः॥ कन्यासूर्यरश्मिः चंद्रकलाचेति वसुशब्दस्यचचत्वारो
र्थाः॥ इन्द्र श्चन्द्रःपितृविशेषःनिवासश्चेति॥ तत्रसहभाववाचिनममाशब्दमिंद्रवाचिनंवसुशब्दंचोररीकृत्यनिर्वच
नमेवंप्रवर्त्तते॥ अमावसुरस्यामित्यमावास्येति॥ अयमर्थः॥ वृत्रवधानंतरंप्रेषितेंद्रसमागमेसंतुष्टादेवाःपरस्प
रमवोचंत॥ अमास्माभिःसहायमिंद्रोनिवसतीति॥ अतस्तस्यदिनस्यामावास्यात्वमिति॥ सोयमर्थः शतपथ
ब्राह्मणेदर्शपूर्णमासप्रकरणेश्रूयते॥ तेदेवाअब्रुवन् अमावैनोद्यवसुर्वसतियोनःप्रावात्सीदिति॥ तैत्तिरीयब्रा
ह्मणेपिस्पष्टमयमेवार्थःश्रूयते॥ इंद्रोवृत्रंहत्वापरांपरावतमगच्छदपराधमितिमन्यमानस्तंदेवाःप्रैषमैछन्नि
त्यारभ्यपठ्यते॥ सोमावास्यांप्रत्यागच्छत्तंदेवाभिसमगच्छंतामावैनोद्यवसुर्वसतीतींद्रोहिदेवानांवसुस्तदमाव
ास्यायाअमावास्यात्वमिति॥ परांपरावतं॥ अत्यंतदूरदेशमित्यर्थः॥ अपराधंद्रोहमकार्षं॥ यदावसुशब्दश्चंद्रवाची
तदाप्यमाशब्दस्यवाच्यंसहभावमेवोररीकृत्यैवनिर्वक्तव्यं॥ ॐषधीभिःसहचंद्रोवसत्यस्यांरात्राविस्यमावा
स्या॥ अयमर्थः॥ शतपथब्राह्मणेश्रूयते॥ एषवैसोमोराजादेवानामन्नंयच्चंद्रमाःसयत्रैषएतांरात्रिंनपुरस्तान्न

पश्चादूद्दशो तदिमंलोकमागच्छति॥सइहापश्चोषधीश्च प्रविशतिसवैदेवानांवस्वन्नंह्येषांतद्यदेषएतांरात्रि
मिहामावसतितस्मादमावास्यानामेति॥तथाबृहदारण्यकेपि॥चंद्रं प्रकृत्यपठ्यतेसो मावास्यांरात्रिमेतयाषो
डश्याकलयासर्वमिदंप्राणभृदनुप्रविश्यततःप्रातर्जायतइति॥अमावसुशब्दौयदाकन्यापितृवाचिनौतदा
नीमेवंनिर्वक्तव्यं॥अमावसुमैच्छदस्यांरात्राविस्यमावास्या॥अमाशब्दाभिधेयाकाचित्कन्यातस्यारात्रौवसुना
मानंपितरंवव्रे॥सचपिताधर्मलोपाद्भीतःसन्तांकन्यांनैच्छत्सोयमितिहासः पद्मपुराणेवगंतव्यः॥अमावसु
शब्दोयदासूर्यरश्मिनिवासवाचिनौतदातदनुसारेणनिर्वचनंस्कांदेनागरखंडेपठ्यते॥अमानामरवेरश्मिः
सहस्रप्रमुखःस्मृतः॥यस्यावैतेजसासूर्यःप्रोक्तस्त्रैलोक्यदीपकः॥तस्मिन्वसतियेनेंदुरमावास्यांततःस्मृतेति
॥ब्रह्मांडपुराणेपि॥अमानामरवेरश्मिश्चंद्रलोकेप्रतिष्ठिता॥यस्मात्सोमोवसेत्तस्याममावास्याततःस्मृतेति॥अ
मावसुशब्दयोःसहभावनिवासवाचित्वमाश्रित्यमत्स्यवायु---पुराणेब्रह्मांडपुराणेपिनिर्वचनंकृतं॥अमा
वसेतामृसेतुयदाचंद्रदिवाकरौ॥एषापंचदशीरात्रिरमावास्याततःस्मृतेति॥अमाशब्दस्यचंद्रकलावाचित्वं

CC-0. In Public Domain. Digitization by eGangotri

स्कांदेदर्शितं॥ अमाषोडशभागेनदेविप्रोक्तामहाकलेति॥ तांकलामुपजीव्यनिर्वचनं भगवतीपुराणेदर्शितं॥
कलावशेषोनिःक्रांतःप्रविष्टःसूर्यमंडलं॥ अमायांविशतेयस्मादमावास्याततःस्मृतेति॥ अमावास्याशब्दपर्या
योदर्शशब्दोपिद्विधानिरूच्यते॥ सूर्याचंद्रमसौपरस्परंपश्यतोत्रेतिदर्शः॥ तदुक्तंमत्स्यपुराणे॥ आश्रित्यताम
मावास्यांपश्यतःसुसमागतौ॥ अन्योन्यंचंद्रसूर्यौतौयदातद्दर्शउच्यतइति॥ नदृश्यतेचंद्रोत्रेतिनिर्वचनं॥ यद्य
पितदानीमदर्शइतिवक्तव्यं तथापिविपरीतलक्षणयादर्शइत्युच्यते॥ तदेतद्ब्रह्माचार्यैरुक्तं॥ सूरेकातरशब्द व
दिति॥ चंद्रादर्शनंचशतपथवाक्येनपूर्वमुदाहृतं॥ सयत्रैषएतांरात्रिंनपुरस्तान्नपश्चाद्ददृशइति। अदर्शनेच
कारणंसूर्याचंद्रमसोरत्यंतसन्निकर्षः॥ सतिचतस्मिन्सन्निकर्षेमहतासौरेणतेजसाचांद्रंतेजोभिभूयते॥ अतए
वपौर्णमास्यामत्यंतविप्रकर्षेसत्यनभिभूतत्वाच्चंद्रमंडलंसंपूर्णंदृश्यते॥ तावेतौसन्निकर्षविप्रकर्षौगोभिलआह
॥ यःपरोविप्रकर्षः सूर्याचंद्रमसोः सापौर्णमासी॥ यःपरःसन्निकर्षःसामावास्येति॥ तदेवंपर्वाभिधायाःपंचदश्याः
पौर्णिमादिनामनिर्वचनेनस्वभावविशेषोज्ञापितोभवति॥ तेचपूर्णमास्यमावास्येप्रत्येकंद्विविधे॥ तच्चपुराणेद

CC-0. In Public Domain. Digitization by eGangotri

र्शितं ॥ राका चानुमतिश्चैव पौर्णमासी द्विधा स्मृता ॥ सिनीवाली कुहूश्चैव ममावास्या द्विधैवहीति ॥ एतासांच तस्य
णां स्वरूपं काठकशाखायां विस्पष्टं श्रूयते ॥ या पूर्वा पौर्णमासी सानुमतिर्योत्तरा सा राका ॥ या पूर्वामावास्या सा
सिनीवाली योत्तरा सा कुहूरिति ॥ बृहद्वसिष्ठोपि ॥ राका चानुमतिश्चैव पौर्णमासी द्वयं विदुः ॥ राका संपूर्णचंद्रा
स्यात्कलोनानुमतिर्मता ॥ पौर्णमासी द्विवा दृष्टे शशिन्यनुमतिः स्मृता ॥ रात्रिदृष्टे पुनस्तस्मिन्सैव राकेति कीर्त्तिते
ति ॥ मत्स्य ब्रह्मांडपुराणयोः ॥ यस्मात्तामनुमन्यंते पितरो देवतैः सह ॥ तस्मादनुमतिर्नाम पूर्णिमा प्रथमा स्मृता ॥ अ
त्यर्थं राजते यस्मात्पौर्णमास्यां निशाकरः ॥ रंजनाच्चैव चंद्रस्य राकेति कवयो विदुरिति ॥ बृहद्वसिष्ठः ॥ दृष्टचंद्रा
ममावास्यां सिनीवालीं प्रचक्षते ॥ एतामेव कुहूमाहुर्नष्टचंद्रां महर्षय इति ॥ तदेवं चत्वारः पर्वभेदा निरूपिताः
॥ तेषु कुहूव्यतिरिक्तानां त्रयाणां भेदानां लघ्वक्षरोच्चारणपरिमितः कालः संधिरित्युच्यते ॥ कुहूस्त्वक्षरद्व
य परिमितः कालः ॥ तदेतदुक्तं भगवती पुराणे ॥ अनुमत्याश्च राकायाः सिनीवाल्याः कुहूं विना ॥ एतासां द्वि
लवः कालः कुहूमात्रा कुहूः स्मृतेति ॥ तत्र लवस्वरूपं स्मृत्यंतरे दर्शितं ॥ लघ्वक्षराच्चतुर्भागस्त्रुटिरित्यभिधीयते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रुटिद्वयंलवः प्रोक्तो निमेषस्तु लवद्वयमिति॥ एवंचसतित्रुटिशब्दाभिधेयानां भागानांचतुष्टयंलवद्वयरूपंल
घ्वक्षरसमं भवति॥ तस्मिन्लघ्वक्षरपरिमिते कालेएकः पर्वणो भागः द्वितीयः प्रतिपदः॥ तदुभयंमिलित्वासंधिर्भ
वति॥ कुहूप्रतिपदोः संधिस्तु पूर्वस्माद्द्विगुणः॥ अक्षरद्वयपरिमितत्वात्॥ मत्स्यब्रह्मांडपुराणयोः॥ राकाचानु
मतिश्चैवसिनीवालीकुहूस्तथा॥ एतासां द्विलवः कालः कुहूमात्राकुहूस्तथा॥ कुहूरितिकोकिलेनोक्ते यावान्का
लः समाप्यते॥ तत्कालसंज्ञिता चैषा अमावास्याकुहूः स्मृता॥ इत्येषपर्वसंधीनांकालोवाद्विविधः स्मृतइति॥ ए
वंसंधौ निरूपितेसतियोयंप्रक्रांतोविचारस्तत्रसंधिरेवेष्टिकालइतितावत्प्राप्तं॥ संधौयजेतेतिश्रुतेः॥ मैवं॥ सं
धेः सूक्ष्मत्वात्तत्रयागानुष्ठानानुपपत्तेः॥ कातर्हिश्रुतेर्गतिः॥ पार्श्वद्वयलक्षणेतिब्रूमः॥ यथागंगायां घोषइत्य
त्रगंगाशब्दः प्रवाहेनुपपन्नस्तत्समीपंतीरंलक्षयति॥ तथासंधिशब्दोपिपार्श्वद्वयंलक्षयतु॥ अतएवश्रुत्यंतरं
संधिमभितोयजेतेति॥ बौधायनोपि॥ सूक्ष्मत्वात्संधिकालस्यसंधेर्विषयउच्यते॥ सामीप्यंविषयंप्राहुः पूर्वेणा
ह्ना परेणचेति॥ अत्रपूर्वापरशब्दाभ्यांसंधेः प्राचीनंपर्वदिनंप्रतीचीनंप्रतिपद्दिनंचाभिधीयते॥ तत्रपूर्वेस्मि-

CC-0. In Public Domain. Digitization by eGangotri

 न्पर्वदिनेयागप्रारंभः॥उत्तरस्मिन्प्रतिपद्दिनेयागसमाप्तिः॥ अन्वाधानमिध्माबर्हिःसंपादनमग्निपरिग्रहउप
 स्तरणंचेत्येवमादिः प्रयोगप्रारंभः सपूर्वेद्युरनुष्ठेयः॥तथाचतैत्तिरीयब्राह्मणेश्रूयते॥पूर्वेद्युरिध्माबर्हिःकरोति॥
यज्ञमेवारभ्यगृहीत्वोपवसतीति॥शतपथब्राह्मणेपि॥पूर्वेद्युरग्निंगृण्हातिउत्तमहर्यजतीति॥तत्राग्निग्रहणं
नामाध्वर्युणाआहवनीयगार्हपत्यदक्षिणाग्निषुममाग्नेवर्चइत्यादिभिर्ऋग्भिः समिदाधानलक्षणेन्वाधाने
क्रियमाणेपार्श्ववर्त्तिनायजमानेनाग्निंगृण्हामीत्यादीनांमंत्राणांपठनंतदिदंपर्वदिनेक्रियते॥प्रतिपद्दिनेतुक
र्मणेवांदेवेभ्यइत्यादिभिरध्वर्युर्हस्तप्रक्षालनंतंदुलनिर्वापपुरोडाशप्रदानादिलक्षणंप्रयोगंकरोति॥तदिदंय
जनं॥एतदेवाभिप्रेत्यगोभिलआह॥पक्षांताउपवस्तव्याः पक्षादयो पियष्टव्याइति॥अत्रोपवासशब्देनाग्न्यु
पस्तरणादिर्विवक्षितः॥तस्मिन्क्रियमाणेयजमानसमीपेदेवतानांनिवासात्।तदेततैत्तिरीयब्राह्मणेदर्शितम्॥
उपास्मिन्श्वोयक्ष्यमाणेदेवतावसंतियएवंविद्वानग्निमुपस्तृणातीति॥उपवासशब्दाभिधेयस्यपर्वदिने
कर्त्तव्यस्यान्वाधानादेः पर्वणिचतुर्दशवत्याद्यास्त्रयोंशाविहितःकालः॥नतुचतुर्थांशः यागस्यतुपर्वचतुर्थो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शः प्रतिपदंशास्त्रयश्चविहितः कालः॥ नतुप्रतिपदश्चतुर्थांशः॥ तदेतदाहलौगाक्षिः॥ त्रीनंशानोपवस्तस्य
यागस्यचतुरोविदुः॥ द्वावंशावुत्सृजेदंत्यौयागेचव्रतकर्मणीति॥ तमेतंयज्ञकालंयज्ञपार्श्वेप्याह॥ पंचद
श्याः परः पादः पक्षादेः प्रथमास्त्रयः॥ कालः पार्वणयागेस्यादर्थांस्त्येतुनविद्यतइति॥ वृद्धशातातपोपि॥ प
र्वणोयश्चतुर्थांश आद्याः प्रतिपदस्त्रयः॥ यागकालः सविज्ञेयः प्रातरुक्तोमनीषिभिरिति॥ अत्रप्रातरितिवि
शेषणात्सूर्योदयस्योपरिमुहूर्तत्रयंयागकालइत्युक्तंभवति॥ प्रतिपदश्चतुर्थांशंनिषेधतिकात्यायनः॥ नय
ष्टव्यंचतुर्थेंशेयागैः प्रतिपदः क्वचित्॥ रक्षांसितद्विलुंपंतिश्रुतिरेषासनातनीति॥ तदेवंपर्वण्यन्वाधानादिकं
प्रतिपदिचेष्टिरितिसंधिपार्श्वयोः प्रारंभपरिसमाप्तीव्यवस्थिते॥ यदापर्वप्रतिपदावुदयमारभ्यपूर्णतिथीभवतःत
दानसंदेहएव॥ यदातुखंडतिथीतदातुनिर्णयोभिधीयतेतत्रगोभिलः॥ आवर्तनेयदासंधिः पर्वप्रतिपदोर्भवे
त्॥ तदहर्यागइष्येतपरतश्चेत्परेहनीति॥ पर्वप्रतिपदोःसंधिरर्वागावर्तनाद्यदि॥ तस्मिन्नहनियष्टव्यंपूर्वेद्युस्त
दुपक्रमः॥ आवर्त्तनात्परः संधिर्यदितस्मिन्नुपक्रमः॥ परेद्युरिष्टिरित्येषपर्वद्वयविनिश्चयइति॥ आवर्त्तनमन्हो

Sanskrit University, Bahadurgarh Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मध्यभागः॥ श्लोगाक्षिरपि॥ पूर्वाण्हे वाथ मध्यान्हे यदि पर्वस्समाप्यते॥ उपोष्यत त्र पूर्वेद्युस्तदहर्यागइष्यते॥ अ
पराण्हे थवा रात्रौ यदि पर्व समाप्यते॥ उपोष्यतस्मिन्नहनिश्वोभूते यागइष्यतइति। एषुवचनेषु मध्यान्हादिशब्दा यौ
गिकाः ननु पंचधा विभागमाश्रित्य प्रवृत्तास्त थासत्यन्हो मध्यो मध्यान्ह इति व्युत्पत्तेरावर्त्तनं मध्यान्हशब्दे
नाभिधीयते॥ अतएवावर्त्तनशब्दः प्रयुक्तः॥ शातातपेनापि मध्यमशब्दः प्रयुक्तः॥ पूर्वाण्हे मध्यमे वापि यदि
पर्वसमाप्यते॥ तदोपवासः पूर्वेद्युस्तदहर्यागइष्यतइति॥ अन्हः पूर्वोभागः पूर्वाण्हः॥ अन्होपरो भागो अपरा
ण्हः॥ अतस्ताभ्यां शब्दाभ्यामावर्तनात्पूर्वोत्तरभागावभिधीयते॥ वाजसनेयिनां तु विशेषमाह॥ भाष्यार्थ
संग्रहकारः॥ मध्यंदिनात्स्यादहनीह यस्मिन्प्राक् पर्वणः संधिरियं तृतीया॥ सा खर्विका वाजसनेयिमत्या
तस्यामुपोष्याथ परेद्युरिष्टिरिति॥ आवर्तनादूर्ध्वमस्तमयादर्वाग्यदा संधिर्भवति तदाहः संधिमतीतिथिः प्र
थमा॥ रात्रौ संधिश्चेत्सा तिथिर्द्वितीया॥ उभे अपेक्ष्य पूर्वाण्हे संधिमती पर्वतिथिस्तृतीया भवति॥ तस्यां तृती
यतिथौ पर्वकालस्याल्पत्वात्सा खर्विकेत्युच्यते॥ शाखांतराध्यायिनामीदृशे विषये पूर्वेद्युरन्वाधानादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कं संधितिथाविष्टिः॥ वाजसनेयिनां तु संधितिथावन्वाधानमुत्तरतिथाविष्टिः॥ एवं सति वाजसनेयिनां नक्का
पि संधिदिनात्पूर्वेद्युरन्वाधानादिकमस्ति॥ सोयं विशेषः॥ आवर्त्तनेततः पुरा वा यदि संधिर्भवति तदा वाज
सनेयिव्यतिरिक्तानां पर्वचतुर्थांशेइष्टिः प्राप्नोति॥ तत्र विशेषमाह गार्ग्यः॥ प्रतिपद्यप्रविष्टायां यदि चेष्टिः समा
प्यते॥ पुनः प्रणीय कुर्त्तन्नेष्टिः कर्त्तव्या यागवित्तमैरिति॥ पर्वणश्चतुर्थांशः प्रतिपदस्त्रयोंशाश्च यागकालत्वे
न विहिताः॥ तत्र पर्वचतुर्थांशस्य विषय उदाहृतः॥ प्रतिपदंशानां विषय उदाह्रियते॥ उषःकाले संधौ प्रतिप
दः प्रथमांशो यागकालः॥ निशीथे संधौ द्वितीयांशः॥ रात्रिप्रारंभे संधौ तृतीयांशः॥ नन्वनेन न्यायेनापराण्हे सं
धौ प्रतिपच्चतुर्थांशस्य प्रयोगकालत्वं प्राप्नोति॥ तच्च प्रतिषिद्धं॥ न यष्टव्यं चतुर्थेंश इति श्रुतेः॥ अतस्तादृशे वि
षये याग एव लुप्यत इति चेत्॥ मैवं॥ वृद्धशातातपेन प्रतिप्रसवाभिधानात्॥ संधिर्यत्रापराण्हे स्याद्यागं प्रातः
परेहनि॥ कुर्वाणः प्रतिपद्भागे चतुर्थेपि न दुष्यतीति॥ एवं तर्हि प्रतिषेधो निर्विषयः स्यादिति चेत्॥ मैवं॥ सद्यस्का
लविषये चरितार्थत्वात्॥ तं च विषयं दर्शयति कात्यायनः॥ संधिश्चेत्संगवादूर्ध्वं प्राक्चेदावर्त्तनाद्रवेः॥ सा पौ

CC-0. In Public Domain. Digitization by eGangotri

र्णमासीविज्ञेयासद्यस्कालविधौतिथिरिति॥ भाष्यार्थसंग्रहकारोपि॥ अन्वाहितिश्चास्तरणोपवासाः पूर्वेद्यु
रेतेखलुपौर्णमास्यां॥ आवर्त्तनात्प्राग्यदिपर्वसंधिस्तदैवयागः क्रियतेसमस्तइति॥ आपस्तंबोपि॥ पौर्ण
मास्यामन्वाधानपरिस्तरणोपवासाः सद्योवासाद्यस्कालाय सर्वेक्रियतइति॥ संगवावर्त्तनयोर्मध्येपौर्ण
मासीप्रतिपदोः संधौसतिपूर्वोदाहृतैर्वचनैः संधिदिनात्पूर्वेद्युरन्वाधानादिकंप्राप्तं॥ तच्चसद्यस्कालवाक्यैः
संधिदिनउत्कृष्यते॥ नन्वीदृशेविषयेसंधिदिनात्परदिनेयागउत्कृष्यतां॥ तथासत्यपराण्हादिसंधिष्विवा
न्वाधानयागयोर्दिनभेदोभविष्यति॥ अस्तिचदृष्टांतः॥ वाजसनेयिनामीदृशेविषयेन्वाधानोत्कर्षेसतिया
गस्याप्युत्कृष्टत्वात्॥ मैवं॥ अन्वयव्यतिरेकरूपाभ्यांविधिनिषेधाभ्यामस्याः शंकायानिवारितत्वात्॥ त
त्रसद्यस्कालविधयोन्वयरूपाः॥ प्रतिपच्चतुर्थांशप्रतिषेधाव्यतिरेकरूपाः॥ एवंचसतिप्रतिषेधवाक्यंसा
वकाशंभवति॥ अमावास्यायांविशेषमाह वृद्धशातातपः द्वितीयात्त्रिमुहूर्त्ताचेत्प्रतिपद्यापराण्हिकी॥ अन्वा
धानंचतुर्दश्यांपरतः सोमदर्शनादिति॥ सोयंविशेषोनाश्वलायनापस्तंबविषयः॥ किंतुबौधायनमतानुष्ठा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्पिविषयः॥ अतएवबौधायनः॥ द्वितीयात्रिमुहूर्त्ताचेत्प्रतिपद्यापराण्हिकी॥ अन्वाधानंचतुर्द्दश्यांपरतः सोम
दर्शनात्॥चतुर्द्दशीचतुर्यामा अमावास्यानदृश्यते॥ श्वोभूतेप्रतिपच्चेत्स्यात्पूर्वांतत्रैवकारयेत्॥ चतुर्द्दशीचसं
पूर्णाद्वितीयाक्षयकारिणी॥ चरुरिष्टिरमायांस्याज्जूतेकव्यादिकीक्रियेति। एतेषांवचनानामयमर्थः॥ अन्हि
चतुर्द्दशीसंपूर्णा॥ अस्तमयादर्वागमावास्यास्वल्पा॥ ततएवापराण्हव्याप्त्यभावाच्छ्राद्धायान्वाधानायपू
र्वांकरीत्यायद्यपिनिमित्तभावंभजते तथापिप्रतिपदि द्वितीयायांसत्यांचंद्रस्यदृश्यमानत्वात्तद्दर्शनेचेष्टेर्नि
षिद्धत्वात्प्रतिपद्युतायाममावास्यायामिष्टिः स्वल्पामावास्योपेतायांचतुर्द्दश्यां श्राद्धान्वाधानादिकंकर्त्तव्यमि
ति॥ एतदेवाभिप्रेत्यस्मृत्यंतरे॥ आदित्येस्तमितेचंद्रः प्रतीच्यामुदियाद्यदा॥ प्रतिपद्यतिपतिःस्यात्संच्चदर्श्यां
पजेत्तदेति॥ वृद्धवसिष्ठोपि॥ इंदौनिरुप्तेपयसिपुरस्तादुदितेविधेः यद्वैगुण्यंहुतेतस्मिन्पश्चाद्पिहितन्नवे
दिति॥ अस्यायमर्थः॥ यदासंपूर्णचतुर्द्दश्यामविचारेणामावास्याबुद्धिंकृत्वान्वाधानादिकंकृत्वाहविर्नि र्वा
पंकरोतिकृतेतस्मिन्नुषः कालेपूर्वस्यांदिशिचंद्रमाउदेति॥ तदानदर्शकर्मभवितुमर्हति। दर्शकालस्याप्रसत्वात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

का॰मा॰ किंतु कालापराधं निमित्तीकृत्य दर्शदेवता अपनीय दात्रादिगुणविशिष्टान्यग्न्यादिदेवतांतराण्युद्दिश्य हविः प्र
४३ क्षेपो विहितः॥ तदेतत्तैत्तिरीयब्राह्मणे श्रूयते॥ यस्य हविर्निरुप्तं पुरस्ताच्चंद्रमा अभ्युदेति तं त्रेधा तंडुलान्विभजेद्ये मध्य
माः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्याद्ये स्थविष्ठास्तानिंद्राय प्रदात्रे दधंश्चरुं ये क्षोदिष्ठास्तान्विष्णवे शि
पिविष्टाय शृते चरुमिति॥ सोयं दृष्टांतः॥ हविषि निरुप्ते सति तत ऊर्ध्वं पूर्वस्यां दिशि चंद्रोदये सति दर्शकर्म विधे
यं हि गुण्यमुक्तरीत्याव्यवस्थितं॥ तदेवं वैगुण्यं होमदिने पश्चिमदिशि चंद्रोदये भवतीति॥ एतदेव बौधायनमत
मुपोद्बलयति श्रुतिः॥ यस्मिन्नहनि पुरस्तात्पश्चात्सोमो न दृश्यते तदहर्यजतेति॥ अयमर्थः॥ सिनीवाल्यां पुर
स्ताच्चंद्रदर्शनं भवति॥ द्वितीयां प्रतिपदि पश्चाच्चंद्रो दृश्यते तयोरुभयोर्मध्यवर्तिन्यां कुह्वां द्विविधमपि चंद्रद
र्शनं नास्ति अतस्तस्मिन्दिने यष्टव्यमिति॥ चंद्रदर्शनोपेतायां शुक्लप्रतिपदि यागानुष्ठाने प्रायश्चित्तमाह कात्या
यनः॥ यजनीये ह्नि सोमश्चेद्वारुण्यां दिशि दृश्यते॥ तत्र व्याहृतिभिर्हुत्वा दंडं दद्याद्द्विजातय इति॥ चंद्रदर्शनरा राम
हित्यमेवाभिप्रेत्य बौधायनकारिकास्तु पठ्यते॥ इष्टेरलं प्रतिपदादिनाड्यः समाष्टवायत्र भवंति तत्स्यात्॥ ॥ ४३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षीणासु नाडीषु दिनस्य पूर्वः कल्पो यत्र वृद्धौ च भवेद्द्वितीय इति॥ अयमर्थः॥ अमावास्या तिथेः संबंधिनीषु ना
डीषु क्षीणासु सतीषु तस्मिन्दिने अस्तमयात्पूर्वं प्रतिपत्संबंधिन्यो नाड्यः सप्ताष्ट वा यदि भवंति॥ तदा तद्दिनमि
ष्टिरूपं योग्यं॥ सोयमेकः पक्षः॥ अमावास्या प्रतिपदौ यदा वर्द्धेते तदा द्वितीयः कल्पो भवेत्॥ अमावास्यायाम
न्वाधाय सोमदर्शनरहिते प्रतिपद्दिने यागः कर्त्तव्य इति॥ स्मृत्यंतरेपि॥ अर्वागस्तमया यत्र द्वितीया तु प्रदृ
श्यते॥ तत्र यागं न कुर्वीत श्वो देवास्तु पराङ्मुखा इति॥ बौधायनमतानुसारिणामन्वाधानवद्दर्शश्राद्धम
पि स्वल्पामावास्योपेतायां चतुर्दश्यां कर्त्तव्यं तथा च बौधायनेनोक्तं॥ यदा चतुर्दशीयामं तुरीयमनुपूरयेत्॥
अमावास्या क्षीयमाणा तदैव श्राद्धमाचरेत्॥ चतुर्दश्यां चतुर्यामे अमा यत्र न दृश्यते॥ श्वोभूते प्रतिपद्यत्र भूते
कव्यादिकीक्रियेति॥ चतुर्थयामे अमावास्या संपूर्णा न दृश्यते किं त्ववसाने स्वल्पा॥ सा च परदिने क्षीयते॥ तदा
नीं चतुर्दश्यां श्राद्धमाचरेत्॥ ननु चंद्रदर्शनोपेतायां प्रतिपदि इष्टिः समाम्नाता॥ तथा च शतपथब्राह्मणं॥ यद
हः पश्चाच्चंद्रमा अभ्युदेति तदहर्यजन्निमांल्लोकानभ्युदेतीति॥ तैत्तिरीयब्राह्मणमपि॥ एषा वै सुमनानामेष्टि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

का॰मा॰ र्शमभियजानंपश्चाच्चंद्रमा अभ्युदेत्यस्मिन्नेवा स्मै लोके ध्रुवं भवतीति॥ अयमर्थः॥ येयमिष्टिश्वं द्रद र्श
१४४ नोपेते दिने क्रियते सेयमिष्टिः सुमनःशब्दवाच्या तादृशीमिष्टिं कृतवंतं यजमानमभिलक्ष्य तस्मिन्नेव दिने
पश्चाच्चंद्रमा उदेतीति तस्मै यजमानाया स्मिन्लोके समृद्धिर्भवतीति॥ बाढं॥ तदेतच्छ्रुतिद्वयं बोधायनमतानुसा
रिव्यतिरिक्तविषयं एतदेवाभिप्रेत्य प्रतिपच्चतुर्थांशे याग उदाहृतः॥ ननु बोधायनव्यतिरिक्तानामपि चंद्रद
र्शनयोग्यं द्वितीयायुतं प्रतिपद्दिनमिष्टौ निषिद्धं॥ तथा च स्मृतिः॥ पर्वणोंशे चतुर्थे तु कर्त्तव्ये ष्टिर्द्विजोत्तमैः॥ द्वि
तीयासहितं यस्माद्दृषयं त्याश्वलायनाः॥ तदेतदावर्त्तनात्पूर्वकालयोः संधौ सति द्रष्टव्यं॥ अपराण्हादिसंधि
षु चतुर्थस्येष्टावप्राप्तत्वात्॥ तदेवं प्रकृतिरूपाया इष्टेः कालो निरूपितः॥ विकृतेस्तु कालो निरूप्यते॥ तत्र का
त्यायनः॥ आवर्त्तनात्प्राग्यदि पर्वसंधिः कृत्वा तु तस्मिन्प्रकृतिं विकृत्याः॥ तत्रैव यागः परतो यदि स्यात्तस्मिन्
विकृत्याः प्रकृतेः परेद्युरिति॥ आवर्त्तनेततः पुरा वा पर्वसंधौ तस्मिन्संधिदिने प्रकृतियागं कृत्वा पश्चाद्विकृतिः राम॰
संबंधियागः कर्त्तव्यः॥ यद्यावर्त्तनात्परतः संधिस्तदा विकृतियागः संधिदिने कर्त्तव्यः॥ प्रकृतियागस्तु संधिदि १४४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नास्परेद्युरनुष्ठेय इत्यर्थः॥ आवर्त्तनेततः पूर्वकाले परकाले वा संधिरित्येतेषु त्रिष्वपि पक्षेषु संधिदिन एव विकृ
तेरनुष्ठानं॥ प्रकृतेस्तु पूर्वोक्तरीत्या संधिदिने परेद्युर्वानुष्ठानं व्यवतिष्ठते॥ इष्टीनां सर्वासां प्रकृतिर्दर्शपूर्णमा
सौ॥ ऐंद्राग्नमेकादशकपालं निर्वपेत्प्रजाकाम इत्यादयः कांडांतरपठिताः काम्येष्टयो विकृतयः॥ तत्र प्रकृतव
द्विकृतिः कर्त्तव्येति न्यायेन विकृतीनामपि संधिदिनात्परेद्युः कदाचिदनुष्ठानं प्राप्तं तदेतदुदाहृतेन वचनेन नि
वार्यते॥ इष्टिविकृतिन्यायः पशुविकृतिसोमविकृत्योरपि द्रष्टव्यः॥ पशूनां सर्वेषामग्नीषोमीयः पशुः प्रकृतिः
॥ वायव्यं श्वेतमालभेत भूतिकाम इत्यादयः कांडांतरपठिताः काम्यपशवो विकृतयः॥ सोमयागानां सर्वेषा
मग्निष्टोमः प्रकृतिः॥ उक्थ्यषोडश्यतिरात्रादयः विकृतयः॥ त्रिविधानामिष्टिपशुसोमविकृतीनां पर्वैव का
लः॥ तदेतदापस्तंब आह॥ यदीष्ट्या पशुना सोमेन यजेत सोमावास्यायां पौर्णमास्यां वा यजेतेति॥ अत्रापि
पूर्ववत्प्रतिपदि कदाचिदिष्टिप्राप्तौ तद्व्यावृत्तये पुनः कालो विधीयते॥ तस्माद्विकृतीनां पर्वैव काल इति स्थि
तं॥ ननु प्रकृतेर्यथोक्तकालात्कालांतरं क्वचित्स्मर्यते॥ षोडशेहन्यभीष्टेष्टिर्मध्यापं चदशेहनि॥ चतुर्दशेज

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

का॰मा॰ घन्येष्टिः पापा सप्तदशेऽह्नीति॥ अयमर्थः॥ पूर्वं प्रतिपद्दिनमारभ्य गणना यस्मागामि प्रतिपद्दिनं षोडशं भव
१४५ ति॥ तत्रेष्टिरभीष्टोत्तमा॥ ततः पूर्वस्मिन्पंचदशे दिने मध्यमा॥ ततः पूर्वस्मिंश्चतुर्द्दशेऽहनि जघन्या॥ तदेवं का
लत्रयं विहितं॥ उत्तमकालात्षोडशदिनादूर्ध्ववर्त्तिनि सप्तदशे दिने प्रतिषिद्धा॥ बाढं॥ तत्रोत्तममध्यमपक्षौ
शास्त्रीयौ॥ तिथीनां वृद्धिक्षयाभावे सत्युत्तमः पक्षः प्राप्नोति॥ एकस्मिन्दिने क्षीणे सति मध्यमः पक्षः प्राप्नोति
॥ जघन्यपक्षस्तु न शास्त्रीयः॥ दिनद्वयक्षयाभावात्॥ अतो जघन्यशब्दो निषेधविवक्षया प्रयुक्तः॥ ननु पक्षां
तरविवक्षया॥ ननु तिथिवृद्ध्याविष्टेः सप्तदशी तिथिः कदाचिद्भवति॥ तत्कथं पापा सप्तदशेऽहनीति प्रतिषेधः॥ ना
यं दोषः॥ अल्पतिथिवृद्धौ यदा षोडशदिने अमावास्या दशघटिका सप्तदशदिने प्रतिपद्वर्द्धते॥ तदानीं प्रतिपच्च
तुर्थांशस्येष्टिकालत्वभ्रांत्यानुष्ठानं प्रसक्तं वचनेन निवार्यते॥ तच्च न्याय्यं पूर्वाह्णसंध्युपेतदिने इष्टेः कर्त्तव्य
त्वेन निर्णीतत्वात्॥ यदा तु महत्या वृद्ध्या षोडशदिने अमावास्या संपूर्णा सप्तदशदिने प्रतिपत्संपूर्णा॥ तदा न राम
प्रतिषिध्यते॥ ननु बौधायनेन त्रयोदशसप्तदशदिनयोरन्वाधानं प्रतिषिध्यते॥ यत्रौपवसथ्यं कर्म यजनीया १४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रयोदशीं॥ भवेत्सप्तदशीं वापि तत्प्रयत्नेन वर्जयेत्॥ अत्र यजनीयं प्रतिपद्दिनमारभ्य पंचदशदिनमौपवसथ्यस्य
मुख्यः कालः॥ तिथिक्षये चतुर्दशं दिनं॥ तिथिवृद्धौ षोडशं दिनं॥ तथा सति त्रयोदशसप्तदशयोः प्रसक्तिरेव ना
स्ति तत्कथं प्रतिषिध्यत इति चेत्॥ एवं तर्ह्यप्रसक्तप्रतिषेधे नित्यानुवादोस्तु॥ अस्ति चाप्रसक्तप्रतिषेधरूपो
नित्यानुवादो वेदे न पृथिव्यां नांतरिक्षे न दिव्यग्निश्चेतव्य इति॥ पूर्वत्र पर्वप्रतिपदोः संधिमुपजीव्याधानेष्टिका
लौ व्यवस्थापितौ॥ तत्र तिथिक्षयवृद्ध्योः संधिविषये किंचिद्विशेषमाह कात्यायनः॥ परेऽह्नि घटिकान्यूनास्तथै
वाभ्यधिकाश्च याः॥ तदर्द्धं कुर्यात्पूर्वस्मिन् ह्रासवृद्धी प्रकल्पयेदिति॥ लौगाक्षिरपि॥ तिथेः परस्या घटिकास्तु
याः स्युर्न्यूनास्तथा चाभ्यधिकास्तु तासां॥ अर्द्धं वियोज्यं च तथा प्रयोज्यं ह्रासे च वृद्धौ प्रथमे दिने तदिति॥ पूर्वेद्युर
मावास्या पंचदशघटिका परेद्युः प्रतिपदपि तावती तदा यथास्थितत्वमेवोपजीव्यसंधिर्विज्ञेयः॥ यदा प्रतिपदः
षट् घटिकाः क्षीयंते तदा घटिकात्रयह्रासोमावास्यायां योजनीयः॥ तस्मिन्योजिते द्वादशघटिकामावा-
स्या भवति तदा वर्त्तमानात्पूर्वं संधिः संपद्यते॥ अनेनैव न्यायेन घटिकात्रयवृद्धौ योजितायामष्टादशघटिका

CC-0. In Public Domain. Digitization by eGangotri

मावास्याभवतितथासत्यावर्त्तनादूर्ध्वंसंधिर्भवति॥ इत्येवंसंधिंविज्ञायतदनुसारेणान्वाधानेष्टी अनुष्ठातव्ये॥ ॥
इतीष्टिनिर्णयः॥ ॥नन्विष्टिकालवद्ग्रहणकालोप्यत्रनिर्णेतव्यः॥पर्वप्रतिपत्संध्युपजीवनेनप्रवृत्तत्वात्
॥तथाचवृद्धगार्ग्यः॥पूर्णिमाप्रतिपत्संधौराहुःसंपूर्णमंडलं॥ग्रसतेचंद्रमर्कंचदर्शप्रतिपदंतरइति॥ब्रह्मसि
द्धांते॥यावान्कालःपर्वणःस्यात्तावत्प्रतिपदादिमः॥रवींदुग्रहणेनेहासपुण्योमिश्रणाद्भवेदिति॥अनेहाका
लः॥बाढं॥यद्यप्यस्तिसंध्युपजीवनंतथापिनिर्णेतव्यांशस्यतिथिविषयस्याभावादस्मिन्प्रकरणेनतद्योग्यं
॥कर्त्तव्यविशेषस्तूपरितनप्रकरणेनिरूपयिष्यते॥ इतिमाधवीयेद्वितीयादितिथिनिर्णयाख्यंचतुर्थंप्रकरणं
॥ ॥तृतीयचतुर्थाभ्यांप्रकरणाभ्यांप्रतिपदाद्याःपंचदश्यंताःसर्वास्तिथयोनिर्णीताः॥अथप्रकीर्णकेरूपेपं
चमप्रकरणेनक्षत्रविशेषादयःकालविशेषेषुकर्त्तव्यविशेषाश्चसंक्षेपेणनिरूप्यंते॥ ॥अत्रापितिथिवत्संपू
र्णनक्षत्रेसंदेहाभावात्खंडनक्षत्रेनिर्णयोवक्ष्यते॥सचनिर्णयोदर्शितोविष्णुधर्मोत्तरे॥उपोषितव्यंनक्षत्रंयः
स्मिन्नस्तमियाद्रविः॥पूज्यतेयत्रवारामनिशीथेशशिनासहेति॥अत्रास्तमययोगोनिशीथयोगश्चेतियोगद्वयंप्रये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जकं॥ अस्तमययोगो मुख्यः कल्पः॥ निशीथयोगो नुकल्पः। योगद्वये लब्धे सत्यनुष्ठानमतिप्रशस्तं। यदा तु पूर्वे
द्युः केवलो निशीथयोगः परेद्युः केवलोस्तमययोगः तदा मुख्यकल्पानुसारेण परेद्युरेवोपवासः॥ तथा सति प्रा
तः संकल्पकाले नक्षत्रसद्भावोपि लभ्यते॥ निशीथे शशिना युते ति ज्योतिःशास्त्रसिद्धस्य शशियोगस्य विव
क्षितत्वात् नक्षत्रसद्भावमात्रमभिधीयत इत्येव गंतव्यं॥ दिनद्वयेप्यस्तमययोगाभावे निशीथयोगेन पूर्वेद्यु
रेवोपवासः॥ तदाह सुमंतुः॥ यत्रार्द्धरात्रादर्वाक्तु नक्षत्रं प्राप्यते निशि॥ तन्नक्षत्रव्रतं कुर्यात्तत्रैव पारणं भवेदि
ति॥ नात्र तिथिष्वेवैकभक्तनक्तयोर्मध्यान्हप्रदोषव्याप्तिभ्यां निर्णयः॥ किंनर्ह्युपवासनक्षत्रएव तदुभयोः क
र्तव्यता॥ तदुक्तं स्कंदपुराणे॥ तत्र चोपवसेदृक्षे यन्निशीथादधो भवेत्॥ उपवासे यदृक्षं स्यात्तद्दिनं क्वैकभक्त
योरिति॥ यत्तु विष्णुधर्मोत्तरे॥ सा तिथिस्तच्च नक्षत्रं यस्यामभ्युदितो रविः॥ तथा कर्माणि कुर्वीत ह्रासवृद्धी न कार
णमिति॥ तदुपवासव्यतिरिक्तव्रतादिविषयं॥ यदपि बौधायनवचनम्॥ सा तिथिस्तच्च नक्षत्रं यस्यामभ्युदितो
रविः॥ वर्द्धमानस्य पक्षस्य हानेत्वस्तमयं प्रतीति तत्सितकार्यविषयं॥ यदपि मार्कंडेयेनोक्तं॥ तन्नाक्षत्रमहो

Sanskrit University, Balmiki Campus, Kathmandu

रात्रंयस्मिन्नस्तमितोरविः॥यस्मिन्नुदेतिसवितातन्नाक्षत्रंभवेद्दिनमिति॥तस्यायमर्थः॥द्विविधोनक्षत्रसं
बंधीकालविशेषः॥ अहोरात्रोदिनंच॥तत्रोदितंकर्मापिद्विविधं॥अहोरात्रसाध्यंदिनसाध्यंच॥उपवासैकभ॰
क्तादिकमहोरात्रसाध्यं॥यद्यपिविशिष्टकालनिष्पाद्यंभोजनमेकभक्तादेःस्वरूपंतथापितस्मिन्नहोरात्रेभोज
नांतरस्यैकभक्तादिनियमघातितया भोजनांतरपरित्यागसहितस्यैवभोजनस्यैकभक्तादिस्वरूपत्वादहोरा
त्रसाध्यत्वमप्यविरुद्धं॥दिनमात्रसाध्यानितुदानव्रतश्राद्धानितेषामहन्येवविधानात्॥तत्रोपवासादौना
क्षत्रोहोरात्रोग्रहीतव्यः॥व्रतादौतुनाक्षत्रंदिनंगृहीतव्यं॥अहोरात्रस्यनाक्षत्रत्वंसूर्यास्तमयकालेनक्षत्र॰
व्याप्त्यासंपद्यते॥दिनस्यतुनाक्षत्रत्वंसूर्योदयेनक्षत्रव्याप्त्यासंभवतीति॥यद्यपियस्मिन्नुदेतिसवितेत्यत्र
सूर्योदयकालेनक्षत्रसद्भावमात्रंप्रतीयतेनतुपरिमाणविशेषः॥तथापित्रिमुहूर्त्तपरिमाणस्यतिथौक्लृप्तत्वा
त्तदेवात्रानुसंबंधेयं॥ननुदानव्रतवच्छ्राद्धेपिनाक्षत्रदिनस्वीकारेप्रातःकालमात्रव्यापिनक्षत्रेपिश्राद्धंप्रसज्ये
त॥मैवं॥अपराह्णस्यश्राद्धकालत्वेनतद्व्याप्तेरपेक्षितत्वात्॥तथाचस्मृतिः॥नक्षत्रेखंडितेयेनव्याप्तः

CC-0. In Public Domain. Digitization by eGangotri

कालस्तु कर्मणः॥ नक्षत्रकार्याण्यं चैवतिथिकर्म तथैवतु॥ नचतेनैवन्यायेनैकभक्ते मध्याह्नव्यापिनक्षत्रं ग्राह्य
मितिशंकनीयम्॥ उपवासनक्षत्रस्यैकभक्तेप्रतिपदोक्तत्वात्॥ यद्यपिस्मृतिवचनं॥ तिथीनामंतिमोभागस्ति
थिकर्मसुपूजितः॥ ऋक्षाणां पूर्वभागस्तु ऋक्षकर्मसुपूजितइति॥ तत्रतिथ्यंतस्यपूज्यत्वंदानव्रतविषयं॥ नक्ष
त्रपूर्वभागपूज्यत्वंउपवासादिविषयं॥ उपवासादिव्यतिरिक्ते तुदैवेकर्मणिनक्षत्रस्याप्यन्यभागपूज्यत्वं द्रष्ट
व्यं॥ नक्षत्रविशेषेषुपूर्वस्तस्यलिंगस्य॥ श्रवणेनतुयत्कर्मउत्तराषाढसंयुतं॥ संवत्सरकृतोध्यायस्तत्क्षणादे
वनश्यति॥ धनिष्ठासंयुतंकुर्याच्छ्रावणंकर्मयद्भवेत्॥ तत्कर्मसफलंविद्यादुपाकरणसंज्ञितमिति निषिद्धत्वात्
॥ योगेषुतुकस्यचिल्लिंगस्यपूर्वेद्युर्निशीथमात्रव्याप्तिंप्रत्यसूचकत्वात्सायंकालादिव्याप्तिर्ग्राह्या॥ यदियोगःपू
र्वेद्युर्निशीथमात्रंव्याप्नुयात्तदापरेद्युरहनि पारणं नप्राप्नुयात्॥ रात्रौपारणस्यनिषिद्धत्वात्॥ अतोहृन्येवव्यती
पातपारणंब्रूवच्छास्त्रंपूर्वेद्युर्दिवसेसायंकालादियोगंप्रयोजकंसूचयति॥ तस्माद्धिष्कंभादियोगउपवासादौपू
र्वविद्धोगृहीतव्यः दानव्रतयोरुदयव्यापीग्राह्यः॥ श्राद्धस्यतुकर्मकालव्यापीतिनिर्णेतव्यं॥ बवबालवादिकर

का॰मा॰ णानांतिथ्यर्द्धपरिमितत्वेनदिनद्वयाव्यापित्वात्संदेहोनास्ति॥तस्मादुदयेस्तमयेवायस्मिन्दिनेकरणसद्भावस्त
१४८ स्मिन्नेवदिनेतत्कर्मानुष्ठेयं॥ यदातुसायंसंध्यामारभ्यपरेद्युरुदयात्प्रागेवकरणंसमाप्येततत्रकथमितिचेत्॥त
दाभद्राकरणोक्तन्यायेनसर्वेषुकरणेषुनिर्णयइतिब्रूमः॥भद्राकरणेचनिर्णयोभविष्योत्तरेभद्राव्रतेपठ्यते॥य
स्मिन्दिनेभवेद्भद्रातस्मिन्नहनिभारत॥उपवासस्यनियमंकुर्यान्नारीनरोपिवा॥यदिरात्रौभवेद्विष्टिरेकभक्तंदि
नद्वये॥कार्यंतेनोपवासःस्यादितिपौराणिकोविधिः॥प्रहरस्योपरियदास्याद्विष्टिःप्रहरद्वयं॥उपवासस्तदाका
र्यएकभक्तंनतोन्यथेति॥उदयादारभ्ययावदस्तमयंविष्टिसत्तायांनास्त्युपवासेसंदेहः॥ यदातुप्रहरमात्रेविष्टि
र्नास्तितस्योपरिप्रहरत्रयंविष्टिर्भवतितदाकृत्स्नदिनव्याप्तेर्भद्राया अभावेपिएकदेशव्याप्तेः सद्भावादुपवासोनु
ष्ठेयः॥अन्यथेत्यनेनैकदेशव्याप्त्यभावोपिविवक्षितस्तस्मिन्पक्षेसमनंतरातीतवचनाद्दिनद्वयेप्येकभक्तंकार्यं
॥यस्तुभद्राव्रतंसंकल्प्याहोरात्रमुपोषितुंनशक्नुयात्॥असौभद्रायुक्तघटिकासुभोजनंपरित्यजेत्॥ भद्रार राम
हितकालेभुक्त्वापिउपवासान्नहीयते॥तथाचभविष्योत्तरेपठ्यते॥स्नातःसंपूज्यतामेवब्राह्मणंचस्वशक्तितः १४८

CC-0. In Public Domain. Digitization by eGangotri

तः॥ ततोभुंजीतराजेंद्र यावद्भद्रानजायते॥ अथवांतेपिभद्रायाः कामतोवाग्यतः शुचिः॥ नकिंचिद्भक्षयेत्स्मा
द्योयावद्भद्राप्रवर्त्तत इति॥ अह्नश्चरमभागे यदा भद्राप्रवेशस्तदानीमेकदेशे भद्रायोगिनो दिनस्य तद्भूताहं त्वा
द्शक्तस्य भद्राप्रवेशात्प्रागेव भोजने प्राप्ते सत्यभुक्ते न पूजादेरनुष्ठेयत्वाद्भद्रारहितेपि काले पूजादिकं न विरुध्यते
॥ यदा तु भद्राया अंते भुंक्ते तदा कर्मकालव्याप्तिशास्त्राद्भद्रोपेतकाल एव पूजादिकर्त्तव्यं पक्षद्वयेपि भद्रायुक्तघ
टिकासु न किंचिद्भक्षयेत्॥ तावता भद्रोपवासः पूर्यते॥ बवादिकरणेषु कस्यापि विशेषस्य शास्त्रेणानुक्तत्वात्॥
भद्रायां क्लृप्तस्य न्यायस्यातिक्रमे कारकस्यापि विशेषस्य शास्त्रेणानुक्तत्वात्॥ भद्रायां क्लृप्तस्य न्यायस्याति
क्रमे कारणाभावाच्चायं निर्णयप्रकारः सर्वोपि योजनीयः॥ न च तिथिनक्षत्रयोगकरणानां पंचांगांतःपातिनां निर्ण
यं कृत्वा नदं तः पातीशास्त्रीयकर्मोपयोगीवारः कुत उपेक्षत इति शंकनीयं॥ अहोरात्रपरिमितत्वेन वासरे संदेहा
भावात्॥ तदेवं नक्षत्रयोगकरणानि निर्णीतानि॥ ॥अथ संक्रांतिर्निर्णीयते॥ ॥मेषादिषु द्वादशराशिषु क्रमे
ण संचरतः सूर्यस्य पूर्वस्माद्राशेरुत्तरराशौ संक्रमणं प्रवेशः संक्रांतिः॥ अतस्तद्राशिनामपुरःसरं सा संक्रांतिर्व्य

CC-0. In Public Domain. Digitization by eGangotri

पदिश्यते॥राशयश्चामी मेषवृषमिथुनकर्कटसिंहकन्यातुलावृश्चिकधनुर्मकरकुंभमीननामकाः॥तेषु द्वाद
शसु चत्वारि त्रिकानि भवंति॥तत्रैकस्मिंस्त्रिके क्रमेण चरस्थिरद्विस्वभावास्त्रयो राशयः॥तथा चतुर्षु त्रिकेषु
मध्ये॥ मध्यमा वृषभसिंहवृश्चिककुंभनामकाः स्थिरराशयश्चत्वारः॥ तेषु विष्णुपदमिति नामस्मृतिषु प्रसि
द्धं॥ये त्वंतिमा मिथुनकन्याधनुर्मीननामका द्विस्वभावा राशयस्ते षडशीतिमुखसंज्ञकाः॥ ये पुनर्मेषकर्कतु
लामकररूपाश्चत्वारो राशयस्तेषु मेषतुले विषुवसंज्ञके॥कर्कटमकरावयनसंज्ञकौ॥तदेतत्सर्वं वृद्धवसिष्ठ आह॥
अयने द्वे विषुवे द्वे चतस्रः षडशीतयः॥चतस्रो विष्णुपद्यश्च संक्रांत्यो द्वादश स्मृताः॥ झषकर्कटसंक्रांति द्वे उदक्
दक्षिणायने।विषुवे तु तुलामेषौ गोलमध्ये ततो पराः।कन्यायां मिथुने मीने धनुष्यपि रवेर्गतिः।षडशीतिमुखाः प्रोक्ताः षडशीति
गुणैः फलैः॥वृषवृश्चिकसिंहेषु कुंभे चैव रवेर्गतिः॥एतद्विष्णुपदं नाम विषुवादधिकं फलैरिति॥विषुवाभ्यामयनाभ्यां युक्तं
राशिचतुष्कं गोल इत्यभिधीयते॥तत्र मेषाख्यविषुवस्य कर्कटाख्यायनस्य च मध्ये विष्णुपदसंज्ञको वृषभः षडशीतिसंज्ञकं
मिथुनं च तिष्ठति।तथा च कर्कटायनस्य तुलाविषुवस्य च मध्ये सिंहकन्यके॥तुलामकरयोर्मध्ये वृश्चिकधनुषी।एवमन्यत्रापि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ह्यार्थे। गालवोप्याह। स्थिरभे विष्णुपदं षडशीतिमुखं द्वितनुभे तुलामेषौ विषुवंतुर्ये दक्षिणमयनं सौम्यं मृगे सूर्य इति
शब्दवाच्यो राशिः स्थिरराशौ स्थिते सूर्ये सति विषुवं भवति। सूर्ये कर्कटे दक्षिणायनं। मृगे मकरे सौम्यं सौम
दिङ्नामकमुत्तरायणं। नैरेतैः संज्ञाभेदै राशयो व्यवह्रियंते। तद्राशिसंबंधात्तद्राशिसंक्रांतीनामपि तान्येव
नामानि तासु च संक्रांतिषु होमस्नानादिकमन्वयव्यतिरेकाभ्यां शातातप आह। संक्रांतौ यानि दत्तानि हव्यकव्या
नि दातृभिः। तानि नित्यं ददात्यर्कः पुनर्जन्मनि जन्मनि। रविसंक्रमणे पुण्ये न स्नायाद्यदि मानवः। सप्तजन्मसु
रोगी स्याद्दुःखभागी ह जायत इति। स्नानदानाद्यंगभूते संक्रांतिकाले मुख्यकल्पस्यासंभवादनुकल्प एव वा
दर्त्तव्यः। तदाह देवलः। संक्रांतिसमयः सूक्ष्मो दुर्ज्ञेयः पिशितेक्षणैः। तद्योगादप्यधश्चोर्ध्वं त्रिंशन्नाड्यः पवि
त्रिता इति। देशाव्यवधानादत्यंतसंश्लिष्टयोः पूर्वोत्तरराश्योर्मध्ये सूर्यः पूर्वराशिं परित्यज्य यावता कालभेदे
नोत्तरराशिं प्रविशति स लेशो योगदृष्टिं विना मांसदृष्ट्या दुर्लक्ष्यः। अतोनुष्ठाने मुख्यसंक्रांतिकालासंभवा
त्संक्रांतिसंबंधिनौ पूर्वोत्तरकालौ गृहीतव्यौ। संक्रांतेः पूर्वोत्तरयोरेकैकस्मिंस्त्रिंशत्घटिकाः पुण्या इति सा

का·मा· मान्येनोक्तं ॥ तत्र विशेषमाह वृद्धवसिष्ठः ॥ अतीतानागते पुण्ये द्वे उदग्दक्षिणायने ॥ त्रिंशत्कर्कटके नाड्यो
१५० मकरे विंशतिः स्मृता इति ॥ उदगयनमतीतं सत्पुण्यं भवति ॥ दक्षिणायनमनागतं पुण्यं त्रिंशदित्यादिना तदेव
स्पष्टीक्रियते ॥ कर्कटाख्याद्दक्षिणायनात्प्राचीनास्त्रिंशद्घटिकाः पुण्याः ॥ मकराख्यादुत्तरायणादूर्ध्वकालीना विंशतिघटिकाः पुण्याः ॥ बृहस्पतिरपि ॥ अयने त्रिंशतिः पूर्वा मकरे विंशतिः पराः ॥ वर्त्तमाने तुलामेषे नाड्यस्तूभयतो दशेति वचनात् ॥ न चात्र त्रिंशत्घटिकावादिनः सामान्यवचनेन विरोधः शंकनीयः ॥ सामान्यवचनस्याभ्यनुज्ञापरत्वात् ॥ विशेषवचनोक्तो घटिकासंकोच एव प्रशस्तः ॥ याः याः सन्निहिता नाड्यस्तास्ताः पुण्यतमाः स्मृता इति देवलेनोक्तत्वात्केनापि निमित्तेन सन्निहितघटिकास्वनुष्ठानासंभवे त्रिंशद्घटिकाः परावधित्वेनानुज्ञायंते षडशीतिमुखे तो पि दीर्घमवधिमाह वृद्धवसिष्ठः ॥ षडशीत्यामतीतायां षष्टिरुक्तास्तु नाडिका इति ॥ विष्णुपद्यां प्रशस्तकालं स एवाह ॥ पुण्यायां विष्णुपद्यां च प्राक्पश्चादपि षोडशेति ॥ संक्रांतीनां पूर्वोत्तरौ पुण्यकालौ निर्णीतौ ॥ ताश्च संक्रांतयः कदाचिदन्हि भवंति ॥ कदाचिद्रात्रौ भवंति ॥ तद्भेदादनुष्ठानभेद राम· १५०

CC-0. In Public Domain. Digitization by eGangotri

माह वृद्धवसिष्ठः॥ अन्हि संक्रमणे पुण्यमहः कृत्स्नं प्रकीर्तितं॥ रात्रौ संक्रमणे भानोर्दिनार्द्धं स्नानदानयोः॥ अ
र्द्धरात्रादधस्तस्मिन्मध्यान्हस्योपरि क्रिया॥ ऊर्ध्वे संक्रमणे चोर्ध्वं उदयात्प्रहरद्वयं॥ पूर्णे चेदर्धरात्रे तु यदा सं
क्रमते रविः॥ प्राहुर्दिनद्वयं पुण्यं मुक्त्वा मकरकर्कटाविति॥ अन्हि यदा संक्रांतिर्भवति तदा कृत्स्नस्यान्हः पुण्य
त्वं॥ रात्रौ संक्रमणे पूर्वोत्तरदिनार्द्धयोः पुण्यत्वं विदधता वचनेनार्थाद्रात्रौ स्नानदानादिकं प्रतिषिध्यते॥ एवं स
त्युदयानंतरभाविनि दक्षिणायने पूर्वभागे प्राशस्त्यं बाधित्वोत्तरभागेनुष्ठानं भवति॥ अस्तमयप्राचीनक्षणभा
विन्युत्तरायणे चोत्तरभागप्राशस्त्यं परित्यज्य पूर्वभागेनुष्ठातव्यं॥ उत्तरभागप्राशस्त्यं तु मध्यान्हादिसंक्रम
णविषयं॥ तत्राहन्येव ह्येयोपादेययोः पूर्वोत्तरभागयोः संभवात्तेनैव न्यायेन कर्कटेपि मध्यान्हभाविनि पू
र्वभागप्राशस्त्यं भवति अस्तमयप्राचीनभाविषु षडशीतिमुखेष्वप्युत्तरभागप्राशस्त्यं परित्यज्य मकरन्याये
न पूर्वभागप्राशस्त्यं विधातव्यं॥ उदयानंतरभाविषु तेषु वचनांतराविरोधेनोत्तरभाग एवानुष्ठानसंभवात्तद्वि
रुद्धं पूर्वभागप्राशस्त्यं न विधीयते॥ उभयभागप्राशस्त्योपेतेषु विषुवद्विष्णुपदेषु मध्यान्हभाविषु पूर्वत्रोत्तर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

 त्रवास्वेच्छयानुष्ठातव्यं ॥ उदयानंतरभाविषुतेषुपूर्वभागप्राशस्त्यंबाध्यते॥ अस्तमयप्राप्तेषु तेषुउत्तरप्राश
 स्त्यंबाध्यतइतिविवेकः॥एतद्वचनानुसारेणयस्यसंक्रमणस्ययस्मिन्भागेनुष्ठानंतस्मिन्नेवभागेव्यवहि
तानाड्यःपुण्याःईषत्सन्निहिताः पुण्यतराः अत्यंतसन्निहिताः पुण्यतमाद्रष्टव्याः॥ यदारात्रौ भानोःसंक्र
मणंभवतितदातस्यारात्रेःपूर्वस्यचोत्तरस्यवादिनस्यार्द्धप्रहरद्वयंस्नानदानयोःपुण्यं॥कुत्रपूर्वदिनंकुत्रप
रदिनमितिविवक्षायांतदुभयमर्द्धरात्रादितिवचनेनव्यवस्थाप्यते॥रात्रेरर्द्धमर्द्धरात्रः॥द्वितीयप्रहरस्यचर
मघटिकातृतीयप्रहरस्यप्रथमघटिकेत्येवंघटिकाद्वयमुक्तेकालस्तस्मादर्धरात्रादधःसंक्रमणेसतिपूर्वदि
नमध्यान्हस्योपरितनेप्रहरद्वयेक्रियाकार्या॥अर्द्धरात्रादूर्ध्वंसंक्रमणेसतिउत्तरकालीनादुदयादूर्ध्वप्रहरद्व
यंपुण्यंपूर्णेर्द्धरात्रेघटिकाद्वयेसंक्रांतौपूर्वोत्तरदिनद्वयंकृत्स्नंपुण्यं॥ तदुक्तंभविष्योत्तरे॥ संक्रमस्तेनिशीथे
स्यात्षड्यामाःपूर्वपश्चिमाः॥ संक्रांतिकालोविज्ञेयस्तत्रस्नानादिकंचरेदिति॥ अत्रेयंव्यवस्था॥ अर्द्धरात्रेय
दाषडशीतिस्तदानीमेतद्वचनानुसारेणपूर्वोत्तरदिनद्वयस्यपुण्यत्वाद्यद्यथेच्छिकोविकल्पःप्राप्नोति॥त

CC-0. In Public Domain. Digitization by eGangotri

थाप्युत्तरदिनेषष्टिघटिकाप्रतिपादक प्रातिस्विकवचनानुग्रहलाभात्तत्रैवानुष्ठातव्यं॥ विषुवयोर्विष्णुपदे
षुच प्रातिस्विकवचनंननियामकं। तस्यवचनस्यपूर्वोत्तरभागयोः साम्येनप्राशस्त्यप्रतिपादकत्वात्॥ प्रकृते
वचनंपूर्वोत्तरदिनेसाम्येनविधत्ते॥ तस्मात्पूर्वस्मिन्नुत्तरस्मिन्वास्वेच्छयानुष्ठानमितिविकल्प्यते॥ अयन-
योरन्यप्रकारांतरंवक्ष्यते॥ ॥अयनव्यतिरिक्तासुदशसुसंक्रांतिषुमध्यरात्रादूर्ध्वंप्रवृत्तासुपरेद्युरनुष्ठान
मित्यत्रापिनास्तिसंदेहः॥ षडशीत्यांतुप्रकृतवचने नपूर्वेद्युरनुष्ठानंप्राप्तं॥ षष्टिघटिकाप्राशस्त्यप्रतिपाद
कप्रातिस्विकवचनेनपरेद्युः प्राप्नोति॥ अतः संदेहेसति पूर्वेद्युरनुष्ठानमितिनिर्णयोद्रष्टव्यः॥ कुतः॥ विष्णुप
द्यांधनुर्मीननृयुक्कन्यासुवैतदा॥ पूर्वोत्तरगतंरात्रौभानोः संक्रमणंभवेत्॥ पूर्वाण्हे पंचनाड्यस्तुपुण्याःप्रो
क्ता मनीषिभिः॥ अपराण्हेतुपंचैवश्रौतेस्मार्त्ते चकर्मणीतिस्मृतेः॥ यदारात्रौपूर्वभागगतंविष्णुपदीषड
शीतिसंक्रमणंभवेत्॥ तदापूर्वेद्युरपराण्हे पंचनाड्यः पुण्याः उत्तरभागगतेसंक्रमणेपरेद्युः पूर्वाण्हे पंचना
ड्यः पुण्याः नचैवंसति —— प्रहरद्वयपुण्यत्वविरोधइतिवाच्यं॥ पंचनाडिकावचनेषुपुण्याधिक्यस्यवि

का·मा· वक्षितत्वात्॥ अतःप्रहरद्वयवाक्यंपुण्यमात्राभिप्रायं॥ एतस्मिन्नेवविषयेदेवीपुराणेपठ्यते॥ असंपूर्णेर्द्ध
१५२ रात्रेतुउदयेस्तमयेपिच॥ मानार्द्धंभास्करेपुण्यमपूर्णेशर्वरीदले॥ अर्द्धरात्रेत्वसंपूर्णेदिवापुण्यमनागतं॥
संपूर्णउभयोर्द्धंयमतिरिक्तेपरेहनीति॥ अत्रभास्करशब्देनसूर्ययुक्तंदिनमुपलक्ष्यते॥ यद्वाभास्करशब्दो
नसूर्येरूढःकिंतुयौगिकः॥ भासंकरोतीतिव्युत्पत्तिसंभवात्॥ तथाचसूर्यइवभास्करशब्दोदिनेपिमु॰
ख्यः॥ तस्यापिभासंप्रत्यधिकरणकारकत्वात्॥ भास्करेदिवसेविद्यमानप्रहरचतुष्टयंतस्यार्द्धंप्रहरद्वयं॰
आदित्यास्तमयस्योपरितनआगामिसूर्योदयात्प्राचीनः कालोरात्रिः॥ उदयोपरिअस्तमयात्प्राचीनःकालो
दिनं॥ उदयास्तमयकालौसंधिरूपतयाप्रोक्ताभ्यांरात्रिदिवसाभ्यांपृथगित्येके॥ रेखामात्रस्यापिसूर्य
मंडलांशस्यदृश्यमानतयादिवसांतःपातितावित्यपरे॥ सर्वथापिनरात्रौतयोरंतर्भावः॥ साचरात्रिस्त्रेधा
भिद्यतेमध्यवर्त्तिघटिकाद्वयात्मकएकोभागस्तस्मात्पूर्वोत्तरौद्वौभागौ॥ तत्रपूर्वभागेसंपूर्णेर्द्धरात्रइत्यनेन राम
विवक्ष्यते॥ तस्मिन्यदासंक्रांतिस्तदानींसूर्यास्तमयेप्रत्यासन्नंयत्पूर्वदिनस्योत्तरार्द्धंतत्पुण्यं॥ अपूर्णेशर्व १५२

CC-0. In Public Domain. Digitization by eGangotri

रीदलइत्यनेनार्द्धरात्रादनंतरभावीरात्रिभागोवि – वक्षितः॥पूर्वोत्तरदलयोरेकैकस्यापिघटिकाया अर्द्धरा
त्र कालार्द्धस्यपृथक्कृतत्वादसंपूर्त्तिरवगंतव्या॥तस्मिन्घटिकान्यूनेपरभागेयदासंक्रांतिस्तदानींभाविस्र्
र्योदयेप्रत्यासन्नंदिनार्द्धपुण्यं॥अयमेवार्थोद्वितीयश्लोकेप्रपंच्यते॥घटिकान्यूनत्वेनासंपूर्णार्द्धरात्रेपूर्व
भागेयदासंक्रमणंभवतितदायद्यपिदिवासंक्रमणमनागतंतथापितस्यदिवसस्यउत्तरार्द्धपुण्यंयदासंपू
र्णेर्द्धरात्रेघटिकाद्वयात्मकत्वेनिशीथेसंक्रमणंभवेत्तदानींपूर्वोत्तरयोर्दिनयोः पुण्यंज्ञेयं॥अतिरिक्तेपर
भागेसंक्रांतौपरेहनिपूर्वार्द्धपुण्यं॥देवलोपि॥आसन्नसंक्रमंपुण्यंदिनार्द्धस्नानदानयोः॥रात्रौसंक्रमणे
भानोर्विषुवत्ययनेदिनेति॥अयमर्थः॥रात्रौभानोः संक्रमणेविषुवन्नामके – जातेसतिसंक्रमणप्रत्या
सन्नदिनार्द्धपुण्यं॥पूर्वरात्रसंक्रमणेपूर्वदिनस्योत्तरार्द्धपुण्यं॥अपररात्रसंक्रमणेपरदिनस्यपूर्वार्द्धमित्यव
गंतव्यं॥अयनेअयनना – मकेभानोः संक्रमणेदिवाजातेसतियथायोगंतद्दिनार्द्धंतुपुण्यंद्रष्टव्यं॥कर्कटेपू
र्वार्द्धंमकरेउत्तरार्द्धं॥एतच्चमध्यंदिनायनविषयं॥उदयास्तमयप्रत्यासन्ने अयनेपूर्वोत्तरभागप्राशस्त्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बाधयाकृत्स्नदिवसपुण्यत्वनिर्णयः पूर्वमेवोक्तः॥ अयनव्यतिरिक्तेषु दशसु संक्रमणेषु रात्रिगतेषु यो नि
र्णयस्तं सर्वं पर्युदसितुं तद्वचःशेषः मुक्त्वा मकरकर्कटावितिवर्णितः॥ याया: सन्निहितानाड्यस्तास्ताः पु
ण्यतमाइत्युक्ते न सामान्यवचनेन रात्रिसंक्रमणेषु रात्रावेवानुष्ठानं प्रसक्तं तद्दूषणे त्वदशसु संक्रांतिषु दि
वानुष्ठानं विधाय मकरकर्कटयोस्तत्पर्युदासे सति पूर्वप्रसक्तं रात्रावनुष्ठानमेव पर्यवस्यति॥ एवं सति रात्रौ स्ना
नमभ्युपगच्छतो याज्ञवल्क्यवचस्यापि कश्चिद्विषयः संपद्यते॥ तथा च याज्ञवल्क्यः॥ राहुदर्शनसंक्रांति
विवाहात्ययवृद्धिषु॥ स्नानदानादिकं कार्यं निशि काम्यव्रतेषु चेति॥ सुमंतुरपि॥ रात्रौ स्नानं न कुर्वीत दानं चै
व विशेषतः॥ नैमित्तिकं च कुर्वीत स्नानं दानं च रात्रिषु॥ यज्ञे विवाहे यात्रायां तथा पुस्तकवाचने॥ दानान्येतानि श
स्तानि रात्रौ देवालये तथा॥ ग्रहणोद्वाहसंक्रांतियात्रार्त्तिप्रसवेषु च॥ श्रवणे चेतिहासस्य रात्रौ दानं प्रशस्यत इ
ति॥ ननु यथोक्तपर्युदासानुगृहीतैः पुण्यतमत्ववादिदेवलयाज्ञवल्क्यसुमंतुवचनैर्मकरकर्कटयोर्निशि य
नुष्ठानप्रापणं शास्त्रांतरेण विरुद्धं॥ तथा च भविष्योत्तरे॥ मिथुनात्कर्कसंक्रांतिर्यदि स्याद्दंशुमालिनः॥ प्रभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेवानिशीथेवाकुर्याद्दहनिपूर्वतः॥ कार्मुकंतुपरित्यज्यझषंसंक्रमतेरविः॥ प्रदोषेचार्द्धरात्रेवास्नानंदानंपरे
हनीति॥ वृद्धगार्ग्योपि॥ यदास्तमयवेलायांमकरंयातिभास्करः॥ प्रदोषेचार्द्धरात्रेवास्नानंदानंपरेहनीति॥ अ
र्द्धरात्रेतदूर्ध्वंवासंक्रांतोदक्षिणायने॥ पूर्वमेवदिनंग्राह्यंयावन्नोदयतेरविरिति॥ मैवं॥ भविष्योत्तरवृद्धगा-
र्ग्यवचनेषुरात्र्यनुष्ठानप्रतिषेधस्याप्रातीतेर्दिवसानुष्ठानेनैवानुष्ठानप्रतिषेधकल्पनेपर्युदासानुगृहीतवच
नानामानर्थक्यंप्राप्नोति॥ तस्माछास्त्रद्वयेनविकल्पप्राप्तौतत्तद्देशप्रसिद्धशिष्टाचारेणव्यवस्थाद्रष्टव्या॥ यथो
क्तानांद्वादशसंक्रांतीनांयथोक्तेषुपुण्यकालेषुमंदादिसंज्ञोपजीवनेनकश्चिद्विशेषोदेवीपुराणेदर्शितः॥
द्वादशैवसमाख्याताःसमासंक्रांतिकल्पनाः॥ सप्तधातुप्रबोद्धव्याएकैकैवयथाशृणु॥ मंदामंदाकिनीध्वांक्षी
घोराचैवमहोदरी॥ राक्षसीमिश्रिताप्रोक्तासंक्रांतिःसप्तधाध्रुवं॥ मंदाध्रुवेषुविज्ञेयामृदौमंदाकिनीतथा॥ क्षि
प्रेध्वांक्षीविजानीयादुग्रेघोराप्रकीर्त्तिता॥ चरेमहोदरीज्ञेयाक्रूरैर्ऋक्षैस्तुराक्षसी॥ मिश्रिताचैवविज्ञेयामिश्र
ऋक्षैस्तुसंक्रमे॥ द्विचतुःपंचसप्ताष्टनवद्वादशएवच॥ क्रमेणघटिकाह्येतास्तत्पुण्यंपारमार्थिकमिति॥

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रसमाशब्दः संवत्सरवाची॥ समासंबंधिन्यः संक्रांतिकल्पनामेषादीनां द्वादशैवसमाख्याताः॥ तासुद्वाद
शसंक्रांतिषैकैकामंदादिभिर्नामभिर्व्यवहार्य्या॥ तानिचनामानिनक्षत्रविशेषोपजीवनेनप्रवृत्तानि॥ तद्यथा॥
ध्रुवेषुनक्षत्रेषुप्रारब्धासंक्रांतिर्मंदा॥ एवंमृदुक्षिप्रादिनक्षत्रेषुप्रारब्धासंक्रांतिःक्रमेणमंदाकिनीध्वांक्ष्यादिना
मभाग्भवति॥ रोहिण्युत्तरात्रयंचेतिचत्वार्य्येतानिनक्षत्राणिध्रुवाणि॥ रेवतीचित्रानुराधामृगशीर्षाणिचत्वारि
मृदूनी॥ हस्ताश्विनीपुष्याभिजिन्नक्षत्राणिचत्वारिक्षिप्राणि॥ भरणीपूर्वात्रयंमघाचेत्येतानिपंचोग्राणि॥ श्र
वणपुनर्वसुशतभिषक्धनिष्ठास्वात्याख्यानिपंचचराणि॥ अश्लेषामूलार्द्राज्येष्ठानिचत्वारिक्रूराणि॥ कृत्तिका
विशाखाश्विन्याख्यानिमिश्राणि॥ सेयंसप्तधानक्षत्रव्यवस्थाज्योतिर्ग्रंथेमुहूर्त्तविधानसारेपठिता॥ क्षिप्रं
चस्थिरमुग्रंचदारुणंचरमेवच॥ मृदुसाधारणंऋक्षंसप्तभेदाःप्रकीर्त्तिताः॥ कराश्विनीवाक्पतिभंतथाभि
जिल्लघूनिपुण्येगमनेविभूषणे॥ हिरण्यगर्भाधिपमुत्तरात्रयंध्रुवाख्यमेतद्धिनवामुनामृतं॥ सुतंभरण्यास
हपूर्विकात्रयंमघातथोग्राख्यमिदंभपंचकं॥ भुजंगमंनैर्ऋतमैंद्रमार्द्रभवंतितीक्ष्णानिहितानिसर्वदा॥ च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

राणि पंच श्रवणं पुनर्वसू जलेशभं वासवमानिलं तथा ॥ मृदूनि पौष्णं सुरवर्द्धकी स्वरं तथानुराधामृतरश्मिदैवतं ॥ हुताशनर्क्षेण सह द्विदैवमुशंति साधारणसंज्ञमस्मिन्निति ॥ यथोक्तनक्षत्रविशेषोपजीवनेन प्रवृत्तमंदादिभिः सप्तनामभिर्युतमेषादिसंक्रांतौ क्रमेण द्विचतुरित्यादिसप्तविधसंख्या नाड्यः पुण्या इति यदुक्तं तत्र नास्ति संदेह इत्यस्मिन्नर्थे पारमार्थिकः शब्दः प्रयुक्तः ॥ मंदायां प्रत्यासन्नं घटिकाद्वयं पुण्यं मंदाकिन्यां घटिकाचतुष्टयं ॥ ध्वांक्षायां पंचकं ॥ घोरायां सप्तकं ॥ महोदर्यामष्टकं ॥ राक्षस्यां नवकं ॥ मिश्रितायां द्वादशकं ॥ मेषसंक्रांताबुदाहृतः सोयं प्रकारो वृषभादिष्वेकादशसु संक्रांतिष्वनुसंधेयः ॥ देवीपुराणोदाहरणात्प्राचीनग्रंथे तत्तत्संक्रांतिषु यः पुण्यः कालो निर्णीतस्तस्मिन्काले देवीपुराणोक्तो द्विचतुरित्यादिकः पुण्यातिशयप्रतिपादको विशेषो द्रष्टव्यः ॥ निर्णीतेषु संक्रांत्यादीनां पुण्यकालेषु यत्कर्त्तव्यं स्नानदानादिकं तत्सर्वमेव शातातपवचनद्वयेनोदाहृतं । ब्रह्मपुराणेपि । नित्यं द्वयोरयनयोस्तथा विषुवतोर्द्वयोः ॥ चंद्रार्कयोर्ग्रहणयोर्व्यतीपातेषु पर्वसु ॥ अहोरात्रोषितः स्नानमर्घं दानं तथा जपं । यः करोति प्रसन्नात्मा तस्य स्यादक्षयं च तत् ॥ अयने विषुवे चैव चंद्रसूर्यग्रहे तथा ॥ कृतोपवासः सु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्नातः सर्वपापैः प्रमुच्यते॥ वसिष्ठोपि॥ उपोष्यैव तु संक्रांतौ स्नातो योभ्यर्च्चयेद्धरिं॥ प्रातः पंचोपचारेण सकाम्यं
फलमश्नुते॥ अयने विषुवे चैव चंद्रसूर्यग्रहे तथा॥ त्रिरात्रोपोषितनरः सर्वपापैः प्रमुच्यते॥ स्नात्वाय ः पूजयेदीशं स
र्वान्कामान्समश्नुते॥ सप्तोपोष्य रवेर्वारानादौ स्नात्वा तु संक्रमे॥ अर्कमभ्यर्चयेद्यस्तु स दुःखी सुखमश्नु
त इति॥ शातातपः॥ अयनादौ सदा देयं द्रव्यं नित्यं गृहे च यत्॥ षडशीतिमुखे चैव मोक्षे वै चंद्रसूर्ययोरिति॥ उ
क्तस्नानदानादिकर्त्तव्यस्य संक्रांतिविशेषमुपजीव्य कालविशेषमाह शातातपः॥ कुर्यात्सदायने मध्ये वि
ष्णुपद्यां विषुवति॥ षडशीत्यामंतभागे स्नानादिविधिमादृत इति॥ गालवोपि॥ मध्ये विषुवति दानं विष्णुपदे
दक्षिणायने चादौ॥ षडशीतिमुखे तीते तथोदगयने च भूरिफलमिति॥ अयनादिषु यत्र यावान्पुण्यः कालः
पूर्वं निर्णीतस्तत्र तावंतं कालं त्रेधा विभज्य मध्ये विषुवतीत्याद्यवगंतव्यं॥ तस्मिन्नपि मध्यादिभागे सन्निहिता
नां नाडीनां पूर्वोदाहृतवचनेन पुण्यतमत्वं द्रष्टव्यं॥ संक्रांतिषु फलमाह भरद्वाजः॥ षडशीत्यां तु यद्दानं यद्दानं विषु रामः
वद्द्ये॥ दृश्यते सागरस्यांतस्तस्यांतो नैव दृश्यत इति॥ वृद्धवसिष्ठः॥ अयने कोटिपुण्यं च सहस्रं विषुवे फलम्॥ १५५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षडशीत्यां सहस्त्रं तु फलं विष्णुपदेषु चेति ।। मेषादिसंक्रांतयो यस्मिन्दिने भवंति तस्माद्दिनात्पूर्वेभ्य एकादश
दिनेभ्यः प्राचीने दिने मेषायनं वृषायनमित्येवं तत्तन्नामांकितमयनं भवति ।। तस्मिन्नयने स्नानादिषु च पुण्य
कालमाह जाबालिः ।। संक्रांतिषु यथा कालस्तद्वीयेप्ययने तथा ।। अयने विंशतिः पूर्वा मकरे विंशतिः परेति ।। म
करव्यतिरिक्तैकादशसंक्रांतिसंबंधिनि त्वयने संक्रांति वैलक्षण्यं ।। तद्यथा ।। मकरायने प्राचीना विंशतिघटि
काः पुण्याः मकरसंक्रांतौ तु पाश्चात्या विंशतिघटिकाः पुण्याः न केवलमादित्यस्यैव संक्रमायने पुण्यकालः
किंतु सर्वेषामपि ग्रहाणां नक्षत्र राशि संक्रमे पुण्यकालो भवति तदुक्तं ज्योतिःशास्त्रे। नक्षत्र राश्योः रविसंक्रमे
स्युर्वाक्परस्ताद्दश चंद्र नाड्यः ।। पुण्यास्तथैंद्रो स्त्रिधरा पलैर्युगे कैव नाडी मुनिभिः सुभोक्ता ।। नाड्यश्च तस्रः
सपूलाः कुजस्य बुधस्य तिस्रः पलविंश युक्ताः ।। सार्द्धाश्च तस्रो घटिकाः पलानि गुरोस्तु सप्तैव भृगोश्च तस्रः ।।
नाड्यः पलैकं घटिकाद्यशीतिःपलानि सप्तैव शनैश्चरस्य ।। आद्यंत मध्ये जप होम दानं कुर्वन्नवाप्नोति सुरेंद्रधा
मेति ।। अयमर्थः ।। आदित्यस्य राशि नक्षत्र गमने अर्वाक्परतश्च षोडश घटिकाः पुण्यकालः ।। तथा चंद्रस्या

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिघटिकैका पलानि त्रयोदशार्वाक्परतश्च पुण्यकालः॥ एवं मंगलस्य घटिकाश्चतस्रः पलमेकं च पुण्य॰
कालः॥ तथा बुधस्य तिस्रो घटिकास्त्रयोदश पलानि च पुण्यकालः॥ बृहस्पतेरपि सार्द्धं च तस्रो घटिकाः सप्त
पलानि पुण्यकालः॥ शुक्रस्य च तस्रो घटिकाः पलमेकं च पुण्यकालः॥ शनैश्चरस्य द्व्यशीतिघटिकाः पलानि
सप्त पुण्यकालः॥ स्कांदे नागरखंडे॥ एकांतेते मया प्रोक्ताः कालाः संक्रांतिपूर्वकाः॥ नैतेषु विद्यते विघ्नो यत॰
श्चाक्षयसंज्ञिताः॥ अश्रद्धयापि यद्दत्तं कुपात्रेभ्योपि मानवैः॥ अकालेपि हि तत्सर्वं सत्यमक्षयतां व्रजेदि
ति॥ ॥इति संक्रांतिनिर्णयः॥ अथ ग्रहणं निर्णीयते॥ ॥तत्र वृद्धगार्ग्यः॥ पूर्णिमाप्रतिपत्संधौ राहुः सं
पूर्णमंडलं॥ ग्रसते चंद्रमर्कं च दर्शप्रतिपदंतरेति॥ तत्र पर्वणोंतभागः स्पर्शकालः प्रतिपद आद्यो भागो॰
मोक्षकालः॥ तदुक्तं ब्रह्मसिद्धांते॥ यावान्कालः पर्वणोंते तावान्प्रतिपदादिमः॥ रवींदुग्रहणानेहा संप्र
ण्योमिश्रणाद्भवेत्॥ ग्रहणानेहा राहुग्रहणकालः तत्र कर्त्तव्यमाह वृद्धवसिष्ठः॥ गंगातोये तु संप्राप्ते इंदोः राम॰
कोटी रवेर्दश॥ गवां कोटिप्रदानेन सम्यक्दत्ते नयत्फलम्॥ गंगास्नानेन तत्फलं स्याद्राहुग्रस्ते निशाकरे॥ १५६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिवाकरे पुनस्तत्र दश संख्यामुदाहृतमिति॥ अस्य श्लोकद्वयस्य प्रथमार्द्धमपेक्षितपदाध्याहारेण योजनी
यं॥ तद्यथा॥ इंदोर्ग्रहणे संप्राप्ते सति गंगातोयेऽवगाहनं कोटिगोदानसमं भवति॥ रवेर्ग्रहणे ततो दशगुणं
फलं॥ अयमेवार्थ उपरितनेनार्द्धत्रयेण स्पष्टीकृतः॥ व्यासोपि॥ इंदोर्लक्षगुणं पुण्यं रवेर्दशगुणं ततः॥ गं
गातोये तु संप्राप्ते इंदोः कोटी रवेर्दश॥ गवां कोटिसहस्रस्य यत्फलं लभते नरः॥ तत्फलं जान्हवीस्नाने राहुग्र
स्ते निशाकरे॥ दिवाकरे तु स्नातस्य दशसंख्यमुदाहृतं॥ चंद्रसूर्यग्रहे चैव योवगाहेत जान्हवीं॥ स स्नातः सर्व
तीर्थेषु किमर्थमटते महीमिति॥ गंगाव्यतिरिक्तमहानदीतोये लक्षगुणदशलक्षगुणत्वं॥ गंगातोये तु कोटि
गुणदशकोटिगुणत्वं॥ ब्रह्मपुराणेपि॥ तिस्रो नद्यो महापुण्या वेणी गोदा च जान्हवी॥ गां हरीशांघ्रिकात्प्राप्ता
गंगा इतीह कीर्त्तिताः॥ हरिश्चेशश्च हरीशौ॥ अंघ्रिः पादः॥ कं शिरः॥ अंघ्रिश्च कं च अंघ्रिकं॥ हरेः पादादीश्वर
स्य शिरसो गां भूमिं प्राप्ता गंगा॥ यद्यपि जान्हव्येव तादृशी॥ न तु वेणीगोदे॥ तथापि छत्रिणो गच्छंतीति न्याये
न जान्हव्या सह निर्दिष्टयोस्तयोरपि गंगात्वमविरुद्धं॥ यद्वा जान्हवीजलमेव केनचिन्निमित्तेन ब्रह्मगिरिवायु

गिर्य्योरुद्भूतमितिकृत्वातयोरपिमुख्यमेवगंगात्वं॥ तासगंगासुस्नानंमुख्यं। तदसंभवेनद्यंतरेषुस्नायात्॥
तदुक्तंमहाभारते॥ गंगास्नानंप्रकुर्वीतग्रहणेचंद्रसूर्ययोः॥ महानदीषुवान्यासुस्नानंकुर्याद्यथाविधीति॥ म
हानद्योब्रह्मपुराणेदर्शिताः॥ गोदावरीभीमरथीतुंगभद्राचवेणिका॥ तापीपयोष्णीविंध्यस्यदक्षिणेतुप्रकीर्त्ति
ताः॥ भागीरथीनर्मदाचयमुनाचसरस्वती॥ विशोकाचवितस्ताचविंध्यस्योत्तरतस्तथेति॥ महानद्यसंभवेज
लांतराण्याहशंखः॥ वापीकूपतडागेषुगिरिप्रस्रवणेषुच॥ नद्यांनदेदेवखातेसरसीषूद्धृतांबुनि॥ उष्णोदकेन
वास्नायाद्ग्रहणेचंद्रसूर्ययोरिति॥ एतत्सर्वमभिप्रेत्याहव्यासः॥ सर्वंगंगासमंतोयंसर्वेव्याससमाद्विजाः॥ सर्
वंभूमिसमंदानंग्रहणेचंद्रसूर्ययोरिति॥ ॥उष्णोदकस्यातुरविषयत्वंव्याघ्रआह। आदित्यकिरणैः पूतंपुनः
पूतंचवन्हिना॥ अतोव्याध्यातुरःस्नायाद्ग्रहणेप्युष्णवारिणेति॥ गंगातोयमारभ्योष्णोदकांतेषुउत्तरोत्तरस्या
नुकल्पत्वमुक्तं॥ एतदेवाभिप्रेत्योष्णोदकादिषुसमुद्रजलांतेउत्तरोत्तरस्यप्राशस्त्यमाहमार्कंडेयः॥ शीतमु
ष्णोदकात्पुण्यमपारक्यंपरोदकात्॥ भूमिष्ठमुद्धृतात्पुण्यंततःप्रस्रवणोदकं॥ ततोपिसारसंपुण्यंततःपुण्यं

CC-0. In Public Domain. Digitization by eGangotri

नदीजलं॥तीर्थतोयंततः पुण्यंमहानद्यंबु पावनं॥ ततस्ततोपिगंगांबु पुण्यंपुण्यस्ततोंबुधिरिति॥मासविशे
षेणनदीविशेषोदेवीपुराणेभिहितः॥कार्तिकेग्रहणंश्रेष्ठंगंगायमुनसंगमे॥ मार्गेतुग्रहणंप्रोक्तं देविकायां
महामुने॥पौषेतुनर्मदापुण्यामाघेसन्निहिताशुभा॥फाल्गुनेवरुणापुण्याचैत्रेपुण्यासरस्वती॥वैशाखेतुम
हापुण्याचंद्रभागासरिद्वरा॥ज्येष्ठेतुकौशिकीपुण्या आषाढेतापिकानदी॥श्रावणेसिंधुनामातुतथाभाद्रेतुगं
डकी॥आश्विनेसरयूःश्रेष्ठातथापुण्यातुनर्मदेति॥ग्रहणविशेषेतुनदीविशेषस्तत्रैवाभिहितः॥गोदावरी
महापुण्याचंद्रेराहुसमन्विते॥सूर्येचराहुणाग्रस्तेतमोभूतेमहामुने॥नर्मदातोयसंस्पर्शेकृतकृत्याभवंति
ते॥स्नानवत्स्मरणादिष्वपिपुण्यमाह॥स्मृत्वाशतक्रतुफलंदृष्ट्वासर्वाघनाशनं॥स्पृष्ट्वागोमेधपुण्यंतुपीत्वा
सौत्रामणेर्लभेत्॥स्नात्वावाजिमखंपुण्यंप्राप्नुयादविचारतः॥ रविचंद्रोपरागेचअयनेचोत्तरेतथेति॥क्षेत्र
विशेषमाह॥गंगा — कनखलंपुण्यंप्रयागःपुष्करंतथा॥कुरुक्षेत्रंमहापुण्यंराहुग्रस्तेदिवाकरइति॥ ग्रहणे
श्राद्धंविहितंलिंगपुराणे॥व्यतीपातक्षणोयावान्चंद्रसूर्यग्रहक्षणः गजच्छायातुसाप्रोक्तापितॄणांदत्तमक्षयमिति॥ महा

CC-0. In Public Domain. Digitization by eGangotri

भारतेपि॥ सर्वस्वेनापि कर्त्तव्यं श्राद्धं वै राहुदर्शने॥ अकुर्वाणस्तु नास्तिक्यात्पंके गौरिव सीदतीति॥ ऋष्यशृंगोपि॥ चंद्रसूर्य
ग्रहे यस्तु श्राद्धं विधिवदाचरेत्। तेनैव सकला पृथ्वी दत्ता विप्रस्य वै करइति। विष्णुरपि। राहुदर्शनदत्तं हि श्राद्धमाचंद्रतारकं
। गुणवत्सर्वकामीयं पितॄणामुपतिष्ठतइति। ग्रहणे रात्रावपि स्नानादेर्न निषेधः। तथा च शातातपः। स्नानं दानं ततः श्राद्धमनंतं
राहुदर्शने। आसुरा रात्रिरन्यत्र तस्मात्तां परिवर्जयेदिति॥ देवलः। यथा स्नाने च दाने च सूर्यस्य ग्रहणे दिवा। सोमस्यापि तथा रा
त्रौ स्नाने दाने विधी मतइति॥ श्राद्धं प्रकृत्य कूर्मपुराणे॥ नैमित्तिकं तु कर्त्तव्यं ग्रहणे चंद्रसूर्ययोः॥ बांधवानां च मरणे नारकी स्याद
तोन्यथा॥ काम्यानि चैव श्राद्धानि शस्यंते ग्रहणादिष्विति॥ वारविशेषयोगे फलातिशयमाह व्यासः॥ रविग्रहः
सूर्यवारे सोमे सोमग्रहस्तथा॥ चूडामणिरितिख्यातस्तत्र दानं तत्फलं भवेदिति॥ वारेष्वन्येषु यत्पुण्यं ग्रहणे चंद्र
सूर्ययोः॥ तत्पुण्यं कोटिगुणितं ग्रासे चूडामणौ स्मृतमिति॥ अतिथि प्राप्त्यादिवद्ग्रहणस्यापि श्राद्धकालमाह
मार्कंडेयः॥ विशिष्टब्राह्मणे प्राप्ते सूर्येंदुग्रहणे दिने॥ जन्मर्क्षग्रहपीडासु श्राद्धं कुर्यान्नयेच्छयेति॥ अत्र श्राद्धं

नान्नेन किंतु हेमादिना॥ तदाह बौधायनः॥ अन्नाभावे द्विजाभावे प्रवासे पुत्रजन्मनि॥ हेमश्राद्धं सग्रहे च कु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 त्नानंतस्यशुद्ध्यर्थतयातत्सचैलंविधेयं॥तदाहवृद्धवसिष्ठः॥सर्वेषामे ववर्णानांसूतकेराहुदर्शने॥सचै
 लंतुभवेत्स्नानंसूतकान्नंचवर्जयेदिति॥ग्रहणकालेततःपूर्ववासावत्स्वकंनत्सूतकान्नंपश्चादपिनभुंजीत
॥आदिमध्यावसानेषुयद्यद्विहितंतस्यफलातिशयउक्तोब्रह्मपुराणे॥उपमर्देलक्षगुणंग्रहणेचंद्रसूर्ययोः
॥पुण्यंकोटिगुणंमध्येमुक्तिकालेत्वनंतकमिति॥अत्रग्रहणेयद्दानंतत्सपात्रेकर्त्तव्यं॥तदुक्तंमहाभारते॥
अयनेविषुवेचैवग्रहणेचंद्रसूर्ययोः॥पात्रभूतायविप्रायभूमिंदद्यात्सदक्षिणामिति॥पात्रलक्षणमाह या·
ज्ञवल्क्यः॥नविद्ययाकेवलयातपसावापिपात्रता॥यत्रवृत्तमिमेचोभेतद्धिपात्रंप्रकीर्त्तितमिति॥पात्रेमुख्या
नुकल्पंचाहबोधायनः॥श्रोत्रियोऽश्रोत्रियोवापिपात्रंवाऽपात्रमेववा॥विप्रब्रुवोपिवाविप्रोग्रहणेदानमर्हतीति
॥अत्रभूमिवस्त्रादीन्यपिदेयानि॥तदुक्तंमहाभारते॥भूमिर्गावःसुवर्णंवाधान्यंवायद्यदीप्सितं॥तत्सर्वंग्रह
णेदेयमात्मनःश्रेयइच्छतेति॥प्रतिगृहीतृभेदेनफलतारतम्यंदक्षेणोक्तं॥सममब्राह्मणेदानंद्विगुणंब्राह्म
णब्रुवे॥श्रोत्रियेशतसाहस्रंपात्रेत्वानंत्यमश्नुतइति॥अह्निसूर्यग्रहणंरात्रौचंद्रग्रहमितिहिप्रसिद्धिः सा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्यीच्छूद्रः स दैवहीति ॥ श्यत्नातपोपि ॥ आपद्यनग्नौ तीर्थे च चंद्रसूर्यग्रहे तथा ॥ आमश्राद्धं द्विजो दद्याच्छूद्रो दद्या
त्स दैवहीति ॥ आशौचिनोपि ग्रहणे स्नानादि न निषिद्धं ॥ तथा च वृद्धवसिष्ठः ॥ सूतके मृतके चैव न दोषो राहुदर्श
ने ॥ तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यत इति ॥ इयं च शुद्धिः सर्वस्मार्त्तकर्मविषया ॥ अविशेषोक्तेः ॥ एतदे
वाभिप्रेत्य व्याघ्रः ॥ स्मार्त्तकर्मपरित्यागो राहोरन्यत्र सूतके ॥ श्रौतकर्मणि तत्कालं स्नातः शुद्धिमवाप्नुयादिति
॥ यत्तु ग्रहणनिमित्तमाशौचं तत्स्नानेन निवर्त्यं ॥ तदुक्तं ब्रह्मांडपुराणे ॥ आशौचं जायते नृणां ग्रहणे चंद्रसूर्ययोः
॥ राहुस्पर्शे तयोः स्नात्वा स्नानादौ कल्पते नर इति ॥ षड्विंशन्मतेपि ॥ सर्वेषामेव वर्णानां सूतकं राहुदर्शने ॥ स्नात्वा कर्मा
णि कुर्वीत शृतमन्नं विवर्जयेदिति ॥ ग्रहणस्याद्यंतयोः स्नानं विहितं स्मृत्यंतरे ॥ ग्रस्यमाने भवेत्स्नानं ग्रस्ते होमो
विधीयते ॥ मुच्यमाने भवेद्दानं मुक्ते स्नानं विधीयत इति ॥ होमदानवद्देवार्चनमपि स्नानद्वयमध्ये कार्यं ॥ तदुक्तं
ब्रह्मवैवर्त्ते ॥ स्नानं स्यादुपरागादौ मध्ये होमः सुरार्चनमिति ॥ तत्काले स्वापादिकं न कुर्यात् ॥ तदुक्तं शिवरहस्ये
॥ सूर्येंदुग्रहणे यावत्तावत्कुर्याज्जपादिकं ॥ न स्वपेन्न च भुंजीत स्नात्वा भुंजीत मुक्तयोरिति ॥ मोक्षानंतरभावि य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

थमादहः॥रवेस्त्वावर्तनादूर्ध्वं अर्वागेव निशीथतः॥चतुर्थप्रहरे चेत्स्याच्चतुर्थप्रहराद् ध इति॥रात्रौ प्रथमया-
माद् ऊर्ध्वं चंद्रग्रहणं चेत्॥आवर्त्तनान्मध्यान्हात्पूर्वं भुंजीत रात्रिपश्चिमयामे च रात्रिप्रथमयामाद् अर्वाग्भुंजीत
॥अन्हस्तृतीयप्रहरे चेद्रविग्रहस्तदा पूर्वं दिनस्यार्द्धरात्रात्प्राग्भुंजीत॥अन्हश्चतुर्थप्रहरे रविग्रहणं चेद्रात्रे
श्चतुर्थप्रहराद्धो भुंजीतेत्यर्थः॥निशीथो मध्यरात्रः॥शशिग्रहणे यामत्रये ऽण्व्यवधानमपेक्षितं।सूर्यग्रहणे
यामचतुष्टयेनेति तात्पर्यार्थः॥तथा च वृद्धगौतमः॥सूर्यग्रहे तु नाश्नीयात्पूर्वं यामचतुष्टयं।चंद्रग्रहे तु यामांस्त्रीन्बालवृद्धातुरैर्विनेति।
बालवृद्धातुरविषये मत्स्यः॥अपराण्हे न मध्यान्हे मध्यान्हे न तु संगवे॥भुंजीत संगवे चेत्स्यान्न पूर्वं भुजिमाचरे
दिति॥समर्थस्य भोजने प्रायश्चित्तमुक्तं कात्यायनेन॥चंद्रसूर्यग्रहे भुक्त्वा प्राजापत्येन शुद्ध्यति॥तस्मिन्नेव दिने
भुक्त्वा त्रिरात्रेणैव शुद्ध्यतीति॥शशिग्रहे यामत्रयस्यापवादमाह वृद्धवसिष्ठः॥ग्रस्तोदये विधोः पूर्वं नाहर्भोजन
माचरेदिति॥ग्रस्तास्तमये विशेषमाह भृगुः॥ग्रस्तावेवास्तमानं तु रवींदू प्राप्नुतो यदि॥परेद्युरुदये स्नात्वा शुद्धो
भ्यवहरेन्नर इति॥वृद्धगार्ग्योपि॥संध्याकाले यदा राहुर्ग्रसते शशिभास्करौ॥तदहर्नैव भुंजीत रात्रावपि कदाच

CC-0. In Public Domain. Digitization by eGangotri

र्वजनीनातादृशेग्रहणेयद्वक्तव्यंतदुक्तं॥ यत्तुकालविपर्यासेनप्राप्यमाणंज्योतिःशास्त्रप्रसिद्धंग्रहणंतत्रस्नाना
दिकंनकर्त्तव्यं॥ तदुक्तंनिगमे॥ सूर्यग्रहोयदारात्रौदिवाचंद्रग्रहस्तथा॥ तत्रस्नानंनकुर्वीतदद्याद्दानंचनक्वचि
दिति॥ ग्रस्तास्तमयेजाबालिराह॥ संक्रांतौपुण्यकालस्तुषोडशोभयतःकलाः॥ चंद्रसूर्योपरागेचयावद्दर्श
नगोचरइति॥ ग्रस्तस्यास्तमानपर्यंतंदर्शनगोचरत्वात्तावान्पुण्यकालोभवति॥ ग्रहणेभोजनव्यवस्थामाहम
नुः॥ चंद्रसूर्यग्रहेनाद्यादद्यात्स्नात्वाविमुक्तयोः॥ अमुक्तयोरस्तगयोर्दृष्ट्वास्नानंपरेहनीति॥ ग्रहेग्रहणकाले
॥ स्पर्शमारभ्यमोक्षपर्यंतोग्रहणकालः॥ तस्मिन्कालेनभुंजीत किंतुराहुणाचंद्रसूर्ययोर्मुक्तयोःसतोःपश्चात्स्ना
त्वाभुंजीत॥ यदाग्रस्तास्तमयस्तदापरेद्युर्विमुक्तौतौदृष्ट्वाभुंजीत॥ नकेवलंग्रहणकालेभोजनाभावः किंतुग्र
हणात्प्रागपि॥ तदाहव्यासः॥ नाद्यात्सूर्यग्रहात्पूर्वमन्हिसायंशशिग्रहात्॥ ग्रहकालेचनाश्नी—यात्स्नात्वा
श्नीयाद्विमुक्तयोः॥ मुक्तेशशिनिभुंजीतयदिनस्यान्महानिशा॥ अमुक्तयोरस्तगयोरद्याद्दृष्ट्वापरेहनीति॥ पूर्वका
लभोजननिषेधेविशेषमाहवृद्धवसिष्ठः॥ ग्रहणंतुभवेदिंदोःप्रथमादधियामतः॥ भुंजीतावर्त्तनात्पूर्वंपश्चिमेप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेति॥ विष्णुधर्मोत्तरेपि॥ अहोरात्रं न भोक्तव्यं चंद्रसूर्यग्रहो यदा॥ मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परमिति
॥ ननु मेघाद्यंतर्द्धाने चाक्षुषं दर्शनं न संभवतीति चेत्॥ दर्शनशब्देन शास्त्रीयज्ञानस्य विवक्षितत्वात्॥ तदाह वृद्ध
गौतमः॥ चंद्रसूर्यग्रहे नाद्यात्तस्मिन्नहनि पूर्वतः॥ राहोर्विमुक्तिं विज्ञाय स्नात्वा कुर्वीत भोजनमिति॥ एवं तर्हि परे
द्युरुदयात्प्रागपि शास्त्रविज्ञानसंभवात्॥ तदैव भोजनं प्रसज्येत॥ तन्न॥ परेद्युरुदये भ्यवहरेत्॥ अहोरात्रं न-
भोक्तव्यमिति वचनद्वयेन तद्प्रसक्तेः॥ यत्तु स्कंदपुराणे॥ यदा चंद्रग्रहस्नानं निशीथात्परतो भवेत्॥ भोक्तव्यं
तात पूर्वाण्हे ना पराण्हे कथंचनेति॥ यत्तु पूर्वं निशीथाद्ग्रहणं यदा चंद्रस्य वै भवेत्॥ तदा दिवा न कर्त्तव्यं भो
जनं शिखिवाहनेति॥ तदिदं यामत्रयाभिप्रायं॥ चंद्रग्रहे तु यामांस्त्रीनिति विशेषस्य वृद्धगौतमेनाभिधानात्॥
पापक्षयकामो ग्रहण दिनमुपवसेत्॥ तदाह दक्षः॥ अयने विषुवे चैव ग्रहणे चंद्रसूर्ययोः॥ अहोरात्रोषितः स्ना
तः सर्वपापैः प्रमुच्यत इति॥ पुत्री तु नोपवसेत्॥ तदाह नारदः॥ संक्रांत्यामुपवासं च कृष्णैकादशिवासरे॥ चंद्र
सूर्यग्रहे चैव न कुर्यात्पुत्रवान् गृहीति॥ तस्य प्रतिषिद्धे उपवासे भोजनकालः॥ स्मृत्यंतरे दर्शितः॥ सायान्हे संग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का॰मा॰ वेभ्नीयाच्छारदेसंगवादधः॥ मध्यान्हेपरतोभ्नीयान्नोपवासोरवेर्ग्रह इति॥शारदोऽपराण्हः॥ यद्वापराण्होथ
१६१ शारद इतिश्रुतेः॥ ग्रस्तास्तमयेतुपुत्रिणोप्युपवासएव॥ अहोरात्रंनभोक्तव्यं इतिभोजनप्रतिषेधात्॥ ॥
इतिश्रीमाधवीयेकालनिर्णयेग्रहणनिर्णयः॥ समाप्तोयंग्रंथः॥ भाद्रपदकृष्ण १४ शुक्रवार ॥ शुभम्॥ ॥

॥अथकालमाधवस्यसूचीपत्रंप्रारभ्यते॥

पत्र॰	प्रकरण	पत्र	प्रकरण	पत्र	प्रकरण	५७	नक्तनिर्णयः
१	तत्रादौमंगलाचरणं	२०	अयननिर्णयः	३८	पक्षनिर्णयः	५९	अयाचितनिर्णयः
१	उपोद्घातः	२०	ऋतुनिर्णयः	४०	तिथिनिर्णयः	६०	प्रतिपदिदानव्रतानि
६	तत्रकालनिर्णयः	२३	मासनिर्णयः	४२	प्रतिपन्निर्णयः	६५	अथप्रतिपद्दिपित्र्यंनिर्णीयते
१४	जन्यकालः	२६	मलमासः	५५	एकभक्तनिर्णयः	६५	तत्रएकोद्दिष्टनिर्णयः
१६	अथसंवत्सरनिर्णयः	३१	तत्रवर्ज्यावर्ज्यविवेकः	५७	अन्यांगेकभक्तनिर्णयः	६७	पार्वणनिर्णयः

राम॰
१६१

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७४	अथद्वितीयानिर्णयः	८८	अष्टमीनिर्णयः	१०५	एकादश्यकरणेप्रत्यवायः	१३३	पंचदशीनिर्णयः
७७	तृयानिर्णयः	८८	अष्टमीव्रतानि	१०८	दशमीवेधः	१३७	अथेष्टिकालोनिर्णीयते
७७	रंभातृतीयानिर्णयः	९०	जन्माष्टमी	११५	व्रताऽधिकारी	१४६	अथप्रकीर्णकं
७९	चतुर्थीनिर्णयः	९७	जन्माष्टम्यांतिथिनिर्णयः	१२१	एकादशीमहिमा	१४६	तत्रनक्षत्रकालनिर्णयः
८१	विनायकचतुर्थी	९९	ग्राह्यतिथिः	१२२	द्वादशीनिर्णयः	१४८	योगकालनिर्णयः
८४	पंचमीनिर्णयः	१०४	नवमीनिर्णयः	१२२	त्रयोदशीनिर्णयः	१४८	करणकालः
८५	षष्ठीनिर्णयः	१०४	दशमीनिर्णयः	१२३	चतुर्दशीनिर्णयः	१४९	संक्रांतिनिर्णयः
८७	सप्तमीनिर्णयः	१०५	एकादशीनिर्णयः	१२४	शिवरात्रिनिर्णयः	१५७	ग्रहणनिर्णयः

वाराणसीप्रसादस्यनियोगेनप्रयत्नतः। काशीसंस्कृतमुद्रायामंकितोयंशिलाक्षरैः॥१॥ श्रीकाशीजीमेज्ञानवापीकेपूर्वफाटकपर श्रीविश्वनाथजीकेपास महाराज शिवलालदुबेजीकेमकानमेकाशीसंस्कृतमुद्रायंत्रमेछपी जिनको लेना होय उनको इसकार्यकेसंपादक श्रीबाबूवाराणसीप्रसादयाकचौरीगलीमेभाईप्रतापसिंहजीकेदुकानपरमिलेगी· सं१९३३ ताः१८ माहेअगस्तसन१८७६ ईसवी·

CC-0. In Public Domain. Digitization by eGangotri

इतिकालमाधवःसमाप्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथकालमाधव प्रारभ्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu